Puruṣottamaji in his commentary *Ātmatarangiṇī* says that the Sāmaveda is sweet because of its song and as such it is important.

वेदानां चतुर्णामपि मध्ये सामवेदोऽस्मि गानात्मकमाधुर्यरसवत्त्वेनाधिक्यं तत्रेति भावः ।

Nīlakanṭha, the famous commentator of the Mahābhārata, says in his commentory Bhārata-bhāvadīpa that the Sāmaveda is charming because of its songs : सामवेदो गानेन रमणीयत्वात्.

Rājānaka Rāmakanṭhācarya of 9th cent. A. D. in his commentatory *Sarvatobhadra* delineates the origin of the Sāmaveda. He says that after all the Vedas were destroyed the Lord first recited the Sāmaveda; hence it is superior :

वेदानां त्रयाणां चतुर्णां वा प्रसिद्धानां मध्ये सामवेदोऽहम्, तस्य भगवतैव प्राधान्यमाविष्कृतम् । येन प्रनष्टेषु वेदेषु वाजिवदनपुरुषोद्गीथमुच्चार्य स एव पूर्वं प्रत्याहृतः । अतस्तस्य मद्विभूत्यंशत्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In the Chāndogya Upaniṣad it is said that Ṛk is the essence of speech, Sāman is the essence of Ṛk, and Udgītha is the essence of Saman. वाच ऋग्रसः, ऋचः साम रसः, साम्न उद्गीथो रसः (1/1/2), It further states that the Sāmaveda is flower सामवेद एव पुष्पम् (3/3/1)

The importance of the Sāmaveda is also pointed out in the Purāṇas and the Mahābhārata. The Mahābhārata says :

सामवेदश्च वेदानां यजुषां शतरुद्रियम् (Anus 14/317) and ओंकारः सर्ववेदानाम्।

The *Praṇava* and *Udgītha* are synonyms. The importance of Sāmaveda is also narrated in Skanda Purāṇa, Nāgarakhaṇḍa 168/48; Matsya P. 85/5; Nārada P. I/125/44; Br. Vaiv. 3/3/24 and 4/77/2.[1]

Pt. Satavalekar in the introduction of his Sāmaveda-saṁhitā explains this point as follows :

एवमेवात्र सामवेदे शब्दब्रह्मणो विशेषेण भूतिमत्त्वं गानरूपत्वात् सामवेदस्य श्रिया युक्तत्वं च तानसंयोगान्मन्त्रपर्वणां समूर्जितत्वं चानुसंधाना-द्विकार-विश्लेषण-विकर्षणाऽभ्यास-विराम-स्तोभानां सुतरां समनुभूयते। यथा छन्दो वाक्यप्रयोगेषु काव्यं छन्दस्सु, गानं काव्येषु, तानसंलापनं च गानेषु विशिष्यते तथैव वेदाः सर्वेषु वाङ्मयेषु, सामवेदोऽखिलेषु वेदेषु, गानं च सामसु विशिष्यते।

—Intro. p. 1

1. See, Dr. Ram Shankar Bhattacharya, पुराणगत वेदविषयक-सामग्री का समीक्षात्मक अध्ययन, पृ० १६४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ACTIVITIES OF THE ALL-INDIA KASHIRAJ TRUST

(July-December 1983)

(1) Garuḍa Purāṇa Work

The collation work of the Garuḍa Purāṇa is in progress. Uptill now the following MSS of the first part called *Ā cāra Kāṇḍa* have been fully collated and compared;

1. रा १ MS No 10/179—in Devanagari script from the Saraswati Bhandar Library of Ramnagar Fort.
2. रा २ MS NO 11/179—in Devanagari script from the Saraswati Bhandar Library, Fort Ramnagar.
3. पू. १ MS. No. 144/of 1887-91 New No. 25—In Devanagari script from Bhandarkar Oriental Institute Poona.
4. पू २ MS. No. 113/of 1881-82 New No. 41—In Devanagari script from Bhndarkar Oriental Institute Poona.
5. जम्मू १ A MS. from the Rabhir Pustakalaya in Devanagari script from Ranbir Kendriya Sanskrit Vidyapith, Jammu.
6. नेवारी १ A MS. In Newari Script, from the National Archives, Kathmandu, Nepal.
7. नेपाल १ Manuscript No. 2-2 in Devanagari Script from the National Archives, Kathmandu Nepal.

The following manuscripts are under collation and it is expected that the collation works of these manuscripts will be completed in next future;

1. जम्मू २ Manuscript No. 3820 (Incomplete) from Ranbir Pustakalaya Jammu

2–4. ने२ ने३ ने४ MSS. from the National Archives, Kathmandu

5. जर्म १ A Bengali MS. from Tubingen University (West Germeny) Library. (incomplete)

The problem of collation concerning the second part named Pretakalpa, is extremely difficult. It appears that there are at

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

least three versions of the text : 1. Printed in Jivananda edition in 35 Chepters; 2. Printed in Venkatesvar edition in 49 Chapters; 3. Garuḍa Purāṇa Sāroddhara in 16 Chapters. We have taken Jivanand edition for ādhāra pāṭha and for this the following manuscripts have been collated :

1–2. रा१ रा२ MSS. from the Saraswati Bhandara Library, Ramnagar Fort.

3. पू.१ A MS. from the Bhndarkar Oriental Institute, Poona.

4. ने१ A MS. in Devanagari manuscript, from National Archives Kathmandu.

5. मिथिला१ A Maithili manuscript from the Ganganath Jha Kendriya Sanskrit Vidyapith, Allahabad (Incomplete).

6. गङ्गा१ A Devanagari manuscript from the Ganganath Jha Kendriya Sanskrit Vidypith, Allahabad.

For the third part ealled *Brahmakāṇḍa*, which is printed only in the Venkatesvara edition the following manuscripts have been collated :

1. रा १ A Devanagari Manuscript from the Saraswati Bhandar Library, Ramnagar.

2–3. जम्मू१ जम्मू२ Two Devanagari Manuscripts from the Kendriya Sanskrit Vidyapith, Jamnu.

4. अड्१ A Devanagari Manuscript from the Adyar Library, Madras.

Besides these manuscripts a few Bengali manuscripts from. Dacca University (Bangladesh) Library and the Asiatic Society Library, Calcutta are still waiting for collation.

Uptill now no manuscripts from South Indian Script is traced. Dr. Georgio Bonazoli has gone to South India to see whether any manuscript in South Indian scripts (Grantha, Telugu Nandinagari, Malayalam) is available or not. So for in Oriya script we have not been able to trace any MS.

(2) Śivadharma and Śivadharmottra.

The collation work of Śivadharma and Śivadharmottra Purāṇas is continuing. As the majority of these manuscripts are

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in non-Devanagari scripts the search for Devanagari manuscript is being made. The Ādhārapāṭha of these Purāṇas is also written on the basis of manuscripts because no printed edition of these Purāṇas is available.

(3) Viṣṇu Sahasranāma.

Search for the manuscripts of Viṣṇu Sahasranāma stotra especially of Viṣṇu-sahasranāma occurring in the Skanda, Padma and Garuḍa Purāṇas is being made.

(4) Svalpa Matsya Purāṇa.

The editing of the Svalpa Matsya Purāṇa was started by the Late Dr. V. Raghavan, more than a decade ago. Unfortunately he could not complete the work. This edition was being prepared on the basis of two manuscripts-one received from the Nalbari Sanskrit Colleg, Assam and the other from the India Office, London. It is proposed that the work should be completed now. For this we are trying to get a photocopy of the Svalpa Matsya Purāṇa MS of Indian Office. The earlier photocopy, which was with Dr. V. Raghavan, is not traceable.

(5) Index of the Parāṇa Bulletin.

With the last issue (Vol XXV No. 2, July 1983) the Purāṇa Bulletin completed 25 years of its publication. A classified subject and author index has been prepared which will be published as a separate valume shortly.

(6) Vyāsa Pūrṇimā and Purāṇa Goṣṭhī.

The Vyāse Pūrṇimā was celebrated on Saturday 23rd July 1983 at the Sivala Palace of the Trust. At first scholars and Pandits listened to the recitation of Śukla Yajurveda in Nara Nārāyaṇeśvara Temple. Then the scholars assembled in the *Bārādarī* and under the Chairmanship of His Highness Maharaja Dr. Vibhuti Narain Singh the Purāṇa Goṣṭhī took place. Sixteen Vedic scholars recited Vedic mantras from different Vedas as a part of Vedic *Vasantapūjā*. On this occasion Sri Ganeshwar Dravid recited a long passage from the last Kāṇḍa of the Śatapatha Brāhmaṇa (Bṛhadāraṛyaka upaniṣad). Maharaja Kumar Sri Anant Narain Singh gave to them *Dākṣina* and sweets. Sri Hiramani Misra recited the Mangalācaraṇa eulogiging various deities

10

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

and the sage Vyāsa. While dedicating the Vyāsa-pūrṇimā issue of the Purāṇa Bulletin to His Highness, the Chairman of the Trust, Editor Dr. R. S. Bhattacharya spoke in brief about the contents published in the issue. Dr. Ganga Sagar Rai placed the work report of the Purāṇa Department for the past year. Scholars expressed their views about various Purāṇic matters specially about the Pretakalpa of the Garuḍa Purāṇa and the Sivadharma and Sivadharmottara Purāṇas. Amongst the prominient scholars present were Pt Baladeva Upadhyaya, Dr. Raghunath Singh, Prof. Rewa Prasad Dwivedi, Dr. Vagish Shastri, Sri Ganeshwar Dravid and Sri Vaikunth Nath Upadhyaya. His Highness Maharaja Dr. Vibhuti Narain Singh thanked the scholars for their active co-operation and invited their learned articles for the Bulletin. His Highness also expressed his desire to meet the scholars from time to time. At the end, breakfast was served.

(7) Veda Pārāyaṇa

In Āṣāḍha Śukla Pakṣa complete Śukla Yajurveda Samhitā was recited in Naranarayaneshwara temple Sivala by Sri Vinayak Badal, Sri Lakshmi Kant Dixit was srota. Usual Dakṣiṇā and a certificate were given to the reciter.

(8) Purāṇa Pāṭha and Pravacana

1. Āṣāḍha Śukla Pakṣa (from Pratipad upto Navamī) from 11-7-83 to 18-7-83) Sri Ramji Misra recited Tripura Rahasya in Bālā Tripura Sundari Temple, Ratanbagh Ramnagar.
2. In Śrāvaṇa Sri Kamadeva Jha recited Rādhākṛṣṇa sahasyanāma stotra in Prasidhabag at the time of Rāsalīlā.

(9) Visitors to the Purāṇa Department

Many research scholars visited the purāṇa Department during the period in connection with their research on the Purāṇas and allied subjects. Necessary help was supplied to them. Among the visitors the following persons have recorded their views in the visitors, book;

1. Sri Ashok Singhal—Central office, Vishwa Hindu Parishad New Delhi. पुराण के शोध का अद्वितीय कार्य प्रारम्भ हुआ है। भगवान् इस कार्यको सफलता से पूर्ण करे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

2. Mr David Kinsley—Department of Religion, Hamilton, Mc Master University, Ontario, Canada—12-9-83.

He writes; 'It is very impressive to see first hand what is involved in producing a critical edition of Purāṇa. It seems a painstaking gigantic effort. I admire the dedication and enthusiasm of the staff.

3. Sri K. Chandramauli—Indian Alumunium Co. Ltd; Belgaum, P. O. Karnataka 16-12-83. He writes : Indeed a wonderful and Great work is going on this Department. Critically editing the Purāṇas from among several Purāṇic texts is a herculean task needing plenty of patience, time, money and ofcourse genuine knowledge. While it is great pleasure to see that there are many pandits who can bestow their valuable time, energy and knowledge in this work, it is a pity that enough funds are not forthcoming to complete such a commendable work with as much speed as desirable.

(10) Rāsalīlā

In the month Śrāvaṇa like every year the Rāsalīlā was performed by Rāsamaṇḍai (party) of Brindāvan in the Prasiddha Garden. His Highness Maharaja Dr. Vibhuti Narain Singh and the Royal family observed the Rāsalīlā daily. A huge crowd of local people saw the Rasalila eagerly.

(11) Rāmalīlā

The famous Rāmalīlā of Ramnagar was performed this year from 21st Sept. to 20 Oct. 1983. The number of Sadhus who got free ration was about 1000 daily. Alongwith regular *Nemi-s* and thousands of Darshakas a good number of foreign visitors also saw the Rāmalīlā. Among the scholars who visited the Rāmlīlā during 1983. The names of the following many be mentioned.

Professor Jacques Scherer, Institute of Theatrical Studies, Sorbonne University of Paris, who has for many years studied the nature of traditional spectacular ceremonial theatre in Asia and Africa, wrote to His Highness that "the experience of the Ramlila itself is paramount and we hope, after watching it, be able to give the first serious account of it in the French language". Professor

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Scherer was assisted in this study by Madame Christiane Peterfalvi, a teacher in Modern Drama at Sorbonne, who came to Benares earlier and for a few months studied Hindi so that she could follow the performance. They went through the monthlong performance with great enthusiasm.

Mr. Henry Kemp-Blair, Department of Communications, Chapman College, Orange, California, U. S. A. Mr. Kemp-Blair, who has made a study of dramatic presentation of the Rāmāyaṇa in South East Asia, stayed on for over a week in Benares attending the Ramlila every evening.

Srimati Linda Hess, San Francisco, California, U. S. A. : Srimati Hess who worked with Prof. Richard Schechner of the New York University, Drama Department, and who is assisting the latter in writing an exhaustive book on the Ramnagar Ramlila to be published soon, attended the Ramlila this year after a lapse of five years. She is working on a series of books on Ramlila which includes one giving a synopsis of the Ramlila for the benefit of foreign scholars and tourists. This has been commissioned by His Highness to satisfy the need of an increasing number of scholars who come to study the Ramlila without possessing a working knowledge of Hindi.

Dr. Kumari Anuradha Kapur, National School of Drama, New Delhi : Kumari Kapur who now teaches at the National School of Drama, attended the Ramlila for two days. She had made a detailed study of the Ramlila of Ramnagar for her Doctoral dissertation to the leeds University, England, a few years ago.

ACTIVTIES OF THE SISTER TRUSTS

1. Maharaja Banaras Vidya Mandir Trust

(A) Museum

The popularity of the Museum is increasing every year. The number of visitors both from India and abroad is increasing. Like Indian pilgrims, foreigners also visiting Varanasi make it a point to visit Ramnagar and meet His Highness Maharaja Dr. Vibhuti Narain Singh. Among the distinguished visitors the names of the following may be mentioned :

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(i) Sri Sunil K. Roy—Ambassador environmental consultant—B-90 Defence Colony, New Delhi 29-9-1983. He writes his impressions in the following words : A magic glimpse into the days of Indias glory and tradition which must be preserved for posterity.

(ii) Maharaja Prithviraj Singh of Danta (Gujrat)—2.11.83

(iii) Sir Robert Wade-Gery and lady Wade Gery-British High Commissioner 31-12-83. The British High Commissioner has written his impression thus : A fascinating visit to an unique and charmingly displayed collection.

(B) Vedic Balaka Vasanta Puja

On 18-11-83 on the occasion of birth day ceremony of Maharja Kumar Sri Anant Narain Singh the Vedic Bālaka Vasant Pūjā was performed by 16 Vedic boys of below 16 years age in the Devī temple of the Fort. After the Vedapāṭha all the Vedic boys were fed and Dakṣiṇā was given to them. All the vedic students were from Varanaśi.

(C) Painting competition

On 18th November 1983 the painting competition for boys of local schools was organised in which 525 boys took part. Boys very keenly appeared in the competition. Prof. A. P. Gajjar, Dean of Faculty of the Fine Arts and Prof M. V. Krishnan of the same Faculty assessed the paintings. Prizes and sweets were given to winning boys.

A competition of local poters was also organised on the same day. These porters made their painting on the walls of Maharja Benares Vidya Mandir Museum. Sri Ragunath got the prize of excellence and Hori Lal stood first. Second and third prizes were given to Ram Narain and Bali Ram. Others got consolation prizes.

(2) Maharanī Kashi Naresh Dharmakaya Nidhi

Under the auspiees of this Trust sweets were distributed to boys of local Primary and Junior High Schools on 18-11-83. The total number of boys who got the sweets was 5594.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

On the same day cloths were also distributed to poor boys. Number of such boys who got cloths was 1681. On the following day cloths and sweets were disitributed among the tribal boys of Bairat near Chakia.

(3) Maharja Prabhu Narain Singh Physical Culture Trust

Under the auspices of this Trust Trainees of the Health Improving Association Misir Pokhra Varanasi who earlies attended U. P. Archeny competition showed their expertise in weight lifting and other physical exercises on 17-11-83. Sri Dayaram and Sri Prem Mohan Behal were main in this group. Rs 501/—was given as cash to this group and all participants were fed. A bow was also Presented to this association.

(4) Maharja Kashiraja Dharma Karya Nidhi

Under the auspices of this Trust various religious and cultural activities and rituals are performed during the whole year in Ramnagar and different places in the country such as Vindhyachal, Allahabad, Chakia, Kamrupa etc. Besides, these religious activities, this Trust also runs the following educational institutions :

(A) Maharja Balwant Ṣingh Degree College, Gyanpur—This college was estabiished in 1973. It imparts education in Arts subjects upto B. A. level of Gorakhpur University. The result of the college is very satisfactory and many students here secured First and High second class marks. Total number of students is more than 400. Total strenth of teachers is 11 including the Principal.

(B) Maharaja Mansa Ram Ḷaw College, Raja Talab—This college admits students for LL. B. Classes of the Gorakhpur University. Total number of students is more than 400. 7 teachers are working in the college. The result of the college is best among all the colleges of Gorakhpur University.

(C) Maharani Ram Ratna Kunwari Sanskrit Pathsala Ramnagar.

This Pathsala was established more than 50 yeary ago by Maharani Ram Ratna Kunwari and since then continuously prepares students for the Prathamā and Madhyamā classes of Sanskrit University. Students of this Pathasala always show good results in the examinations.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

PUBLICATIONS OF THE ALL-INDIA KASHIRAJ TRUST

Critical Editions and Translations

1. *Vāmana Purāṇa*—Crit. Ed. by Sri A. S. Gupta, 1967. pp. LXX, 778, 113. Critical text, containing 5877 ślokas, prepared on the basis of 20 MSS. Sanskrit text, critical apparatus, the variations of all the collated MSS, 4 Appendices and Index of ślokas. Rs. 250
2. *Vāmana Purāṇa*—Text with English Translation 1968. pp. L, 543, 71, 97. Ed. by A. S. Gupta. Transl. by S. M. Mukhopadhyaya, A. B. Ehattacharya, N. C. Nath, V. K. Verma. Introduction, Sanskrit text, English translation, 5 Appendices and Index of ślokas. Rs. 200
3. *Vāmana Purāṇa*—Text with Hindi Translation, 1968 pp. XL, 465, 58, 97. Ed. by A. S. Gupta. Transl. by Gopal Chandra, S. N. Singh, G. S. Rai. Introduction, Sanskrit text, Hindi translation, 5 Appendices and Index of ślokas. Rs. 100
4. *Kūrma Purāṇa*—Crit. Ed. by A. S. Gupta, 1971. pp. IV, LXXI, 841, 99. Critical text containing 5687 ślokas, prepared on the basis of 21 MSS. Sanskrit text with critical apparatus, variations of all the collated MSS, 3 Appendices, Critical Notes and Index of ślokas. Rs. 250
5. *Kūrma Purāṇa*—Text with English translation, 1972. pp. 2, XLI, V, 557, 58, 99. Ed. by A. S. Gupta. Transl. by A. B. Bhattacharya, S. Mukherji, V. K. Varma, G. S. Rai. Sanskrit Text, English translation, 2 Appendices, the 1008 epithets of Pārvati, Index of ślokas. Rs. 200
6. *Kūrma Pnrāṇa*—Text with Hindi Translation and Appendices. Rs. 100
7. *Varāha Purāṇa*—Crit. ed. by A. S. Gupta. 1981—in 2 parts, part I containing Foreword, Introduction and chapters 1-143; part II containing chapters 144-215 and Appendices. pp. XCVI, 1359. 168. Critical text of 9471 ślokas and ten chapters in prose, prepared on the basis of 19 MSS. Sanskrit text, Critical Apparatus, Variations from all the consulted MSS 2 Appendices and Index of ślokas.
   [Ordinary edition—Rs. 265/-; Deluxe edition— Rs. 1000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

8. *Varāha Purāṇa*—Text with English Translation, 1981. Ed. by A. S. Gupta. Transl. by A. B. Bhattacharya. pp. 6, III, 38, 989, 71, 168. Introduction, Sanskrit text with English Translation, Two Appendices and Index of ślokas.

   Ordinary edition—Rs. 220/-; Deluxe edition—Rs. 700

   Varaha Purāṇa (Text only) Price Rs. 100

9. *Varāha Purāṇa*—Hindi Translation

10. *Devīmāhātmya*—Text with English Translation and annotations by V. S. Agrawala.

11. *Svargakhaṇḍa of the Padma Purāṇa*—Crit. Edited by A. Chatterjee Shastri, 1972, pp. XVIII, 60, 393, Introduction, Sanskrit text, critically edited on the basis of 7 MSS, Index of words, Index of ślokas, Bibliography. Rs. 40

12. *Rāmacarita-Mānasa*,—Crit. ed. by Acharya Vishvanath Prasad Mishra, prepared on the basis of 24 MSS. 1962. pp. 32, 576. Introduction, Text, Critical apparatus, 4 Appendices. Rs. 15

Studies

1. Matsya Purāṇa—A Study. By Dr. V. S. Agrawala Rs. 40
2. Garuḍa Purāṇa—A Study. By Dr. N. Gangadharan Rs. 40
3. Nārada Purāṇa—A Study. By Dr. K. Damodaran Nambiar Rs. 75
4. Niti-Section of Purāṇārthasaṁgraha. By Dr. V. Raghavan Rs. 2
5. Vyāsa-Praśasti [व्यासप्रशस्तिः]. Compiled and edited By Dr. V. Raghavan Rs. 1
6. Greater Rāmāyaṇa. By Dr. V. Raghavan Rs. 30
7. Viṣṇupurāṇa Viṣayānukramaṇī [विष्णुपुराणविषयानुक्रमणी] By Pt. Madhvacharya Adya Rs. 5
8. Bṛhaspati-Saṁhitā of the Garuḍa Purāṇa. By Dr. L. Sternbach Rs. 10
9. Mānavadharmaśāstra [I-III] and Bhaviṣya Purāṇa By Dr. L. Sternbach Rs. 20

Journal

Purāṇa—Half Yearly Research Journal—dealing with the various aspects of purāṇas, [Some back volumes are still available]

Annual Subscription— Inland Rs. 50, Foreign £ 5.

The books can be had of the General Secretary, All-India Kashiraj Trust, Fort, Ramnagar, Varanasi.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुराणम्

(भागः-२६; अङ्कः-१)

PURĀṆA

(Vol. XXVI. 1)

संस्कृत-खण्डः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतविद्वांसोऽभ्यर्थ्यन्ते यत्ते पुराणपत्रिकायां प्रकाशनार्थम् (१) पुराणगत-दर्शनशास्त्र-धर्मशास्त्रविषयपरान् लेखान् (२) पुराणोक्त-दुरूहार्थकास्पष्टार्थकवचनव्याख्यापरान् लेखांश्च प्रेषयेयुरिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुराणानां नूनमागममूलकत्वम्

श्रीव्रजवल्लभद्विवेदः, शास्त्रचूडामण्याचार्यः, काशी

[It is wellknown that the words Āgama and Nigama chiefly denote the Tantra and the Veda respectively. The original Āgama is regarded as beginningless and is said to be the source of the Sāṁkhya. Yoga, Pāñcarātra, and Pāśupata śāstras. An attempt is made here to prove that like the Vedas, the Āgamas are also the source of the Purāṇas; in other words the Purāṇa is the amplifier (*upavṛṁhaka*) not only of the Vedas but also of the Āgamas.

That some of the chapters of the Agni-purāṇa are based on the Hayaśīrṣa and other Āgamic works is beyond doubt. It is evident that the subjects like the construction of *prāsādas*, *mandiras*, idols etc. belong to the field of the Āgamas and that the Purāṇic chapters dealing with these are clearly based on certain Āgamic works.

Some of the Purāṇas expressly mention those subjects that are not propounded in the Vedas. Similarly we find such subjects treated of in the Purāṇas as are not propounded in the Smṛtis. All these subjects are regarded as belonging to the Purāṇas. A large number of these Purāṇic subjects (e. g. the *pūrta* acts) are originally Tāntric in character. Purāṇic chapters dealing with these subjects are undoubtedly based on some Āgamic works.

Chapters dealing with the Śaiva philosophy are found in the Nāradiya-purāṇa, Some of the verses in these chapters are found even in the works of Śaiva teachers. Chapters of a similar kind are found in other Purāṇas also. Dr. Hazra is also of the opinion that some Purāṇic chapters are based on the Tantras. His view that the Tantras are anti-Vedic and anti-Brāhmaṇic does not seem to be valid. In the Śānti-p. Sāṁkhya, Yoga, Pāñcaratra, Pāśupata and the Vedas are regarded as authoritative. Such Purāṇic passages as showing censure to some śāstras are not to be taken literally. It is well known that the teachers of the Advaita school are

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

the staunch worshippers of the Śrīcakra of the Tantra śāstra. The view of some scholars that the Tāntric influence is not to be found in the Purāṇas composed before 800 A. D. is untenable.

It is remarkable to note that the line of teachers of the Pāśupata school is found in the Purāṇas like the Vāyu-p. The Garuḍa-p. is found to contain a few chapters which deal with Tāntric matters. That such chapters are based on some Āgamic works may be proved by comparing them with the chapters (in Āgamic works) dealing with similar subjects. It is however to be accepted that though both the Vedas and the Tantras are the sources of the Purāṇas, yet the Vedic religion has been given a prominent place in the Purāṇas.

Though there exists acute opposition between the Śaiva Āgamas and the Vaiṣṇava Āgamas, yet the Purāṇas are not in favour of this opposition. The Purāṇas lay much stress on the identity of Śiva and Nārāyaṇa. That is why a Purāṇa is sometimes found to propound the Vaiṣṇava as well as the Śaiva doctrines in its different chapters.

The Purāṇic assertion that Lākula and other Tāntric śāstras are delusive seems to be influenced by some of the statements of Śaṅkara and his commentators. Similarly the Purāṇic assertion मायावादमसच्छास्त्रम् is an example of the influence of Vaiṣṇavas of South India, It is however to be accepted that there are delusive (*mohaka*) portions in some of the Tāntric works. But this does not prove that the Tāntras as a whole are to be regarded as non-authoritative. The authoritativeness of the Śaiva, Vaiṣṇava and Śākta Āgamas is found to have been expressly declared in the Purāṇas.

The current Purāṇas were not composed by the followers of the Pāñcarātra, Pāśupata and Śākta schools. They were composed in Vedic tradition; their authors were those persons who took the Āgamas as authoritative and who followed the rites and customs prescribed by the Smṛtis. That is why a Purāṇa is said to be वेदसंमितम् as well as आगमैः सुविभूषितम्.]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामचरितमानसकारः 'सन्त'-विरुदालङ्कृतः श्रीमान् तुलसीदासो ग्रन्थारम्भे नानापुराणनिगमागमसम्मतत्वं स्वग्रन्थस्य प्रज्ञापयति। अत्र निगम-शब्दो वैदिकं वाङ्मयम्, आगमशब्दश्च तन्त्रागमशास्त्रं सूचयति। शब्दयोरनयोः प्रवृत्तिविषये वर्तते मतानैक्यं शास्त्रकाराणाम्। "इतरेष्वागमाद् धर्मः" (१।८२) इति मनुस्मृतिश्लोके आगमपदेन वेदो गृह्यत इति तद्भाष्यकारो मेधातिथिराह। निगमपदेन च वेदस्य ग्रहणं भवतीति निरुक्ते बहुषु स्थलेषु समुट्टङ्क्यते "इत्यपि निगमो भवति" इति वाक्यपुरःसरम्। "आगमः खल्वपि—ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति च पस्पशाह्निके महाभाष्यकारः पतञ्जलिः। भर्तृहरिरपि—"शिष्टेभ्य आगमात् सिद्धाः" (१।२७), "न चागमादृते धर्मः" (१।३०), "आगमस्तमुपासीनः" (१।४१), "न जात्वकर्तृकं कश्चिदागमं प्रतिपद्यते" (१।१३३), "प्रणीतो गुरुणाऽस्माकमयमागमसंग्रहः"(२।४९०),"भिन्नैरागमदर्शनैः" (२।४९२), "पुराणैरागमैर्विना" (२।४९३) इत्येवं बहुषु स्थलेषु प्रयुङ्क्ते तदागमपदम्। अत्र टीकाकारा आगमपदेन ऋषिप्रणीतानां शास्त्राणाम्, निगमपदेन चापौरुषेयानां वेदानां ग्रहणं कुर्वन्ति। अमुमर्थमागमाचार्यस्तान्त्रिकप्रवरः काश्मीरकः श्रीमदभिनवगुप्तोऽप्युररीकरोतीव। स हि[1]—"वेद्यं धर्माद्युपायं निश्चितं गमयतीति निगमो वेदः" इति निगमपदस्य व्युत्पत्तिमाचष्टे।

आगमपदस्य तु तेन किञ्चिद् भिन्नं व्याख्यानं प्रस्तुतम्। तद्यथा तन्त्रालोके—"इह तावत् समस्तोऽयं व्यवहारः पुरातनः। प्रसिद्धिमनुसन्धाय सैव चागम उच्यते॥" (३५।१-२) इति, "प्रसिद्धिश्चाविगानोत्था प्रतीतिः शब्दनात्मिका" (३५।१९) इति च। अपि च—"आगमो हि नामायं शब्दनसंक्रान्तिशरीरः। यथाह भगवानन्तः[2]—"परत्र स्वबोधसंक्रान्तये शब्देनोपदिश्यते" (पृ० ८९), "स च यो यस्य हृदये निरूढिमागतः स एव" (पृ० ९६), "नहि बुद्धो नाम नियतः कश्चित्, अपि तु भावनाबलप्रतिलब्धक्षणिकादिदृढविमर्शः। तस्य क्षणि-

---

१. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी (भा. १, पृ. १५) द्रष्टव्या।

२. अभिनवगुप्तेन तन्त्रालोके (२८।३१३) अनन्तकारिका स्मर्यते। भगवता शेषेण पृथ्व्याधारभूतेन सोपदिष्टा। सा परमार्थसारनाम्ना सांख्य-वेदान्त-वैष्णवदर्शनग्रन्थत्वेन प्रसिद्धा सटीका मुद्रितोपलभ्यते। तदाधारेणाभिनवगुप्तः परमार्थसाराख्यं शैवग्रन्थं जग्रन्थ। तत्र तृतीये श्लोकेऽभिनवगुप्तोऽनन्तकारिकामेव आधारकारिकानाम्ना स्मरति, "स्वशास्त्रे चाप्यहीशानो विश्वाधारधुरन्धरः"(२८।३०९) इति च स तन्त्रालोकेऽनन्तं सादरं स्मरति। महाभाष्यकारः पतञ्जलिरपि शेषावतारभूत इत्यनन्तनाम्ना स एवात्र स्मृत इति प्रतीयते। अतो महाभाष्ये गवेषणीयमेतद् वचनम्। पातञ्जलयोगसूत्राणामपि कर्ता भगवान् शेषावतारभूतोऽनन्तः पतञ्जलिरेवेति भारतीया परम्परा। तत्र योगभाष्ये व्यासकृते (१।७) आनुपूर्व्या तदिदं वाक्यं समुपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कादिभावनोपदेशी गुरुः पूर्वंबुद्धः, तस्याप्यन्य इति क्रमेणानियतवक्तृत्वात् पारमेश्वरविमर्शमयतैव वस्तुतः। एवं चतुर्विंशतितत्त्वभावनाभावितः कपिलो मन्तव्यः। अत एव सर्वागमा अनादय एव" (पृ० ९७-९८) इति च स एवागमपदं[३] विवृणोति। एवं च [४]सांख्य-योग-पाञ्चरात्र-पाशुपतादिशास्त्राणामागमपदाभिलप्यत्वमिति बाढमत्र साधयितुं शक्यते।

"आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे। मतं च वासुदेवस्य तस्मादागममुच्यते॥ निर्गतं गिरिजावक्त्राद् गतं च गिरिशश्रुतौ। मतं च वासुदेवस्य तस्मान्निगममुच्यते॥" श्लोकद्वयमेतदागमनिगमलक्षणप्रतिपादकं बहुषु ग्रन्थेषूद्धृतं दृश्यते। क्वत्यमिति तु न ज्ञायते। लक्षणमेतदङ्गीकृत्यैव कुलचूडामणिग्रन्थस्य कुलचूडामणिनिगम इति नाम ख्याप्यते। परन्तु नैतत् प्राचीनाचार्यसंमतम्। न च दृश्यते तादृशो विभागः प्राचीनेषु क्रमसम्प्रदायग्रन्थेषु, येषां किल उपदेष्ट्री भवति काली कालसङ्कर्षिणी। नात्र कुत्रापि निगमपदप्रयोगो लब्धप्रसरः, किन्तु सर्वेऽपीमे ग्रन्था आगमाख्यामेव धारयन्ति। तस्मात् सम्पूर्णं तान्त्रिकं वाङ्मयमागमपदेन, वैदिकं च निगमपदेन बोध्यते। पूर्वोक्तानि श्रीमदभिनवगुप्तवचनान्यप्यत्रैवानुगुणानि। अत्रैव चार्थे निबन्धेऽस्मिन् निगमागमशब्दौ प्रयुक्तौ मन्तव्यौ।

पुराणानां प्राचीनतमं स्वरूपं साम्प्रतमनुमानप्रमाणेनैव कल्पयितुं शक्यते। तच्च नास्य निबन्धस्य परिधिपतितमिति वर्तमानानामष्टादशमहापुराणानां स्वरूपमेव समालोचनीयताकोटिमाटीकते। एषामेव च नूनमागममूलकत्वमिति सिषाधयिषितं नः।

पुराणानां वेदार्थोपबृंहकत्वमिति विद्वद्भिः साधु चिन्तितं चिन्त्यते च, किन्तु कुत्रापि किल तेषामागमार्थोपबृंहकत्वं संग्राहकत्वं वा नैव चिन्त्यते। अस्माभिः [५]"आगम आणि तन्त्रशास्त्र" इति शीर्षके मराठीभाषानिबद्धे निबन्धेऽग्निपुराणस्य ३९-७० अध्याया [६]हर्षशीर्षपञ्चरात्रस्य आदिकाण्डस्य २-४४ पटलान्,

---

३. ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यामेव (भा. ३) सर्वमेतदवलोकनीयम्।

४. शास्त्राणामेषां प्रामाण्यादिकमनुपदमेव चिन्त्यते।

५. पुण्यपत्तनस्थ(पूना)वेदशास्त्रोत्तेजकसभया शताब्दीस्मारकग्रन्थत्वेन प्रकाशिते "प्राचीन भारतीय विद्येचे पुनर्दर्शन" इत्याख्ये ग्रन्थे (पृ. १८१-१९६) द्रष्टव्योऽयं निबन्धः।

६. हयशीर्षपञ्चरात्रस्य आदिकाण्डस्य भागद्वयात्मकं संस्करणं 'वारेन्द्र रिसर्च सोसाइटी' इति संस्थया बंगलादेशीयराजशाहीनगरस्थया सन् १९५२,१९५६ इति वत्सरयोः प्रकाशितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७१-१०६ अध्यायाश्च [7]सोमशम्भुकृतकर्मकाण्डक्रमावल्याम् (पृ० ३१-१८६) उद्धृतान् लीलावतीशिवागमश्लोकाननुकुर्वन्तीति प्रतिपादितमासीत्। तथा हि—"हयशीर्षः प्रतिष्ठार्थं देवानां ब्रह्मणेऽब्रवीत्" (३८।५१) इत्येवं किलाग्निपुराणे विष्ण्वाराधनप्रकरणमिदमारभ्यते। हयशीर्षपाञ्चरात्रं च हयशीर्षेण ब्रह्मणे समुपदिष्टम्। तत्रत्ये आदिकाण्डीये द्वितीये पटले पञ्चविंशतिपाञ्चरात्रसंहितानामथ च भागवतसंहितानां नामानि प्रदर्श्यन्ते। अग्निपुराणे (३९।२-५) च पञ्चविंशतिपाञ्चरात्रसंहितानामेव नामानि संगृहीतानि, न भागवतसंहितानाम्। अहिर्बुध्न्यसंहितासम्पादकः शर्मण्यदेशीयो डॉ० ओटो श्रादरमहोदयस्तस्य ग्रन्थस्य स्वकीयायां भूमिकायां[8] भागवतसंहितानां नामान्यपि पाञ्चरात्रसंहितासु परिगणितवान्। तन्नोचितमित्यग्निपुराणस्य प्रकरणेनानेन साधु सिद्ध्यति।

"स्कन्दायेशो यथा प्राह प्रतिष्ठार्थं तथा शृणु" (७०।९) इत्येवमग्निपुराणे शिवाराधनप्रकरणमारभ्यते। "अथ संक्षेपतो दृष्टं [9]लीलावत्यां शिवागमे" (पृ० ३१) इति च कर्मकाण्डक्रमावलीकारो भणति। अग्निपुराणप्रामाण्येन कर्मकाण्डक्रमावलीवचनेन चानेन लीलावत्याख्यः शिवागमः स्कन्दायेशेन समुपदिष्ट इत्यायाति। सोमशम्भुना कर्मकाण्डक्रमावली ११३० वैक्रमे वत्सरे समाप्तिं गमितेत्युभयोरग्निपुराणकर्मकाण्डक्रमावल्योराधारभूतो ग्रन्थो लीलावत्याख्यः शिवागम इत्यकामेनापि मन्तव्यम्।

वैरोचनीये[10] प्रतिष्ठालक्षणसारसमुच्चये—

७. अस्य ग्रन्थस्य साम्प्रतं संस्करणत्रयमुपलभ्यते। देवकोट्टैनगरतः १९३१ ई० वर्षे प्रकाशितं प्रथमम्, काश्मीरग्रन्थावल्यां १९४७ ई० वर्षे प्रकाशितं द्वितीयम्, पांडीचेरीतश्च भागत्रयेषु (१९६३,१९६८,१९७७ ई०) प्रकाशितं तृतीयम्। अत्र काश्मीरसंस्करणपृष्ठसंख्या द्रष्टव्या।

८. "इण्ट्रोडक्शन टू दि पाञ्चरात्र एण्ड दि अहिर्बुध्न्यसंहिता" (पृ. ५-११) इत्याख्यस्तस्य ग्रन्थोऽवलोकनीयः।

९. लीलावत्याख्यः शिवागमः शिवागमोपागमसूचीषु न दृश्यते। पांडीचेरीसंस्करणेऽप्यस्य परिचयो नैव दत्तः। डॉ. श्रार.सी. हाजरामहोदयः "स्टडीज इन उपपुराणाज" इत्यस्य ग्रन्थस्य प्रथमे भागे (पृ. १३) एकाम्रपुराणीयोपपुराणनामावल्यां लीलावतीपुराणं निर्दिशति, द्वितीये च भागे (पृ. ६२६-६२७) नाद्याप्यस्य कुत्राप्युद्धरणादिकमुपलभ्यत इति वक्ति। शिवधर्म-शिवधर्मोत्तरप्रभृतीनामुपपुराणानां नामान्युपागमेषु दृश्यन्ते। तेन केषाञ्चनोपागमानामुपपुराणेषु समजायत समावेशो गच्छता कालेनेति वक्तुं शक्यते।

१०. वैरोचनशिवाचार्यविरचितोऽयं ग्रन्थो भागद्वयात्मको नेपालराजकीयपुस्तकालयतः २०२३, २०२५ वैक्रमाब्दयोः प्रकाशितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिष्ठाकल्पकौमारं किरणं पिङ्गलामतम् ।
देव्यामतं मयं नन्दि प्रतिष्ठापारमेश्वरम् ॥
भास्करं लिङ्गकल्पं च विद्यापुराणवाठुलम् ।
शक्राख्यं वामदेवं च द्विधा पैतामहं तथा ॥
बाणगर्गमतं याम्यं हंसाख्यं वैश्वकर्मकम् ।
प्रतिष्ठातन्त्राण्येतानि शिवोक्तान्येकविंशतिः ॥ (२।१७९-१८१)

इत्येवमेकविंशतिसंख्याकानां शिवोक्तानां प्रतिष्ठातन्त्राणां नामानि प्रदर्शितानि । सर्वाण्येतानि प्रतिष्ठातन्त्राणि शिवागमेषु तदुपागमेषु वा, क्वचन उपपुराणेषु वा समाविशन्ति ।

न वेदे त्रिविधं लिङ्गं न च प्रासादलक्षणम् ।
न द्वारं मण्डपादिश्च स्थापनं न शिवादिके ॥ (२।१५६)

इति च तत्रैव प्रोच्यते । तेन त इमे विषयाः पुराणेष्वागमेभ्यो गृहीता इति स्वीकार्यम् ।

न वेदे ग्रहसंचारो न शुद्धिः कालबोधिनी ।
तिथिवृद्धिक्षयो वापि न पर्वग्रहनिर्णयः ॥
इतिहासपुराणैस्तु कृतोऽयं निर्णयः पुरा ।
यन्न दृष्टं हि वेदेषु तत्सर्वं लक्ष्यते स्मृतौ ॥
उभयोर्यन्न दृष्टं हि तत्पुराणैः प्रगीयते ।
(बृ० ना० २।२४।१९-२१)

इति च स्वयं पुराणान्यपि वर्णयन्ति ।

अथ तन्त्रविधिं वक्ष्ये पुराणेष्वपि गीयते ।
तन्त्रे चैव प्रतिष्ठां च कुर्यात् पुण्यतमेऽहनि ॥ (२।१।११।१)

इत्यादिना भविष्यपुराणेऽपि[11] वृक्षारामवापीकूपतडागादीनां प्रतिष्ठा तन्त्रानुसारेणैव वर्णिता ।

द्विविधं कर्म भवति—इष्टं च पूर्तं चेति । तत्रेष्टं ज्योतिष्टोमादिकं वैदिकं

११. चित्रकूट(चित्तौड़)दुर्गं निकषा घोसुण्डीनामके ग्रामे समुपलब्धे प्राचीने ब्राह्मीलिप्युत्कीर्णे शिलाशासने सशिलाप्राकारा वाटिका वासुदेवसङ्कर्षणाभ्यां समर्पितेति वर्ण्यते । सात्वतसंहिता च पाञ्चरात्रीया निर्दिशति—"यः सप्राकारमारामं संप्रयच्छति वै विभोः । नानापुष्पफलोपेतं वापीद्रुमसमाकुलम् ॥ साब्जतोयाशयोपेतं माकखञ्जसमन्वितम् । स नन्दनवने भोगान् भुक्त्वा यात्यच्युतालयम् ॥" (२५।३६६-३६७) इति । सात्वतसंहिताया उपोद्घातोऽस्मदीयोऽत्र द्रष्टव्यः (पृ. ७) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्म आमुष्मिकम्। पूर्तं च वृक्षारामवापीकूपतडागादीनां निर्माणमैहिकफलदं कर्म। "धर्मो द्विविधः—इष्टः, पूर्तश्चेति। तत्रेष्टो वैदिकः, पूर्तस्तान्त्रिकः" (श्लो० १९) इति तत्त्वप्रकाशव्याख्याकारः[१२] कुमारदेवो भणति। तेन पूर्तकर्मणां पुराणेषु कृतो विस्तारस्तन्त्रागमाननुसरतीति प्रासादमूर्तिनिर्माणप्रतिष्ठादयः, वापीकूपतडागादि-निर्माणप्रतिष्ठादयश्च विषया नूनमिदम्प्रथमतया तन्त्रागमेष्वेव वर्णिता इत्यङ्गी-कार्यम्।

त्रिपदार्थं चतुष्पादं महातन्त्रं प्रचक्षते।
भोगमोक्षक्रियाचर्याह्वयाः पादाः प्रकीर्तिताः॥ (१।६३।१३)

इत्यपि बृहन्नारदीये दृश्यते। पति-पशु-पाशात्मकपदार्थत्रयप्रतिपादका ज्ञान(विद्या)-योग-क्रिया-चर्याख्यपादचतुष्टयात्मकाः शैवागमा भवन्तीति मनीषिणा-मतिरोहितमेतत्। तेन बृहन्नारदीयेऽस्मिन् श्लोके भोगपदस्य स्थाने योगपदेन भाव्यम्। सम्पूर्णोऽयमध्यायोऽशुद्धिभूयिष्ठः शैवागमीयतत्त्वप्रकाशादिग्रन्थ-साहाय्येन शोधयितुं शक्यते। अत्र केचन श्लोकाः सद्योज्योतिःशिवाचार्यग्रन्थेषु भोगकारिकादिषु अष्टप्रकरणनाम्ना[१३] मुद्रितेषु समुपलभ्येरन्। कूर्मपुराणे उत्तरे भागे वर्तते ईश्वरगीता नाम। सा शैवागमसिद्धान्तान् सार्वात्म्येनानुसरति। तत्त्व-प्रकाशटीकाकारः कुमारदेवस्तां प्रमाणत्वेनोद्धरति। पुराणागमयोः सान्निध्यं तेनानुमातुं शक्यते। तत्त्वप्रकाशव्याख्याकारः शैवोऽघोरशिवाचार्यः—

अद्वैतवासनाविष्टैः सिद्धान्तज्ञानवर्जितैः।
व्याख्यातोऽत्रान्यथाऽन्यैर्यं स ततोऽस्माकमुद्यमः॥

इति स्वव्याख्यारम्भे भणति। अत्र स कुमारदेवकृतां टीकां स्मरतीव। स्मार्तदृष्टिर्हि कुमारदेवस्य व्याख्यायां जागरूका विद्यते, यतो हि स आगमशास्त्राणीव श्रुतिपुराणवचनान्यपि प्रमाणीकरोति। पञ्चदेवोपासनपरा एषैव दृष्टिः पुराणे-ष्वपि जागर्तितराम्। शिवनारायणयोरैक्यवत् तत्र शक्ति-स्कन्द-गणेश-सूर्यादीना-मुपासना तथैव वर्णिता, यथा हि प्रपञ्चसार-शारदातिलकप्रभृतिषु तान्त्रिकेषु

१२. कुमारदेवोऽयं गुर्जरदेशे चालुक्यराज्यसंस्थापकस्य मूलराजस्य नृपतेः (१०९० ई.) गुरुः कुमारशिवः प्रतीयते, येन हि सिद्धपुरे सहस्रौदीच्यानुदीचीतः समाहूय स्मार्त-धर्मप्रतिनिधिभूतो रुद्रमहालयाख्यः प्रासादः प्रतिष्ठापितः।

१३. देवसालपुरीशिवागमसिद्धान्तपरिपालनसंघेन प्रथमे भागे तत्त्वप्रकाश-तत्त्वसंग्रह-तत्त्व-निर्णयाख्याः सव्याख्या ग्रन्थाः १९२३ ई. वर्षे, द्वितीये च भागे रत्नत्रय-भोगकारिका-नादकारिका-मोक्षकारिका-परमोक्षनिरासकारिकाख्याश्च सव्याख्या ग्रन्थाः १९२५ई० वर्षे, वाणीविलासमुद्रणालये मुद्राप्याष्टप्रकरणनाम्ना प्रसिद्धिमानीताः। अत्र प्रथमचतुर्थ-षष्ठान् विहाय शिष्टाः सर्वे ग्रन्था सद्योज्योतिःशिवाचार्यप्रणीताः सन्ति। शिवदृष्टिकार-सोमानन्दतोऽपि प्राचीन एष आचार्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थेषु दृश्यते। अग्निपुराणादिषु सविशेषम्, अन्यत्रापि सेयं दृष्टिः सर्वत्र प्रोन्मीलिता। एतेन सिद्ध्यति यत् पुराणानां न केवलं वेदार्थोपबृंहकत्वम्, अपि त्वन्येऽपि विषया अत्र संकलिताः, ये हि वेदेषु नोपलभ्यन्ते। ते च बाहुल्येन तन्त्रागमीया इति नूनं पुराणानामागमानुवर्तित्वमिति को नामाऽत्र सन्देहस्यावसरोऽवशिष्यते।

उपपुराणेषु कृतभूरिपरिश्रमो डॉ० आर० सी० हाजरामहोदयः[१४] पुराणेषु तान्त्रिकप्रभावं चिन्तितवान्। स पाञ्चरात्रसंहिताः शैवागमांश्चात्रैवान्तर्भावयतीति तदुचितमेव, किन्तु तन्त्राणां ब्राह्मणविरोधित्वमवैदिकत्वं चेत्यादिप्रतिपादनं तत्कृतं नैवास्मभ्यं रोचते। भारतीये वाङ्मये विरोधपरिहारप्रवणायां समन्वयात्मिकायां दृष्टौ जागरूकायां तत्र ब्राह्मण-बौद्ध-जैनादयो विभागा भगवतो महाकालस्य कलनात्मिकां वृत्तिमेव सूचयन्ति। सर्वासामासां दृष्टीनां विस्तारकाः प्रायो ब्राह्मणा एव सन्ति। तेन केवलं वैदिकवाङ्मस्य कृते कृतो ब्राह्मणशब्दप्रयोगो भारतीये समाजे विद्वेषोत्पादक इव, संकोचोन्मीलक इव भवतीति साहित्येतिहासे भ्रान्तिभरितोऽयं शब्दः सर्वथा प्रयोगानर्हं इति विशेषतोऽवधेयोऽयं विषयो विपश्चिद्भिः।

बादरायणीये ब्रह्मसूत्रे तर्कपादे सांख्य-योग-पाञ्चरात्र-पाशुपतादिमतानामवैदिकत्वमुद्घोष्यते। महाभारते च शान्तिपर्वणि नारायणीयोपाख्याने—

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै॥ (३४९।६४)

इत्येवं सर्वेषां प्रामाण्यमूरीक्रियते। "स्वयं प्रमाणान्येतानि न हातव्यानि हेतुभिः" इति हि तत्रत्यस्योत्तरार्धस्य पाठान्तरं दृश्यते। कृतान्तपञ्चकस्यैतस्य प्रामाण्यप्रतिपादकानि भूयांसि वचांसि पुराणागमेषु धर्मशास्त्रटीकानिबन्धेषु च समुपलभ्यन्ते। महाभारते पूर्वोक्त एव प्रकरणे मतानामेषां प्रवक्तार एवं निर्दिष्टाः—

सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते।
हिरण्यगर्भो योगस्य वेत्ता नान्यः पुरातनः॥
अपान्तरतमाश्चैव वेदाचार्यः स उच्यते।
प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन॥
उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः।
उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः॥
पाञ्चरात्रस्य कृत्स्नस्य वेत्ता तु भगवान् स्वयम्।
(३४९।६५-६८) इति।

१४. स्टडीज इन दि पुराणिक रिकार्ड्स ऑन हिन्दू राइट्स एण्ड कस्टम्स (अ. ५, पृ. २६०-६४)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वेषामेषां मतानां प्रामाण्यं च तत्रैवं निर्दिश्यते—

सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते।
यथागमं यथाज्ञानं निष्ठा नारायणः प्रभुः॥
(३४९।६८-६९) इति।

भगवद्गीता च सांख्यं योगम् उपनिषदः पाञ्चरात्रं च सम्यग् व्याख्यातीति को नाम विद्वान् न जानीते। एकान्तभावोपपादकमेकायनं धर्ममेव प्राधान्येन प्रतिपादयति सेत्यपि केचन वदन्ति। शिवपुराणे[१५] श्रौतः स्वतन्त्रश्चेति द्विविधः शिवागमः प्रतिपाद्यते। तत्र श्रौतः शतकोटिप्रविस्तरः, यत्र पाशुपतं व्रतं ज्ञानं च वर्ण्यते। एवं च सांख्ययोगयोरिव पाञ्चरात्रपाशुपतमतयोरपि प्रामाण्ये न कश्चन विसंवादो महाभारतपुराणादिषु। पुराणेषु यथा केषाञ्चन मतानां मोहकत्वमुक्तम्, तथैव तत्र—"मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते" (पद्म० ६।२६३।७१) इत्यप्युच्यते। तेनार्थवादन्यायेन संगमनीयानि तादृशानि पुराणवचनानि। शाक्तागमेषु समुपबृंहिता भगवत्यास्त्रिपुरसुन्दर्याः श्रीचक्रस्य च वरिवस्या शाङ्करेषु मठेषु सबहुमानं प्रवर्तत इति जानन्त्येव मनीषिणः।

पाञ्चरात्रपाशुपतमतयोः प्राचीनताविषये डॉ० आर० जी० भाण्डारकर-डॉ० हेमचन्द्ररायचौधरीप्रभृतिभिर्विद्वद्भिर्विचारितम्। कृतान्तपञ्चकमुपजीव्यैव रामायणमहाभारतयोर्वर्तमानानां महापुराणानां च प्रवृत्तिः समजायतेति तत्र तत्र सिद्धान्तानामेषां समासेन व्यासेन चोपवर्णनदर्शनादङ्गीकर्तव्यम्। तेन ८०० ई० वर्षेभ्यः पूर्वं पुराणेषु तान्त्रिकः प्रभावो नैव दृश्यत इत्युक्तिर्नैव क्षोदक्षमा। न केवलं मन्त्रन्यास-अभिचारकर्म-यन्त्रमण्डपनिर्माणादय एव तान्त्रिका आगमिका वा विषयाः, यावत् पूर्वोद्धृतप्रतिष्ठालक्षणसारसमुच्चयवचनप्रामाण्येन प्रासादमूर्तिनिर्माणप्रतिष्ठादयो विषया इदम्प्रथमतया तत्रैव प्रतिपादिताः। दृश्यन्ते च त इमे विस्तरेण वर्णिता विविधेषु पुराणेषु। डॉ० हाजरामहोदयः स्वयमपि वराहादिपुराणनिर्दिष्टान् पाञ्चरात्रशैवागमान् तद्विषयांश्च निर्दिशति। साम्प्रतिका ऐतिहासिकास्तन्त्रागमशास्त्राणां प्रवृत्तिमष्टमशताब्दीपरवर्तिनीं साधयन्ति। तेषामेवात्र प्रभावः प्रतीयते।

कृष्णयजुर्वेदसंहितारण्यकयो रुद्रस्याघोरवामदेवादिपञ्चमुखानां भस्मोद्धूलनादिविधीनां च दृश्यते तादृगेव स्वरूपम्, यादृशं हि प्रतिपादितं पाशुपतसूत्रकारेण लकुलीशेन। स हि रुद्रस्याघोरादिस्वरूपपञ्चकप्रतिपादिकां पञ्चाध्यायीं प्रणीतवान्, तत्र प्रत्यध्यायं क्रमशः कार्य-कारण-योग-विधि-दुःखान्तांश्च दार्शनिकपद्धत्या व्याख्यातवान्। भाष्यकारः कौण्डिण्यस्तानि सूत्राणि व्याकरोति। लाकुलाः,

१५. वायुसंहितायाः पूर्वभागे (२३।११) द्रष्टव्यमेतत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मौसुलाः, कारुकाः, वैमलाश्चेति चतुर्विधाः पाशुपताः स्वच्छन्दादिशास्त्रेषु वर्ण्यन्ते, व्याख्यातारश्च तेषां स्वरूपं विशदयन्ति । लकुलीशशिष्यो मुसुलेन्द्रो हृदयप्रामाणाख्यं ग्रन्थं संदृब्धवानिति[16] रामकण्ठप्रामाण्येन प्रतीयते ।"श्रीलकुलीशशिष्येण मुसुलेन्द्रेण कारोहणस्थानावतीर्णेन चापरेण····क्षेमेशब्रह्मस्वामिप्राप्तिहेतुक्रियाबहुलाः स्वे स्वे शास्त्रे व्रतविशेषा उक्ताः" इति च[17] क्षेमराजो वक्ति । पाशुपताद्यागमनिर्दिष्टाः केचन विषयाः साम्प्रतिकैतिहासिकदृष्टया प्राचीने[18] वायुपुराणे समुपलभ्यन्ते। तेनाष्टमशताब्दीतः पूर्वं तन्त्रागमशास्त्राणां प्रवृत्तिर्नासीदिति[19] विकल्पप्रायमिदं वचः । अग्निपुराण-गरुडपुराणयोरिवान्येष्वपि पुराणेषु तन्त्रागमशास्त्रीयाणि प्रकरणानि समानानुपूर्वीमनुसरन्ति समुपलभ्येरन्नित्येतदर्थं प्रयतमानैरस्माभिर्भवितव्यम् । पौराणिका हि पुराणान्तरेभ्यः शास्त्रान्तरेभ्यो वा गृहीतानि प्रकरणान्यानुपूर्व्या केवलं संबोधनादिपदपरिवर्तनपुरस्सरं परिगृह्णन्तीति पूर्वमेवाग्निपुराणप्रामाण्येन प्रपञ्चितम् ।

इदमत्रावधेयम्—पुराणानि निगमागमोभयमूलकानीति सुनिश्चितम्, किन्तु तत्र निगमाख्याया वैदिक्या दृष्टेरेव प्राधान्यं दरीदृश्यते । तत्र हि वेदानां परमं प्रामाण्यम्, वर्णाश्रमव्यवस्थायाश्च सार्वात्म्येन स्वीकार इत्यत्र नास्ति संशीतिलवलेशोऽपि ।[20]

शैवागमा वैष्णवागमाश्च परस्परं विरोधमुखेन प्रवर्तन्ते । आगमीयोऽयं दोषः पुराणेषु न दृश्यते । पुराणेषु शैववैष्णवादिविभागे जागरूके सत्यपि सर्वत्राव्याहतं शिवनारायणयोरैक्यं प्रतिपाद्यते । पुराणानां सात्त्विकत्वादिविभागः—"रजोजुषे जन्मनि, सत्त्ववृत्तये स्थितौ, प्रजानां प्रलये तमःस्पृशे" इति कादम्बरीकारमहाकविबाणभणितिसरण्या व्याख्येयः । यथा एकमेव ब्रह्म कृत्यभेदेन समाख्याभेदमनुभवतीव, तथा पुराणान्यपि सात्त्विकादिविभागवन्ति भवन्ति । नात्राधरो-

१६. परमोक्षनिरासकारिकाव्याख्यानं (श्लो. ३) तस्य द्रष्टव्यम् ।

१७. स्वच्छन्दतन्त्रं (१०।११३४-३५) तद्व्याख्यानं चात्रावलोकनीयम् ।

१८. वर्णाश्रमकृतैर्धर्मैर्विपरीतं क्वचित् समम् ॥ श्रुत्यर्थैरध्यवसितं पशुपाशविमोक्षणम् । सर्वेषामाश्रमाणां तु मया पाशुपतं व्रतम् ॥ उत्पादितं शुभं दक्ष सर्वपापविमोक्षणम् । (३१।२९४-२९६) इत्यत्र पाशुपतव्रतस्य पशुपाशविमोचनपूर्वकपतित्वसम्पादत्वं वर्ण्यते ।

१९. "शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" (१।९) इति हि योगसूत्रे विकल्पलक्षणमुच्यते ।

२०. "नलिनीपत्रसंहत्यां सूक्ष्मसूच्यभिवेधने । दले दले तु यः कालः स कालो लववाचकः ॥" (१।२९) इत्येवं प्रपञ्चसारे लववाचकस्य सूक्ष्मतमस्य कालस्य लक्षणं वर्ण्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्ध्वीभावः कश्चित् । तेन वामन-वराह-कूर्मादिविष्ण्ववतारनामाङ्कितानि पुराणानि सात्त्विकानि, तत्र च विष्णोरेव महिमा गीयत इति प्रायोवादमात्रम् । एवं च कूर्मपुराणं पूर्वं वैष्णवमासीत्, अधुना तत्र शैवोपादानानां प्राबल्यं संजातमित्येवं-प्राया[21] उक्तयो नैवोचिताः प्रतीयन्ते । बृहन्नारदीये पूर्वभागे ६३ तमेऽध्याये पाशुपतं ज्ञानं वर्ण्यते, किन्तु तस्य प्रकरणस्योपक्रम एवं क्रियते—

श्रृणु नारद वक्ष्यामि तन्त्रं भागवतं तव ।
यज्ज्ञात्वाऽमलया भक्त्या साधयेद्विष्णुमव्ययम् ॥ (६३।१२)

अत्र पाशुपतं तन्त्रं भागवतनाम्ना, भगवान् शिवश्च विष्णुनाम्नाऽभिधीयते । शिवनारायणयोरैक्यप्रतिपादिका सैषा दृष्टिर्न केवलं कूर्मपुराणे, महाभारतादिष्वन्येषु पुराणेषु च सर्वत्राप्रतिहता विराजते ।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ (६।५।७४)

इत्येवं षड्भिरेभिर्गुणैरन्वितो भगवानित्युच्यते विष्णुपुराणे, व्यूहवासुदेवश्च पाञ्चरात्रागमेषु ।

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥ (१२।१३)

इति च माहेश्वरं षाड्गुण्यं वर्ण्यते वायुपुराणे । भक्तिस्तोत्रकारोऽवधूतसिद्धोऽपि गायति—

ऐश्वर्यमप्रतिहतं सहजो विरागस्तृप्तिर्निसर्गजनिता वशितेन्द्रियेषु ।
आत्यन्तिकं सुखमनावरणा च शक्तिर्ज्ञानं च सर्वविषयं भगवंस्तवैव ॥ इति ।

वैष्णव्यां शैव्यां च दृष्टौ समन्वयाधायकः काश्मीरक उत्पलवैष्णवः—"भेदः सर्वज्ञतादीनां ज्ञानादीनां च नास्त्यमी" (पृ० १०३) इत्यादिना स्पन्दप्रदीपिकायां शैवेषु सर्वज्ञतादिषु, वैष्णवेषु ज्ञानादिषु च गुणेषु सामञ्जस्यमुन्मीलयति । सेयं सामञ्जस्यापादिका दृष्टिः पुराणेष्वपि सर्वत्राव्याहता प्रसरतीत्यनुपदमेवोक्तम् । अस्यां स्थितौ पुराणेषु शैववैष्णवादिसम्प्रदायदृष्टीनामुद्भावनं बुद्धिविलसितप्रायमेव मन्तव्यम् ।

लाकुलादिशास्त्राणां[22] मोहकत्वमित्यत्र ब्रह्मसूत्रतर्कपादव्याख्यातॄणां

२१. डॉ० हाजरामहोदयः पूर्वोक्ते ग्रन्थे कूर्मपुराणविवरणप्रसङ्गे (पृ. ६४) प्रतिपादयत्येतत् ।

२२. "अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनानि तु । वेदवादविरुद्धानि मयैव कथितानि तु ॥ वामं पाशुपतं सोमं लाकुलं चैव भैरवम् ।" (२।२७।१४५-१४६) इत्यादिना कूर्मपुराणादिषु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभावः, मायावादमसच्छास्त्रमित्यत्र च दाक्षिणात्यानां वैष्णवानां प्रभावोऽन्वेषणीयः। मायावादस्यासच्छास्त्रत्वं नाद्याप्यूरीक्रियते, यद्यप्याधुनिकास्तत्र बौद्धदर्शनप्रभावं गवेषयन्ति। एवमेव पाञ्चरात्रपाशुपताद्यागमानां मोहकत्वं नाद्यापि केनाप्यङ्गीक्रियते, प्रत्युत तेषु तेषु पुराणेषु स्मृतिनिबन्धेषु च तत्रत्या विषया व्यूहवाद-षाड्गुण्यवादादयो विधिमुखेनैव वर्णिताः।

शैवशाक्ताद्यागमान्तर्गतानां कौलिकादिमतानां मोहकत्वं प्रत्युतावश्यमेवाङ्गीकार्यम्। सत्यं कौलमतप्रायं वज्रयानमारूढा बौद्धा मोहग्रस्ता भगवतो बुद्धस्योपदेशान् सर्वथा विस्मृत्य विलयं गता भारते वर्षे। "जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य महान् व्यतिक्रमः" (१।५।१५) इति भागवतीये पद्ये कौलिकेषु वज्रयानीयेषु च तन्त्रेषु प्रदर्शिता [२३]अर्घ्यनिष्पादनमुखा विधयः समालोचिता इव दृश्यन्ते। अत एव धर्मशास्त्रीयनिबन्धकारेण वल्लालसेनेन केषाञ्चन पुराणोपपुराणादीनामपि प्रामाण्यं श्रौते स्मार्ते च कर्मणि हेतुप्रदर्शनपुरस्सरं सर्वथा परिहृतम्।

एतेन सर्वेषां शाक्ततन्त्राणामप्रामाण्यमर्वाचीनत्वं वा न साधयितुं शक्यते। ब्रह्माण्डपुराणान्ते वर्तमानस्य ललितोपाख्यानस्य खिलभागत्वं भवतु नाम। मत्स्यपुराणे (१३।२६-५४) देवीभागवते च स्थलद्वये (७।३०।५५-८४; ७।३८।५-३१) स्थापिताऽष्टोत्तरशतपीठनामावली मध्यभागसंनिविष्टा नैव तथा कल्पयितुं शक्यते। मार्कण्डेयपुराणे[२४] देवीमाहात्म्यम्, कूर्मपुराणे च देव्या अष्टोत्तरसहस्रनामस्तोत्रं तदङ्गभूतमेव मन्तव्यम्। सप्तशतीपाठाङ्गतया स्वीकृतस्य कीलकस्तोत्रस्य विशुद्धज्ञानदेहायेत्याद्यः श्लोकः श्लोकवार्त्तिकस्य भट्टकुमारिलकृतस्य मङ्गलश्लोकतां धत्ते। "सर्वमङ्गलमाङ्गल्ये" (११।७) इत्यादिको दुर्गासप्तशतीश्लोकः ६०८ ई० वत्सराङ्किते दधिमती(मातृ)शिलालेखे "देवीं दधिमतीं विज्ञापयति" इत्युक्त्वा समुट्टङ्क्यते। षष्ठशताब्दीभवेन महाकविना सुबन्धुना[२५]वासवदत्तायाम्—"भिक्षुकीव तारानुरागरक्ताम्बरधारिणी भगवती सन्ध्या समदृश्यत" इत्येवं बौद्धानां देवी भगवती तारा स्मर्यते। उदयपुरस्थे पुरातत्त्वसंग्रहालये संरक्षिते

---

२३. उभयसामरस्यसमुत्थः कुण्डगोलकाख्यो द्रव्यविशेषोऽर्घ्यत्वेनात्र परिकल्प्यते (तन्त्रालोकविवेके, १५।१६६)। स्वयम्भुकुसुमादीनि चात्र पूजायामुपादीयन्ते। जुगुप्सितानि तान्येतानि कर्माणि।

२४. "अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः" (१।७४) इति दुर्गासप्तशतीपद्येऽर्धमात्राया अनुच्चार्यत्वमुच्यते। प्रणवादिपिण्डमन्त्रेषु स्थितानामर्धचन्द्रादिसमनान्तानां ध्वनीनामर्धमात्रात्मकत्वमनुच्चार्यत्वं च शैवशाक्तागमेष्वेव सविशेषं प्रतिपाद्यते। तेन तत्प्रतिपादकानां तन्त्राणां दुर्गासप्तशतीतः पूर्वं स्थितिरवश्यमेव स्वीकार्या।

२५. "दी कल्ट आफ तारा" (पृ० ७) इत्याख्यो ग्रन्थ एतदर्थं द्रष्टव्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९० ई० वर्षे समुत्कीर्णे उदयपुरमण्डलान्तर्गते 'छोटी सादड़ी'-स्थानसमीपवर्तिनि गिरौ चित्रकूट-(चित्तौड़)दुर्गं निकषा वर्तमाने भ्रमराम्बामन्दिरस्य गर्भगृहे स्थापिते[२६] शिलालेखे भगवती भ्रमराम्बा स्तूयते, या हि भ्रामरीति नाम्ना दुर्गासप्तशत्यां (११।५५) स्मृता। एवं च पुराणेषु शैवाः, वैष्णवाः, शाक्ताश्च आगमाः प्रायः प्रामाण्यमुखेनैवोपन्यस्ता इत्येव युक्तियुक्तं प्रतिभाति।

न चेदं पुराणरचनाकार्यं पाञ्चरात्र-पाशुपत-शाक्ताद्यागमानुयायिभिः कृतम्। वैदिके वाङ्मये परमश्रद्धालुभिरागमानुशीलनपरायणैरसाम्प्रदायिकैः पौराणिकैः स्मार्तधर्मप्रतिष्ठाप्रवणैः शिवनारायणयोरैक्यमित्येवंप्रायां समन्वयात्मिकां दृष्टिमुन्मीलयद्भिस्तदिदं महत्कार्यं सम्पादितम्। अत्र वायुपुराणस्य कानिचन वचनानि विशेषतोऽवधेयानि सन्ति—"पुराणं संप्रवक्ष्यामि ब्रह्मोक्तं वेदसंमितम्। धर्मार्थन्यायसंयुक्तैरागमैः सुविभूषितम्॥" (१।११) इति, "योगधर्मा बहुविधाः सांख्या भागवतास्तथा।....ब्राह्मं शैवं वैष्णवं च सौरं शाक्तं तथार्हतम्। षड् दर्शनानि चोक्तानि स्वभावनियतानि च॥" (१०४।१४,१६) इति, "नातः परतरं किञ्चिन्निगमागमयोरपि" (१०४।५४) इति च। वायुपुराणसदृशानां प्राचीनानां पुराणानामेभिर्वचनैस्तेषां निगमानुवर्तित्वमिव आगमानुसारित्वमपि नूनं सुतरां सिद्धयति॥

---

२६. शिलालेखस्य परिचयः 'एपिग्राफिया इण्डिका'–पत्रिकायाः ३० वर्षीये चतुर्थेऽङ्के १२०-१२७ पृष्ठेषु प्राप्तव्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आङ्गलभाषानिबद्धाना लेखानां संक्षेपा:

देवीपुराणोक्तं भारतीयकलाविवरणम्

DEVĪ PURĀṆA ON INDIAN ART

MANABENDU BANERJEE

देवीचरितं देवीपूजाविधानं चाधिकृत्य देवीपुराणं विरचितम्। शाक्तधर्म-विषये प्रमाणभूतमिदम्। देव्या घोरनामकस्य दैत्यस्य वधोऽत्र विशेषेणोपवर्णितः। उपपुराणमिदं चतुष्पादयुतम्। प्रतिपादं ये विषया स्त आदावेव उक्ताः। वस्तुतो द्वितीयपादोक्ता विषया एव प्रचलिते देवीपुराणे दृश्यन्ते, अतो गम्यते मूलभूतं देवीपुराणं बृहत्तरमासीदिति।

हाजरामहोदयेनास्योपपुराणस्य उत्तरा सीमा ८५० खीष्टीयाब्दमितेति निर्धारिता, पूर्वासीमा च खीष्टीयं षष्ठं शतकमिति। बहुभि र्निबन्धग्रन्थप्रणेतृभिरस्य वाक्यान्युद्धृतानि। उपपुराणमिदं भारतवर्षस्य पूर्वभागे विरचितम्, वङ्गदेशेऽस्य रचनाभूदिति संभाव्यते।

मूर्तिप्रासादादि-निर्माणविषये चारुकलाविषये च बहूक्तमस्मिन्नुपपुराणे; द्रष्टव्याः २–४–११–१२–२२–३५ तमा अध्यायाः। एषु चक्रदोला-धारायन्त्र-परिखा-घण्टा-चामर-ध्वज-इन्द्रध्वज-पटचित्रादीनामुल्लेखो दृश्यते, क्वचिदेतेषां स्वरूपविवरणपराणि विशेषणान्यपि दत्तानि।

मन्दिर-मूर्ति-निर्माणविषयेऽत्र बहूक्तम्। मन्दिरनिर्माण-मन्दिरप्रकारावधि-कृत्य विशिष्टानि कथनानि उपलभ्यन्ते; मन्दिरमूर्तिसंबद्धानि मानान्यपि चोक्तानि। तथैव दुर्ग-नगरनिर्माणादिविषयकाणि कथनानि बहुत्र दृश्यन्ते। देवीवाहनानां देवीधृतास्त्राणां च विशदं विवरणमपि प्रदत्तमत्र। देवीधृतालङ्काराणां विस्तरेण उल्लेखो दृश्यते। देव्या चतुःषष्टिराकाराः, तेषां विभागश्चात्र स्फुटमुक्ताः। गणेशस्य, मातृणां, विद्यानाम्, ऋतूनां, रुद्राणां च मूर्तीनां विवरणमपि क्वचिद् उपनिबद्धम्। मूर्त्युपादानभूतानां द्रव्याणामपि उल्लेखः पञ्चाशत्तमेऽध्याये दृश्यते।

जीर्ण-विध्वस्तानां मूर्तीनां मन्दिराणां च संस्कारः कथं विधेय इत्यप्यत्र दर्शितम्; मन्दिरेषु देवमूर्तयः कथं स्थाप्या इत्यपि विवृतम्। मन्दिरसंबद्धानाम् उद्यान-भित्तिचित्र-घटिकायन्त्रादीनामपि उल्लेखः क्वचित् समुपलभ्यते। अन्त-रान्तरा च भेरी-शङ्ख-मृदङ्गादीनां वाद्ययन्त्राणां नामानि दृश्यन्ते। मन्दिरसंबद्धं नर्तनं संगीतं च क्वचिदुल्लिखितम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यासंबद्धानि कानिचिद् वचनान्यप्युक्तानि। पुस्तकवाचनम्, शास्त्र-लेखनम्, ताडीपत्रनिर्माणम्, चर्माधारे पत्राणां स्थापनम्, पट्टिकाधारः, रज्जुबन्धनम् इत्येते विषया अत्र उक्ताः।

यवन-(मुसलमान)शासनात् प्राग् येषां प्रासाद-मन्दिरादीनां निर्माणं विहितम्, तेषां प्रायेण नाशः समजनि; अतो देवीपुराणोक्तरीतिमाश्रित्य ये प्रासादादयो निर्मिताः, तेषां दर्शनं दुर्लभमेव। पूर्वभारतवर्षीया भूमिरेव अस्या दुर्लभताया मुख्यो हेतुरिति विज्ञायते। मन्दिरादीनां ध्वंसो विद्वेषादिवशाद् मनुष्यैरपि कृत इत्यत्र न संशयलेशोऽपि।

बौद्धालयविषयकं नारदपुराणवचनम्

THE NĀRADA-PURĀṆA ON BAUDDHĀLAYA

SMT. KRISHA KANTI GOPAL

बौद्धालयपरकास्त्रयः श्लोका नारदीयपुराणे पठ्यन्ते (१।१५।५१–५३)। उक्तमत्र–महापद्यपि यो द्विजो बौद्धालयं विशेन्न तस्य निष्कृतिर्भवतीति; बौद्धाः खलु वेदविनिन्दकाः, पाषण्डिनश्च; अतस्ते द्विजैरवेक्षणानर्हाः, ज्ञानतोऽज्ञानतो वा बौद्धालयो न प्रवेष्टव्यो द्विजैः। ज्ञानतो यदि कश्चिद् द्विजो बौद्धालयं प्रविशेत्, नास्ति तस्य निष्कृतिरिति।

एतत्कथनस्य यत् तात्पर्यं तदैतिहासिकदृष्ट्या चिन्तनीयम्। बुद्ध-बौद्धधर्मविषये सर्वेषां पुराणानामैकमत्यं नास्ति। अस्यानैक्यस्य को हेतुरित्यपि विचार्यम्। किं च कथं वा बुद्धो विष्णोरवताररूपेणाभ्युपगतः, कया च दृष्ट्या बौद्धमतं पुराणेषु प्रतिपादितम्, बौद्धमतस्य प्रभावो वैदिकधर्मावलम्बिनां समाजे कीदृश आसीत्—इत्यपि विचार्यमेव।

हाजरामहोदयो विषयेऽस्मिन् वक्ति यद् बौद्धमतस्य पतनकाले बौद्धनिन्दा प्रवृत्तेति। मतमिदं न युक्तिसहम्। बौद्धमतोत्कर्षकाले बौद्धनिन्दा किमर्थं न कृता वैदिकधर्मपरैर्जनैरिति नोपपादयितुं शक्यते। अतो बौद्धमतनिन्दापराणि पुराणवचनानि अर्वाक्कालिकानीति हाजरामहोदयमतं न श्रद्धातुं योग्यम्। मौर्यशासनान्तिमकाले बौद्धमतनिन्दनप्रवृत्ति ब्राह्मणसमाजे संजातेति विज्ञायते। बौद्धनिन्दापरा दृष्टिः कुमारिल-शंकराचार्यकाले भृशमासीत्, ततः प्राचीने कालेऽपि तथैव; युवान् चुआङ्गमहोदयेनापि ईदृशी स्थितिः परिदृष्टेति प्रसिद्धमेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ख्रीष्टीयषष्ठशतकारम्भकाले बुद्धो न विष्णोरवतारस्वरूपेणाभ्युपगत इति हाजरामहोदयो बभाषे। पुराणे बुद्धोऽवतारस्वरूपेण स्वीकृतो, न पुनस्तस्य मतं प्रामाणिकत्वेनाभ्युपगतं पुराणेषु। विचित्रेयं दृष्टिः पुराणकाराणाम्। बौद्धमतं वेदविरोधीति, बौद्धा वेदविरोधिन इति च स्फुटमेवोक्तं पुराणेषु। एवं सत्यपि बोधितरुः पुराणे प्रशंसिता।

विषयमिमं विचारयद्भिरिदमपि चिन्तनीयम्—निन्दाव्यञ्जकः पाषण्डशब्दः कथं बौद्धान् प्रति प्रयुक्त इति (पाखण्डेति शब्दः पाषण्डस्थले क्वचिद् भ्रान्त्या प्रयुज्यते पुराणकारैः)। धर्मसंप्रदायविशेषवाचकरूपेण शब्दोऽयम् अशोकनृपशिला-लेखेषु प्रयुक्तः; नैषु शब्दोऽयं निन्दाभावं व्यनक्ति।

शब्दस्यास्य निर्वचनमज्ञातमेव। पार्षदशब्दाच् शब्दोऽयं निष्पन्न इति केचन मन्यन्ते। कौटलीयार्थशास्त्रे पाषण्डिशब्दोऽपि दृश्यते; पाषण्डानां परिच्छदादि-विषयेऽपि अर्थशास्त्रे बहूक्तम्; निन्द्यचण्डालादिभिः सह एषामुल्लेखोऽपि दृश्यतेऽत्र।

पाषण्डानां निन्दा मनुस्मृतावपि दृश्यते। इमे खलु वेदस्मृतिनिन्दका इति कुल्लूको बभाषे। अर्वाचीनेयं दृष्टिः टीकाकृतः। मन्ये पाषण्डशब्दस्य मूलभूतोऽर्थः 'अनभीष्टः पुरुषः' इति; अस्य वेदविरोधित्वरूपोऽर्थोऽर्वाक्कालिकः। पाषण्डैर्जनाः प्रभाविता न स्युरित्यतस्तेषां बहिर्निवासो विहित इति विज्ञायते।

पाषण्डानां स्वकीया सामाजिकी स्थितिरासीदिति प्रतीयते, अतस्ते पृथग्जनसंघरूपेण विज्ञाता अभवन्। कथमेभि र्व्यवहरणीयं राज्ञेति विशदमुक्तं याज्ञवल्क्येन।

पाषण्डेषु बौद्धा जैनाश्च मुख्यरूपेण गणिताः; संन्यासिनां सन्यासिनीनां च संघ एषु आसीत्। पृथक्भूतजनसंघविशेषवाचकरूपेण प्रयुक्तः पाषण्डेतिशब्दः कालान्तरे बौद्धजैनान् अभिलक्ष्य प्रयुक्त इति प्रतीयते। यद्यपि केषुचन पुराण-वचनेषु बुद्धस्य नाम पाषण्डैः सह न स्मृतः, तथापि एतद्वचनगतेन पाषण्डशब्देन बौद्धा अभिप्रेता इत्यत्र न संशयलेशोऽपि; कानिचन वाक्यानि पुनर्बुद्धं पाषण्डरूपेण वर्णयन्ति।

यतः कालान्तरे पाषाण्डकृतवैदिकधर्मविरोधः सुदृढो जातः, अतः पाषण्ड-शब्देन वेदविरोधि बौद्धमतं लक्षितम्। पाषण्डरूपं मतं येषु ते पाषण्डिन इत्यर्थकः पाषण्डिशब्दोऽपि पुराणेषु प्रयुक्तः। न केवलं बौद्धाः, अपि तु अन्येऽपि केचन वेदविरोधिनः पाषण्डशब्देनाभिहिताः। क्वचित् पुराणेषु पाषण्डशास्त्राणां नामानि कापालभैरवादीनि चोक्तानि।

नारदपुराणे यः पाषण्डिशब्दः प्रयुक्तः, स न संप्रदायविशेषवाची। शब्दो-यमत्र बौद्धसंप्रदायवाचक इति ऐतिहासिकदृष्ट्या निश्चीयते। नारदपुराणस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रचनाकालविषये नैकमत्यं विदुषाम्। नारदीयपुराण-पूर्वभागीयपञ्चदशाध्यायः (यत्र बौद्धालयप्रसंगो वर्तते) कदा विरचित इति विशेषतो विचार्यम्। हाजरा-महोदयमतेन कालोऽयं ख्री० ८७५–१००० इति, काणेमहोदयमतेन ख्री० ७००–१००० इति।

येयं बौद्धालयप्रवेशनिन्दा सा बौद्धस्पर्शस्य अशुचित्वात् कृतेति उपपद्यते। बौद्धालयो न खलु बौद्धगृहस्थजननिवासः, प्रत्युत बौद्धमठः। वैदिकजनदृष्ट्या बौद्धगृहस्थो नात्यन्तं निन्दाभाक्, बौद्धसंन्यासी पुनरतितरां निन्दाभाजनम्।

गुप्तराज्यकालादर्वाग् बौद्धमठेषु दुराचाराणां प्राबल्यं जातम्। बौद्धमठेषु पापाचारबाहुल्यं दृष्ट्वैव नारदपुराणकारेण बौद्धालय (= बौद्धमठ)–प्रवेशो निन्दितः, प्रतिषिद्धश्च। अतएव नारदपुराणीयस्यास्यध्यायस्य रचनाकालो यदि ७००–८५० मितः ख्रीष्टाब्दो निश्चितो भवेत्तर्हि सर्वं सुसमञ्जसं स्यादिति।

पुराणवर्णितः प्रकृतिलयः

PRAKṚTILYA IN THE PURĀṆAS

RAM SHANKAR BHATTACHARYA

ईशोपनिषद्गत-त्रयोदशमन्त्र-व्याख्यानप्रसंगे शंकराचार्येणोक्तम्—"यदुक्त मन्धंतमः प्रविशन्ति इति प्रकृतिलय इति च पौराणिकै रुच्यते" इति। प्रकृतिलय-रूपावस्था सांख्ययोगशास्त्रप्रतिपाद्येषु विषयेषु अन्यतमा। एवं सत्यपि प्रकृतिलय-प्रसंगे यतः शंकराचार्येण पौराणिकस्योल्लेखः कृतः, अतो गम्यते पुराणेषु प्रकृतिलयस्य विवरणं विशदमासीदिति। पुराणोक्तं प्रकृतिलयविवरणं निबन्धे-ऽस्मिन् संगृहीतम्।

प्रकृतिलयशब्दोऽर्थद्वये प्रयुक्तः—(१) प्रकृतौ लय इति; (२) प्रकृतौ लयो यस्य स इति च। अष्टौ प्रकृतयः—अव्यक्तम, महदहंकारौ पञ्च तन्मात्राणि चेति। एषु अन्यतमे योगिनो प्रबलवैराग्यपूर्वको यश्चित्तलयः स प्रकृतिलय इत्याख्यायते। प्रकृतिलयाः खलु बद्धपुरुषाः, न मुक्ताः, यद्यपि इमे कैवल्यपदमिव पदमनुभवन्ति। वैराग्यमिदं न योगशास्त्रीय-परवैराग्यम्; पुरुषतत्त्वज्ञानं नैषु योगिषु विद्यते; अतएव इमे चित्तलयभङ्गे सति पुनः संसरन्ति।

पुराणेषु पञ्चविधगतिवर्णन-प्रसंगे प्रकृतिलयरूपा गतिरुक्ता। वैराग्य-विवरणपरेषु पुराणवचनेष्वपि प्रकृतिलयस्य कथनमुपलभ्यते। प्रकृतिलयगतो यः प्राकृतनामको बन्धः, सोऽपि पुराणेषूक्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्येकं प्रकृतिलयानां कालपरिमाणमपि पुराणेषु कथितम्। केषुचिच्च पुराणश्लोकेषु प्रकृतिलयावस्थोपवर्णिता, यद्यपि प्रकृतिलयशब्दो नैतेषु प्रयुक्तः।

अनुशासनपर्वगत-प्रकृतिलय-प्रतिपादकस्य श्लोकस्य यः पाठः महाभारतस्य समीक्षात्मकसंस्करणेऽभ्युपगतः, स न सर्वथा समीचीन इत्यत्र प्रदर्शितम्।

निबन्धान्ते लेखकेनेदं चिन्तितं यत् प्राचीनतरेषु पुराणेषु (यानि आश्रित्य प्रचलितानि पुराणानि प्रणीतानि) प्रकृतिलयविषये पुष्कलं विवरणमासीत्। यतो विषयोऽयं न सर्वजनोपयोगी, चित्ताकर्षकश्च, अतोऽर्वाक्कालिकैः पुराणकारैः संक्षेपेणैवायं प्रतिपादितः। निर्बीजसमाध्यन्तर्गता खल्वियं प्रकृतिलयावस्था; समाधिरयं नैकपुराणवचनेषूक्तः।

पुराणप्रयुक्तशब्दार्थविषये पौराणिकमतविषये च आधुनिकानां विदुषां केचन प्रमादाः

A FEW PURĀṆIC PASSAGES AND VIEWS WRONGLY UNDERSTOOD BY MODERN SCHOLARS

RAM SHANKAR BHATTACHARYA

पुराणप्रयुक्तशब्दार्थव्याख्याने पुराणोक्तमतनिर्धारणे च आधुनिकानां विदुषां दृष्टिः क्वचित् भ्रान्तावलोक्यते। भ्रान्तदृष्टेः षड्विंशतिम् उदाहरणानि निबन्धेऽस्मिन् दर्शितानि। तथाहि—

(१) विलसन्महोदयेन 'मनोर्थानि प्रमाणानि' इत्येवंरूपं किमपि वायुपुराणवाक्यमुदाहृतम्; कथितं च यद् मनुसंहितायामेतद्वाक्यगतो विषयो नास्तीति। कथनमिदं भ्रान्तिविजृम्भितम् इत्यत्र प्रदर्शितम्, उपर्युक्तस्य वाक्यस्य समीचीनः पाठोऽपि दर्शितः।

(२) 'द्रुह्योः सुतास्तु वैभोजाः' इति महाभारतीयवाक्यमाश्रित्य विलसन्महोदयेनोक्तं यद् वैभोज इति जातिविशेषस्य नामधेयम्। मतमिदं प्रामादिकमिति, भोजेत्येव नामेति च प्रदर्शितम्।

(३) जडभरतो युगमात्रावलोकनं कुर्वन् ययौ (शिबिकावहन-काले) इति विष्णुपुराणीयवाक्ये युगशब्देन शिबिकास्थकाष्ठखण्डविशेषो गृहीतो विलसन्महोदयेन। अस्यार्थस्य सदोषता प्रदर्शिता, युगशब्दस्य समीचीनोऽर्थः (हस्तचतुष्कम्) चोक्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४) 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। भूम्यादेश्चैव संस्थानं पुराणं पञ्चलक्षणमि'ति कश्चिच् श्लोक उदाहृतो विलसनमहोदयेन पुराणलक्षणप्रस्तावे। संस्थानशब्देन नाशो लयो वार्थो ग्राह्य इत्युक्तं च। अस्यार्थस्यासंगतिः प्रदर्शिता, संगतार्थंतश्चोक्तः।

(५) वाय्वादि-पुराणेषु विश्रवसो मुनेरपत्यानि उक्तानि। वैश्रवणस्य कुबेरस्यापत्यानि रावण-कुम्भकर्ण-विभीषण-शूर्पणखाः—इत्येषु पुराणेषूक्तमिति पर्जिटर आह। मतमिदं पुराणश्लोकविरुद्धमित्यत्र प्रदर्शितम्; रावणदयः विश्रवसः अपत्यानीति पुराणवचनतः सिद्ध्यतीति निर्णीतम्।

(६) मार्कण्डेयपुराणे (१०।३१) किंपापफलसन्निभम् इति पठ्यते इति मत्वा पर्जिटरमहोदयेन श्लोकोऽनूदितः। पर्जिटरमतस्य सदोषताऽत्र दर्शिता, किंपाकरूपः समीचीनः पाठोऽपि दर्शितः।

(७) पातालकेतुदानववधप्रसंगे मार्कण्डेयपुराण उक्तम्—निर्दग्धाः कापिलं तेजः समासाद्येव सागराः (२१।८६) इति। सागरोऽत्र समुद्रार्थक इति पर्जिटरमहोदय आह। अर्थस्यास्य प्रामादिकत्वं प्रदर्शितम्, संगतार्थश्चोक्तः।

(८) मार्कण्डेयपुराणे पठ्यते—या मुक्तिहेतु रविचिन्त्यमहाव्रता त्व मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः (८४।८) इति। अत्रत्यस्य 'अभ्यस्यसे' इति पदस्यात्मनेपदित्वविषये पर्जिटरमहोदयेन यदुक्तं तस्य प्रामादिकत्वं दर्शितम्।

(९) कर्णस्य पालकपितुर्नाम नन्दन इति डेविज् महोदय आह। मतमिदं महाभारतवचनतो न सिध्यतीति, अधिरथ इत्येव पालकपितुर्नामेति च प्रदर्शितम्।

(१०) कूर्मपुराणे 'नाम्नामष्टसहस्रेण' इति पठ्यते (१।१२।१९६)। अष्टसहस्रशब्दस्य अष्ट सहस्राणीत्यर्थः कृतो विन्टर्निटज्-महोदयेन। अर्थस्यास्य प्रामादिकत्वं दर्शितम्, संगतार्थश्चोक्तः।

(११) देवीभागवते पठ्यते—धृतराष्ट्रस्य द्वे भार्ये गान्धारी सौबली तथा द्वितीया च तथा वैश्या' इति। अत्र धृतराष्ट्रस्य गान्धारी सौबली चेति द्वौ पत्न्यौ उक्तौ—इति हाजरामहोदय आह। मतस्यास्यासंगतिः प्रदर्शिता, समीचीनः श्लोकार्थश्चोक्तः।

(१२) भविष्यपुराणे पठ्यते—"अश्वत्थमेकं पिचुमर्दमेकं····पञ्चाम्रवापी नरकं न याति' इति। अस्य य आङ्ग्लानुवादः कृतः काणेमहोदयेन, सोऽतितरामशुद्ध इत्यत्र प्रदर्शितम्, संगतार्थश्चोक्तः।

(१३) अथर्ववेदीयानां पञ्चानां कल्पानां नामानि विष्णुधर्मोत्तर उक्तानि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थकल्पप्रतिपादकस्य पुराणवचनस्य या व्याख्या काणेमहोदयेन कृता, तस्या असंगतिरिह दर्शिता; संगतार्थश्च उक्तः।

(१४) मानमेयोदये पठ्यते—नलकूपमणिग्रीवौ आसतुर्यमलार्जुनौ इति। अत्र यमलनामकः, अर्जुननामकश्च द्वौ वृक्षौ अभिप्रेतौ—इति सूर्यनारायणशास्त्रि-कुनहनुराजमहोदयौ आहतुः। अर्थस्यास्यासंगतिर्दर्शिता; युग्मवाची यमलशब्द इति च निर्धारितम्।

(१५) अनुगीतायां गजसाह्वयेति कस्यचित् नगरीविशेषस्य नाम पठ्यते। गजसेति नगर्या नामेति तेलङ्गमहोदयेनोक्तम्। मतस्यास्य सदोषता प्रदर्शिता।

(१६-१७) प्रतिसंचरस्वरूपविषयकः, परमेश्वरकृतक्षोभस्वरूपविषयकश्च द्वौ श्लोकौ विष्णुपुराणे (१।२।१५) पठ्येते। अनयोर्यौ आङ्गलानुवादौ कृतौ सुरेन्द्रनाथदाशगुप्तमहोदयेन, तयोः सदोषताऽत्र प्रदर्शिता; न्याय्यश्चार्थ उपदर्शितः।

(१८) चन्द्रवंशीयः पूरुः खलु ययातेः पितेति वुड्समहोदयः, सुरेशचन्द्र-श्रीवास्तव्यश्च आहतुः। ययातिरेव पितेति पुराणमतमत्र प्रदर्शितम्।

(१९) नहुषपुत्रस्य ययातेः पत्नी गा-नाम्नीति दीक्षितारमहोदयस्य मतम्। वस्तुतः 'गो'-इत्येव नामेत्यत्र प्रदर्शितम्।

(२०) अस्मद्देशस्य यद् भारतेति नाम तद् भरतनृपमूलकम्। भरतोऽयं शकुन्तलापुत्र इति कर्मारकर-दबे-वैद्यमहोदया आहुः। पौराणिकदृष्ट्या स्वायंभुव-मनुवंशीयो भरत एव (न पुनः शकुन्तलापुत्रो भरतः) नाम्नोऽस्य हेतुरित्यत्र प्रति-पादितम्।

(२१) परीक्षिन्नन्दान्तरकालविषयकं वचनं महाभारतेऽस्ति—इति राधाकुमुद-मुखोपाध्यायमहोदयेनोक्तम्। वस्तुत एतादृशं वचनं न महाभारते, प्रत्युत पुराणेषू-पलभ्यते—इत्यत्र प्रतिपादितम्।

(२२) सामवेदीय-श्रीसूक्तस्वरूप-विषयेऽग्निपुराण उक्तम्—'श्रायन्तीयं तथा साम श्रीसूक्तं सामवेदके' इति। अस्य यत्तात्पर्यं शशिभूषणदासगुप्तमहोदयेनोक्तं तस्य सदोषतात्र दर्शिता, श्रीसूक्तस्य यथार्थं स्वरूपं चोक्तम्।

(२३) नाट्यशास्त्रकारस्य भरतमुनेर्नाम मत्स्यपुराण एव लभ्यते, नान्य-स्मिन् पुराणे—इति घोषमहोदयो वक्ति। स्कन्दपुराणेऽपि भरतस्य नाम गृहीत-मित्यत्र दर्शितम्।

(२४) पुराणमतानुसारेण पृथिवी सप्तद्वीपैर्विभक्ता, सर्वे इमे द्वीपा पुनर्नवधा विभक्ताः—इति मनोमोहनघोषमहोदयेनोक्तम्। सदोषमिदं कथनम्। पञ्चैव द्वीपाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तधा विभक्ताः, एकश्च नवधा, अपरश्च द्विधा—इत्येव पुराणेषूक्त मित्यत्र प्रतिपादितम् ।

(२५) रामायणे नन्दी वृषरूपेण वर्णित इति राधाकृष्णन्-महोदय आह । वस्तुतो न खलु रामायणे वृषरूपिणो नन्दिनो वर्णनमुपलभ्यते; पुराणे पुनर्लभ्यत इदं वर्णनमित्यत्र दर्शितम् ।

(२६) ईश्वरगीता–हरिगीता–व्यासगीता-शब्दैर्भगवद्गीता लक्ष्यते–इति परमेश्वर अय्यारमहोदय आह । मतमिदं न सर्वथा संगतम्, यतः कूर्मपुराणेऽपि ईश्वरगीता–व्यासगीतानामधेये द्वे प्रकरणे उपलभ्येते–इत्यत्रोक्तम् ।

इन्द्रवर्मसंबन्धि-'प्रसत्-कैन्डोल-डोम'-शिलालेखानुसारिणी जावादेशीय-ब्रह्माण्डपुराणविषयिणी टिप्पणी

A NOTE ON THE JAVANESE BRAHMĀNDA PURĀṆA IN THE LIGHT OF PRASAT KANDOL DOM INSCRIPTION OF INDRAVARMAN

SMT. ANAMIKA RAY

भारतीयेतिवृत्त-विचारक्षेत्रे 'प्रसत् कैन्डोल डोम'-शिलालेखस्य महत्ता डा० मजुमदारप्रभृतिभि रभ्युपगता । शिलालेखेऽस्मिन् ९७ श्लोकाः; एषु ४८ श्लोकाः संस्कृतभाषया, इतरे च कम्बूजदेशभाषया विरचिताः ।

शिलालेखेऽस्मिन् इन्द्रवर्मणो राज्ञः सेनावैभवं वर्णितम्; अनेन राज्ञा चीन-चम्पा-यवद्वीप-देशा विजिताः । अत्र शिवसोमाचार्यस्य बुद्धिवैभवमपि वर्णितम्; आचार्योऽयम् इन्द्रवर्मणो गुरुरिति श्लोककरथोम-शिलालेख उक्तम् । अस्मिन् शिलालेखे इन्द्रवज्रादिच्छन्दोभि विरचिताः १३० श्लोकाः, येषु पञ्च श्लोका शिवसोमाचार्यगुणवर्णनपराः (मूललेखे इमे श्लोका उद्धृताः) ।

तृतीये श्लोक उक्तम्-शंकरभगवतो बहूनि शास्त्राण्यधीतानि शिवसोमाचार्येण । शंकरोऽयं शंकराचार्य एवेति निश्चप्रचम् । पञ्चमे श्लोके तूक्तं यत् शिवसोमाचार्यः पुराण-महाभारत-शैवशास्त्र-व्याकरणेषु कृतभूरिपरिश्रमोऽभूत् । 'बील-कैन्टील' शिलालेखगते कस्मिंश्चिच् श्लोके शिवमन्दिरस्थितस्य कस्यचित् पुराणस्योल्लेखो दृश्यते, यस्य पाठो रामायणमहाभारतपाठेन सह क्रियते स्म ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिलालेखगतेषु श्लोकेषु पुराणेतिशब्द एव प्रयुक्तः, न पुनः पुराणविशेषस्य नाम गृहीतम् । इदं पुराणं ब्रह्माण्डाख्यम् इति केचन मन्यन्ते । दक्षिणपूर्व-एशियादेशे पुराणमिदं प्रसिद्धम् । ब्रह्माण्डपुराणस्यैवास्मिन् देशे कथं प्रसिद्धिर्जाता—इति न केनापि विचारितम् ।

अस्याः प्रसिद्धेर्यो हेतुः स दर्शितोऽस्मिन् निबन्धे । तथाहि—शङ्कराचार्येण शारीरके भाष्ये 'अतश्च संक्षेपमिमं श्रृणुध्वम्' इत्यादिकः कश्चिच् श्लोक उद्धृतः; श्लोकोऽयं ब्रह्माण्डपुराण एव अविकलरूपेण पठ्यते; वायुपुराणे तु एतत्सदृशः श्लोको दृश्यते; अन्येषु पुराणेषु तु नैव पठ्यतेऽयं श्लोकः । अतो गम्यते शङ्करेण ब्रह्माण्ड-पुराणादेवायं श्लोको गृहीतः । शङ्कराचार्याद् ब्रह्माण्डपुराणम् अधीतं शिवसोमा-चार्येण । यतोऽयमाचार्यः इन्द्रवर्मणो गुरुरासीत्, अतो ब्रह्माण्डपुराणस्य प्रवचनं यवद्वीपादिषु सुप्रचलितं जातम्—इत्यनुमीयते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वभारतीयकाशिराजन्यासस्य कार्यविवरणम्

(जुलाई-दिसम्बर १९८३)

(१) गरुडपुराणसम्बन्धिकार्यम्

गरुडपुराणय पाठसंवादकार्यं सम्यक् प्रचलति । अद्यावधि गरुडपुराणस्याचारकाण्डस्याधोनिर्दिष्टानां हस्तलेखानां पाठसंवादलेखनकार्यं पूर्णं जातम्:

रा १—रामनगरस्य सरस्वती भण्डार पुस्तकालस्य देवनागरी हस्तलेख:

रा २—सरस्वतीभण्डार पुस्तकालस्य देवनागरी हस्तलेख:

पू. १—पुण्यपत्तनस्थितस्य भण्डारकरप्राच्यविद्याशोधसंस्थानस्य देवनागरी हस्तलेख:

पू. २—भण्डारकरशोधसंस्थानस्य देवनागरीहस्तलेख:

जम्मू१—जम्मूनगरस्य रणवीरकेन्द्रीय संस्कृत संस्थानस्य देवनागरी हस्तलेख:

ने १—काठमाण्डूनगरस्य राष्ट्रीयाभिलेखागारस्य नेवारीलिपिहस्तलेख:

नेपाल १—पूर्वोक्तस्थानस्य २-२ संख्याक: देवनागरीलिपिहस्तलेख:

अधोनिर्दिष्टानां हस्तलेखानां पाठसंवादलेखनकार्यं प्रचलति । आशास्महे शीघ्रमेव एतेषां पाठसंवादलेखनकार्यं पूर्णतां गमिष्यति ।

१. जम्मू २—जम्मूनगरस्थस्य केन्द्रीय रणवीरसंस्कृतसंस्थानस्य ३८२० संख्याक: अपूर्ण: हस्तलेख:

२. ने २—काठमाण्डूनगरस्थस्य केन्द्रीयाभिलेखागारस्य नेवारीलिपि हस्तलेख:

३. ने ३—पूर्वोक्तस्थानस्य नेवारीलिपिहस्तलेख:

४. ने ४—पूर्वोक्तस्थानस्य नेवारीलिपि हस्तलेख:

५. बंगला १—जर्मन देशस्य टुबिन्गेन विश्वविद्यालयस्य बङ्गलिपिहस्तलेख:

गरुडपुराणस्य प्रेतकल्पाभिधस्य द्वितीयभागस्य पाठसंवादकार्यं कठिनं वर्तते, यतो ग्रन्थस्य त्रय: पाठसंप्रदाया वर्तन्ते । तथाहि—(१) पञ्चत्रिंशदध्यायात्मको जीवानन्दसंस्करणपाठ:; (२) ऊनपञ्चाशदध्यायात्मको वेंकटेश्वरपाठ; (३) षोडशाध्यायात्मको नौनिधिरामकृत: सारोद्धारपाठ: । अस्माभि: जीवानन्दपाठ: आधारत्वेनाङ्गीकृत: । अधोनिर्दिष्टानां हस्तलेखानां पाठसंवादकार्यं पूर्णं जातम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रा १—रामनगरस्थस्य सरस्वतीभण्डारपुस्तकालस्य देवनागरीलिपि हस्तलेखः

रा २—तत्रस्थस्य देवनागरीलिपि हस्तलेखः

पू १—भण्डारकरप्राच्यविद्याशोधसंस्थानस्य देवनागरीलिपि हस्तलेखः

नेपाल १—काठमाण्डूनगरस्थ झा राष्ट्रीयाभिलेखागारस्य देवनागरीलिपि हस्तलेखः

मिथिला १—गङ्गानाथ झा शोधसंस्थानस्य मैथिलीलिपि हस्तलेखः

गङ्गा १—पूर्वोक्तसंस्थानस्य देवनागरीलिपि हस्तलेखः

गरुडपुराणस्य ब्रह्मकाण्डमयस्तृतीयो भागः केवलं वेङ्कटेश्वरसंस्करणे एव मुद्रितो वर्तते। अस्य भागस्य अधोर्निर्दिष्टानां हस्तलेखानां पाठसंवादकार्यं पूर्णतां गतः—

१.—सरस्वतीभाण्डारपुस्तकालयस्य देवनागरीलिपिहस्तलेखः

२.—केन्द्रीय संस्कृतविद्यापीठ, जम्मू इत्यस्य देवनागरी हस्तलेखः

३.—तत्रत्यो देवनागरी हस्तलेखः

४.—मद्रास नगरस्थस्य अड्यारपुस्तकालयस्य देवनागरीलिपिहस्तलेखः

बङ्गलादेशस्थितढाकाविश्वविद्यालयस्य, कलकत्तास्थितस्य एशियाटिक-सोसाइटीसंस्थानस्य च केचन वंगलिपिलिखिताः हस्तलेखाः अपि पाठसंवादनार्थ-मागताः।

अद्यावधि दक्षिणभारतीयलिपिभिर्लिखितः कोऽपि हस्तलेखः नोपलब्धः। श्री बेनाजुलीमहाशयः हस्तलेखान्वेषणार्थं दक्षिणभारतं गतः। उत्कललिप्यामपि हस्तलेखो नोपलब्धः।

(२) शिधर्मपुराणं शिवधर्मोत्तरपुराणं च

शिवधर्म-शिवधर्मोत्तरपुराणयोः पाठसंवादकार्यं प्रचलतिः। एतयोः पुराणयोः प्रायेण हस्तलेखा देवनागरीलिपिलिखिता न वर्तन्ते, अतो देवनागरीलिपिहस्त-लेखानामवाप्तये प्रयत्यते। अनयोः पुराणयोः किमपि मुद्रितसंस्करणं न विद्यते, अतो हस्तलेखस्याधारेणाधारपाठो लिखितः।

(३) विष्णुसहस्रनामसंबन्धि कार्यम्

विष्णुसहस्रनामस्तोत्रस्य हस्तलेखानां, विशेषतो गरुड-स्कन्द-पद्मपुराणेषु पठितानां सहस्रनाम्नां हस्तलेखानामन्वेषणं क्रियमाणं वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४) स्वल्पमत्स्यपुराणकार्यम्

दशाधिकवर्षेभ्यः प्राग् अस्य संपादनं कीर्तिशेषैः डा० राघवन्महाभागैः प्रारब्धम्, किन्तु तेषां कार्यान्तरव्यापृतत्वात् एतत्कार्यं समाप्तिं न गतम्। एतत्संपादनं द्वयोर्हस्तलेखयोः आधारेण प्रारब्धमासीत् इण्डिया आफिस, लण्डन, पुस्तकालयस्य एको हस्तलेखः अपरश्च नालबारी संस्कृतकालेज (असम) इत्यस्य हस्तस्तलेखः। इदं निश्चितं यदिदमपूर्णं कार्यं समापनीयम्। एतदार्थं इण्डिया आफिस लण्डन पुस्कालयतः हस्तलेखस्य फोटोप्रतेः प्राप्तये प्रयासः क्रियते।

(५) 'पुराण' पत्रिकायाः सूची

विगताङ्के (जुलाई १९८३ अंके) 'पुराण'-पत्रिकायाः प्रकाशनस्य पञ्चविंशतिः वर्षाणि पूर्णानि, पञ्चविंशतिर्भागाश्च प्रकाशिताः। एतद्भागगतानां लेखानां लेखकानां च वर्गीकृता सूची प्रकाशनार्थं निर्मिता, यस्याः प्रकाशनं शीघ्रमेव भविष्यति।

(६) व्यासपूर्णिमासमारोहः पुराणगोष्ठी च

२३ जुलाई १९८३ दिनाङ्के शनिवासरे व्यासपूर्णिमोत्सवः न्यासस्य शिवालाभवते सम्पन्नो जातः। प्रथमं समागता विद्वासो नरनारायणेश्वरमन्दिरे शुक्लयजुर्वेदस्य पारायणं श्रुतवन्तः तदनन्तरमिमे विद्वांसः 'वारादरी' नामके स्थाने संभूय स्थिताः, यत्र तत्रभवतां काशिनरेशानां महाराज डा० विभूतिनारायण सिंह महाभागानां सभापतित्वे पुराणगोष्ठी संपन्ना। वैदिकवसन्तपूजा प्रथमं सम्पन्ना यत्र षोडशवैदिका वेदपारायणं कृतवन्तः। श्री गणेश्वर शास्त्रिद्राविड-महाभागः शतपथब्राह्मणस्यान्तिमकाण्डस्य (बृहदारण्यकोपनिषदः) पारायणं कृतवान्। महाराजकुमारः श्री अनन्तनारायणसिंहमहोदयो वैदिकेभ्यः दक्षिणामदात्। तदनन्तरं श्री हीरामणिमिश्रः व्यासवन्दनां मङ्गलाचरणं च व्यधात्। 'पुराणम्'-पत्रिकायाः संपादकः डा० रामशंकर भट्टाचार्यः न्यासाध्यक्षेभ्यः काशिनरेशेभ्यः पत्रिकाया व्यासाङ्कं समर्पितवान् तत्र प्रकाशितानां निबन्धानां वैशिष्ट्यं च प्रकाशितवान्। डा० गङ्गासागररायः न्यासस्य पुराणविभागस्य वार्षिकं कार्यविवरणं प्रदत्तवान्। उपस्थिविदुषां मध्ये आचार्य बलदेव उपाध्यायः, डा० रघुनाथसिंहः, डा० रेवाप्रसाद द्विवेदी, डा० बागीश शास्त्री, पण्डितगणेश्वर द्रविडः, श्री वैकुण्ठनाथ उपाध्यायश्च प्रमुखा आसन्। तत्र भवन्तः काशिनरेशा डा० विभूतिनारायणसिंहमहाभागा आगतविदुषः प्रति सहयोगार्थं धन्यवादान् प्रदत्तवन्तः निबन्धलेखनार्थं च आहूतवन्तः। प्रसादवितरणानन्तरं अल्पहारानन्तरं च गोष्ठी विसर्जिता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७) वेदपारायणम्

आषाढमासस्यशुक्लपक्षे न्यासस्य शिवालास्थिते नरनारायणेश्वरमन्दिरे संपूर्णशुक्लयजुर्वेदस्य संहितायाः पारायणं पण्डितविनायकबादलमहाभागेन कृतम्। श्री लक्ष्मीकान्तदीक्षित महाभागः श्रोता आसीत्। पारायणसमाप्तौ पारायणस्य कर्त्रे श्रोत्रे च दक्षिण प्रदत्ता।

(८) पुराणपाठः

(१) आषाढ़शुक्लपक्षस्य प्रतिपत्तिथिमारभ्य नवमीं तिथिं यावत् रामनगरस्थरत्नबागस्थिते बालात्रिपुरसुन्दरीमन्दिरे त्रिपुरारहस्यस्य पाठः श्रीरामजी मिश्रेण कृतः (२) श्रावणमासे रासलीलादिनेषु रामनगरस्थे प्रसिद्धोद्याने राधाकृष्णसहस्रनामस्तोत्रस्य पाठः श्रीकामदेव झा महोदयेन कृतः।

(९) पुराणविभागे अगता विद्वांसः

बहवोऽनुसंधित्सवोऽस्मिन् कार्याविधौ तेषां पुराणविषयकतत्संबधीतरविषयकाध्ययनार्थं पुराणविभागे आगता तेभ्योऽपेक्षिता सहायता च प्रदत्ता। अधोनिर्दिष्टाः सज्जना दर्शकपुस्तिकायां स्वमतानि लिखितवन्तः—

१. श्री अशोक सिंहलः—विश्वहिन्दूपरिषदः केन्द्रीयकर्यालयस्थः। सः लिखति—पुराणशोधस्याद्वितीयं कार्यं प्रारब्धम्। भगवान् एतत्कार्यं साफल्येन पूरयतु।

२. मि० डेविड किन्सले—हैमिल्टन, मैकमास्टरविश्वविद्यालय ओण्टारिओ (कनाडा) इत्यस्य धर्मविभागस्थः-१२.९.८३ दिनाङ्के। स लिखति—पुराणानां पाठसमीक्षितसंस्करणे किं कार्यं भवति अस्य प्रत्यक्षदर्शनमति प्रभावोत्पादकमस्ति। इदं परिश्रमसाध्यं महत्कार्यं प्रतीयते। अहं कार्यकर्तॄणां समर्पणभावस्योत्साहस्य च प्रशंसनं करोमि।

३. श्री के. चन्द्रमौलिः—इण्डियन आलमुनियम क० बेलगाँव, इत्यत्रत्यः—सत्यमेवास्मिन् विभागे चमत्कारि महत्कार्यं क्रियते। विविधग्रन्थानामाधारेण पुराणानां पाठसमीक्षितसंस्करणानां कार्यमतिकठिनं वर्तते यस्मिन् पर्याप्तद्रव्यस्यकालस्य, धैर्यस्य उपयोगिज्ञानस्य चापेक्षा वर्तते। इदमानन्दजनकं यद् बहवः पण्डिता अस्मिन् कार्ये स्वज्ञानस्य समयस्य शक्तेश्च उपयोगं कुर्वन्ति किन्तु इदं दुःखावहं यदस्य महत्त्वपूर्णस्य कार्यस्य शीघ्रतया समापनार्थम् अपेक्षितं धनं न लभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१०) रासलीला

विगतवर्षानुसारेण श्रावणमासे वृन्दावनीयरासमण्डल्या रामनगरस्थिते प्रसिद्धोद्याने रासलीलायाः प्रदर्शनं कृतम्। तत्रभवन्तः काशिनरेशा महाराजा डा० विभूतिनारायणसिंहमहोदया सपरिवारं प्रत्यहं रासलीलाया अवलोकनं कृतवन्तः। स्थानीयदर्शकाणां संख्या प्रतिदिनं विवर्धमाना आसीत्।

(११) रामलीला

अस्मित् वर्षे रामनगरस्था विश्रुता रामलीला २१ सितम्बर १९८३ दिनाङ्कमारभ्य २० अक्टूबर १९८३ दिनाङ्क यावत् सम्पन्ना। येभ्यः साधुभ्यः निःशुल्कं भोजनं प्रदत्तं प्रतिदिनं, तेषां संख्या प्रायेण सहस्रमिता आसीत्। प्रत्यहं 'नेमिनां' सहस्राधिक-दर्शकेभ्यो भिन्ना बहुसंख्यका वैदेशिका अपि रामलीलां दृष्टवन्तः।

१९८३ वर्षे रामलीलादर्शका विशिष्टा वैदेशिकाः

(१) प्रो जैक्स श्रेरर—पेरिस विश्वविद्यालयस्य मञ्चकला विभागस्य सदस्यः—एष महाभागो बहुवर्षाणि यावत् एशियामहाद्वीपे अफ्रिकाद्वीपे च पारम्परिकाभिनयस्यावलोकनं कृतवान्। स महाभागस्तत्र भवन्तं काशिनरेशं लिखितवान्— रामलीलाया अनुभवः सर्वातिशायी आसीत्; अस्य दर्शनानन्तरमाशास्महे फ्रेञ्चभाषायां अतिशोभनं विवरणं दास्याम इति। तस्यैव विश्वविद्यालयस्य अध्यापिका मैडम क्रिस्टाइन पेटरफ़ल्वी महाभागा शेररमहोदयस्य सहायिका आसीत्। एषा महाभागा हिन्दीभाषाया अध्ययनार्थं (येन रामलीलामवगन्तुं सौकर्यं भवेत्) कांश्चित् मासान् पूर्वमेव वाराणसीमागताऽऽसीत्। उभौ महाभागौ पूर्णं मासं यावत् रामलीलाया अवलोकनं कृतवन्तौ।

(२) मि० हेनरी केम्प ब्लेयर—चैपमैन कालेज, आरेंज, कैलिफोर्निया विश्वविद्यालयस्य परिसंवादविभागस्य सदस्यः—एष महाभागः दक्षिणपूर्वएशियाभागे रामायणस्याभिनयस्य अध्ययनं करोति। एष महाभागो वाराणस्यां सप्ताहं यावत् प्रतिदिनं रामलीलां दृष्टवान्।

(३) श्रीमती लिण्डा हेस—सैनफ्रांसिस्को, कैलिफोर्निया वास्तव्या—एषा महाभागा प्राध्यापक रिचार्ड सेचनर महाभागस्य निर्देशने साहाय्येन अध्ययनं कृतवती; तस्यैव साहाय्येन च रामनगरस्य रामलीला विषये कस्यचिद् विस्तृतग्रन्थस्य रचनां च करोति, यस्य प्रकाशनं शीघ्रमेव भविष्यति। एषा महाभागा पञ्चवर्षानन्तरमस्मिन् वर्षे रामलीलां दृष्टवती। एषा बहूनां ग्रन्थानां रचनायां संलग्नाऽस्ति; तेषु कस्मिंश्चित् पुस्तके रामलीलायाः संक्षिप्त विवरणं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भविष्यति। ग्रन्थोऽयं वैदेशिकछात्राणां दर्शकानां च कृते उपयोगी भविष्यति। अस्य ग्रन्थस्यावश्यकता तत्र भवद्भिः काशिनरेशैः प्रदर्शिता—ये खलु विद्वांसो हिन्दी भाषायाः सामान्यज्ञानं विनाऽपि रामलीलाया अध्ययनार्थमागच्छन्ति, तेषां कृते अयं ग्रन्थ उपयोगी भविष्यति।

(४) डा० कुमारी अनुराधाकपूर—नयी दिल्लीस्थितस्य नेशनल स्कूल आफ ड्रामा संस्थानस्य अध्यापिका—एषा महाभागा द्वयोः दिनयोः रामलीलां दृष्टवती। एषा स्वशोधनिबन्धस्य कृते रामलीलाया विस्तृतम् अध्ययनं कृतवती। एष शोधनिबन्धः इग्लैण्डस्थितस्य लीड्स विश्वविद्यालये उपाधिनिमित्तं समर्पितः।

सहयोगिन्यासानां कार्यविवरणम्

(१) महाराज बनारस विद्यामन्दिर न्यासः

(क) संग्रहालयः

अस्य संग्रहालयस्य प्रसिद्धिरनुदिनं वृद्धिंगता राजते। भारतीयदर्शकाणां वैदेशिकदर्शकाणां च संख्या विवर्धमाना लक्ष्यते। भारतीयतीर्थयात्रीनिव वैदेशिकपर्यटका अपि रामनगरमागन्तुं तत्र भवतां काशिनरेशानां च दर्शनं कर्तुं वाञ्छन्ति। विशिष्टागतेषु अधोनिर्दिष्टाः उल्लेख्याः--

(१) श्री सुनील के० रायः–राजदूतः—बी–९० डीफेन्स कालनी दिल्ली–२९-९-८३ दिनाङ्के। एष महाभागः स्वीयाभिप्रायमित्थं प्रकटयति—भारतीय-स्वर्णिमदिनानां परम्परायाश्च आश्चर्यावहं दृश्यं यस्य भाविपरम्परायाः कृते संरक्षणमावश्यकम्।

(२) महाराज श्री पृथ्वीराजसिंहः दान्ता (गुजरात) राज्यस्य–२–११–८३ दिनाङ्के।

(३) सर रावर्ट वेड-जेरी श्रीमती वेड-जेरी च–व्रिटिश राजदूतः—३१–१२–८३ दिनाङ्के—व्रिटिशराजदूतः स्वभावनामित्थं लिखति—"सुरुचिपूर्ण-रूपेण प्रदर्शितस्याद्वितीयस्य संग्रहस्य प्रभावोत्पादकं अवलोकनम्"।

(ख) वैदिकबालकवसन्तपूजा

१८-११-८३ दिनाङ्के महाराजकुमारस्य श्री अनन्तनारायणसिंहस्य वर्धापनावसरे ऊनषोडशवर्षीयाणां वैदिकबालकानां वसन्तपूजा रामनगरदुर्गस्थे देवीमन्दिरे सम्पन्ना। वैदिकबालकेभ्यो दक्षिणा भोजनं च प्रदत्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ग) चित्रकलाप्रतियोगिता

१८ नवम्बर १९८३ दिनाङ्के रामनगरविद्यालयानां बालकानां कृते चित्रकलाप्रतियोगिता संपन्ना। यस्यां ५२५ छात्राः समाविष्टाः। चित्राणां परीक्षणं काशिकहिन्दुविश्वविद्यालयस्य प्राध्यापकौ श्रीगज्जरमहाशयः श्रीकृष्णन् महाशयश्च कृतवन्तौ। विजेतृभ्यो बालकेभ्यः पुरस्काराः मिष्ठान्नं च प्रदत्तम्।

तस्मिन्नेव दिने स्थानिककुम्भकारैः विद्यामन्दिरसंग्रहालस्य भित्तौ चित्रनिर्माणं कृतम्। श्रीरघुनाथः विशिष्टपुरस्कारं प्राप्तवान्, होरीलालः, रामनारायणः, वलिरामश्च क्रमेण प्रथमद्वितीयतृतीया जाताः। अन्येभ्यः सान्त्वनापुरस्काराः प्रदत्ताः।

(२) महारानीकाशिनरेशधर्मकार्यनिधिः

अनेन न्यासेन १८-११-८३ दिनाङ्के स्थानिक-प्राथमिक-लघुमाध्यमिक विद्यालयानां छात्रेभ्यः मिष्ठान्नं वितरितम्। एतादृशानानां छात्राणां संख्या ५५९४ आसीत्। तस्मिन् एव दिने निर्धनबालकेभ्यः वस्त्रवितरणं जातम्। एतादृशानां बालकानां संख्या १६८१ आसीत्। अपरेद्युः चकियानगरसमीपस्थे वैराटस्थाने निर्धनबालकेभ्यो वस्त्रवितरणं मिष्ठान्नवितरणं च जातम्।

(३) महाराज प्रभुनारायणसिंह फिजिकलकल्चरन्यासः

अस्य न्यासस्याधीने १९-११-८३ दिनाङ्के स्वास्थ्यसुधारसंस्था मिसिर पोखरा, इत्यस्य प्रशिक्षणार्थिनः स्वकलायाः भारोत्तोलनादि विषयेषु प्रदर्शनं कृतवन्तः। अस्मिन् वर्गे श्रीदयारामः, श्रीप्रेममोहन बहलश्च मुख्यौ आस्ताम्। ते उत्तरप्रदेशीयधनुर्विद्याप्रतियोगितामपि सम्मिलिता आसन्। तेभ्यः ५०१) रुप्यकाणां पुरस्कारः भोजनं च प्रदत्तम्।

(४) महाराजकाशिराजधर्मकार्यनिधिः

अस्य न्या स्य संरक्षणे रामनगरे देशस्य विन्ध्याचल-प्रयाग-चकिया-कामरूपादिस्थानेषु च बर्षं यावत् बहूनि धार्मिकाणि, सांस्कृतिकानि च कृत्यानि प्रचलन्ति। धार्मिककृत्यातिरिक्तम् अनेन न्यासेन अधो निर्दिष्टानि शिक्षण-संस्थानान्यपि संचाल्यन्ते—

(क) महाराज बलवन्तसिंह महाविद्यालयः, गङ्गापुरस्थः—अस्य महाविद्यालयस्य स्थापना १९७३ वर्षे जाता। अस्मिन् महाविद्यालये गोरखपुरविश्वविद्यालयस्य स्नातककक्षायाः कलाविषयेषु अध्यापनं भवति। महाविद्यालयस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परीक्षाफलं शोभनमस्ति। बहवः छात्राः प्रथमश्रेण्याम् उच्चद्वितीयश्रेण्यां वा समुत्तीर्णा जाताः। छात्राणां संख्या शतकचतुष्टयादपि अधिका अस्ति। प्राचार्यसहितं शिक्षकाणां संख्या एकादश वर्तते।

(ख) महाराज मनसाराामविधिमहाविद्यालयः राजातालाब—अस्मिन् महाविद्यालये गोरखपुरविश्वविद्यालयस्य विधिस्नातककक्षाया अध्यापनं भवति। छात्राणां संख्या चतुःशतकादपि अधिकं वर्तते। परीक्षाफलं गोरखपुरविश्वविद्यालतस्य समग्रेषु विधिविद्यालयेषु उत्तममासीत्।

(ग) महारानी रामरत्नकुँवरि संस्कृत पाठशाला—एषा पाठशाला पञ्चाशद्वर्षादपि प्राक् स्थापिता जाता। एषु वर्षेषु सततं उत्तरमध्यमापर्यन्तमत्र अध्यापनं भवति। विद्यार्थिनः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य परीक्षायां समाविष्टा भवन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्कन्दपुराणस्य

मानसखण्डम्

१

स्वस्ति श्रीमहामङ्गलमूर्त्तये नमः ॥

ये देवाः सन्ति मेरौ वरकनकमये मन्दरे ये च वृक्षाः
पाताले ये भुजङ्गाः फणिमणिकिरणध्वस्तसर्वान्धकाराः।
कैलाशे स्त्रीविलासाः प्रमुदितहृदया ये च विद्याधराद्या-
स्ते मोक्षद्वारभूतं मुनिवरवचनं श्रोतुमायान्तु सर्वे ॥ १ ॥

रुद्राख्यानमिदं पवित्रमनघं श्रीमन्मृडान्यन्वितं
कृष्णस्यामितविक्रमस्य च यशः शृण्वन्तु धन्या जनाः।
देवाना(नां ?) भूवि(नि ?)वासिनामपि तथा तीर्थान्विताख्यायनं
श्रुत्वा ब्रह्मपदं प्रयान्ति विमलं संसेवितं योगिभिः ॥ २ ॥

नमस्कृत्या(त्य ?) महाभागं कृष्णं योगीश्वरं हरिम् ॥
धातारमृषिभिर्युक्तं शिवं देव्या समन्वितम् ॥ ३ ॥

जन्मे(नमे?)जयमहाप्राज्ञः कुरूणां कीर्तिवर्द्धनः ॥
श्रुत्वेतिहासयुक्तानि पुण्यानि चरितानि च ॥ ४ ॥

कृष्णस्यामितवीर्यस्य शिवस्य पद्मजस्य च ॥
पप्रच्छ सूत(तं?) धर्मात्मा शास्त्रतत्त्वार्थकोविदम् ॥ ५ ॥

जन्मे(नमे?)जय उवाच ॥

ऋषे सुमहदाख्यानं त्वया सर्वप्रकीर्तितम् ॥
पुराणानां च सर्वेषां मतं सर्वमुदाहृतम् ॥ ६ ॥

व्रतानां च फलं पुण्यं तीर्थस्थानफलं तथा ॥
देवानां दानवानां च गन्धर्वाप्सरसामपि ॥ ७ ॥

अत्यद्भुतानि कर्माणि त्वयोक्तानि द्विजोत्तम ॥
न तु भूमौ स्थितानां हि तीर्थानां संभवं मुने ॥ ८ ॥

धरायाः संभवं चापि स्थितिं चापि द्विजोत्तमः(म?) ॥
अधुना श्रोतुमिच्छामि कथयस्व तपोधनः(न ?) ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत उवाच ॥

ऋषिभिश्चापि यत्पृष्टो नैमिषारण्यवासिभिः ॥
द्वैपायनमहाभागस्तदहं कथयामि ते ॥ १० ॥

वसिष्टो(ष्ठो?) भगवानत्रिदु(र्दु?)र्वासाश्च तथाङ्गिराः ॥
मनुः पुलस्त्यः पुलहो रैभ्यो द्रोणकृपादयः ॥ ११ ॥

राजर्षयोपि राजेन्द्र देवाः सिद्धगणास्तथा ॥
सर्वशास्त्रार्थतत्त्वज्ञं पराशरसुतं सुधिम् ॥ १२ ॥

द्वैपायनो महाराज उपतस्थुर्महर्षयः ॥
महर्षीन् पूजयामास ऋषिः सत्यवतीसुतः ॥ १३ ॥

ते पूजिता महात्मान ऋषयो धर्मतत्पराः ॥
नारायणांशसंभूतं सत्यवत्याः सुतं सुधिम् ॥
द्वैपायनं महाराज पृ(प्र?)ष्टुमारेभिरे तदा ॥ १४ ॥

ऋषय ऊचुः ॥

कथितानि पुराणानि विचित्रचरितानि च ॥
तत्र व्रतानि चीर्णानि उद्धृतानि त्वयैव हि ॥ १५ ॥

अधुना श्रोतुमिच्छामि(मो?) धरायाः संभवं मुने ॥
तस्याः पुण्यां स्थितिं चापि कथयस्व तपोधन ॥ १६ ॥

सूत उवाच ॥

सद्वृतैः(त्तैः?)परि पृ[ष्टस्तु] स महात्मा तपोनिधिः ॥
विस्तरेण महाप्राज्ञः कथयामास तत्तदा ॥ १७ ॥

व्यास उवाच ॥

कथां विचित्रां बहुलां सर्वपापप्रणाशिनीम् ॥
श्रृण्वन्तु ऋषयः सर्वे कथ्यमाना मयाधुना ॥ १८ ॥

अव्ययं व्यक्तमेकं वै यं(य?)माहुर्मुनयः शुभाः ॥
स एव पुरुषो लोके विष्णुरित्यभिधीयते ॥ १९ ॥

तस्य कर्णौ(र्ण?) मलोद्भूतौ दैत्ये(ते)यौ मधुकैटभौ ॥
दृष्ट्वा सुप्तं जले विष्णुं शेषाङ्गे(ङ्के?) संस्थितं प्रभुम् ॥ २० ॥

अशु(सु?)रौ चातिकोपेन जात्या द्रविणबालिशौ ॥
ब्रह्माणं हन्तुमुत्तस्थौ नाभिपङ्कजवासिनम् ॥ २१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुत्तस्थौ तदा विष्णु ब्र(ब्रं ?)ह्मणा संस्तुतोपि सः ॥
दृष्ट्वा हि बलिनौ चोग्रौ दैतेयौ बलदर्पितौ ॥ २२ ॥

चक्रमुद्यम्य ताभ्यां वै युयुधे भगवान् हरिः ॥
दिव्यवर्षसहस्राणि बाहुप्रहरणेन वै ॥ २३ ॥

चक्रेणातिक्षुरप्रेण ततस्तौ निहतौ रणे ॥
निःसं(स ?)सार च तन्मेधं(दं ?)जलेव(?) जलवल्लभः ॥ २४ ॥

तयोस्तु मेदसा पुण्यां कथयामास मेदिनीम् ॥
कल्पयित्वाथ वसुधां धराधरसमन्विताम् ॥ २५ ॥

स्वपृष्ठभागे संस्थाप्य वसुधां कमठाकृतिः ॥
ततस्तस्मान्महाभाग प्रधानपुरुषेरितः ॥ २६ ॥

स तमाज्ञापयामास यं ब्रह्मेति वदन्ति ह ॥
स सृष्ट्यै संस्तु(?) भूतानां प्रभवायाभवाय च ॥ २७ ॥

आज्ञापितो भगवता ससर्ज विविधान्प्रजान् ॥
वारोण्येव ससर्जादौ वीर्यताशु(?) सृजं पुनः ॥ २८ ॥

ततोदके स्वयं ब्रह्मा ससर्ज सकलां महीम् ॥
दिवमूर्द्धं च कृत्वाथ तन्मध्ये खमिति श्रुतम् ॥ २९ ॥

सृष्ट्वावनीं नवविधां दिशश्च दशधा सृजत् ॥
मनोवाक्कालकर्मादीन् कामक्रोधादिकानपि ॥ ३० ॥

ससर्ज सृष्टिरूपांश्च तथा सप्त प्रजापतीन् ॥
मरीचिप्रमुखान्पुण्यां(ण्यान्) रोषोद्भूतं शिवं तथा ॥ ३१ ॥

ततो विष्णुश्च ब्रह्मा च शिवश्चैव तपोधनाः ॥
सात्व(त्वि ?)की राजसी चैव तामसी प्रकृय.(?) स्मृताः ॥ ३२ ॥

तां तां निजहिते युक्तां सृष्टिसंहारकारिणीम् ॥
दध्रिरे लोकविभवो ब्रह्मविष्णुशिवादयः ॥ ३३ ॥

मरीचिरिति यः ख्यातः प्रथमो यः प्रजापतिः ॥
तत्सुतः कश्यपः श्चा(पश्चा?)भूद्गोत्रान्वयविवर्द्धनः ॥ ३४ ॥

पाणि गृहीत्वा कन्यानां दक्षस्य च प्रजापतेः ॥
देवानां दानवानां च स यक्षोरगरक्षसाम् ॥ ३५ ॥

गन्धर्वाप्सरसां चैव नागानां पक्षिणां तथा ॥
वृक्षाणां दनुजानां च तथान्येषां तपोधना(नाः?) ॥ ३६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वंशानुत्पादयामास कस्य(श्य)पाख्यः प्रजापतिः ॥
तथान्ये ये महाभागाः प्रजानां पतयः स्मृताः ॥ ३७ ॥

ऋषीणां मानवानां च नृपाणां च तपोधनाः ॥
वंशानुत्पादयामासुर्मैथुनेनैव भारतः(त?) ॥ ३८ ॥

तत्र पुण्या महात्मानो ऋषयो धर्मतत्पराः ॥
अष्टाविंशसहस्राख्या गोत्रान्वयविवर्धनाः ॥ ३९ ॥

संभृ(भू?)तास्ते महाभागा सृष्टिनिर्देशकारकाः ॥
तत्सर्वं विदितं विप्रा भवद्भिर्नात्र संशयः ॥ ४० ॥

तत्रापि गोत्रसंभूतो नाम्ना तुङ्गप्रजापतिः ॥
तस्य वंशे समुत्पन्नः पृथुर्नामा बभूव ह ॥ ४१ ॥

यं वदन्ति महात्मानो वेणुमन्थानसंभवम् ॥
तं पृथुं हि प्रजाः सर्वे राजानं चारुदर्शनम् ॥ ४२ ॥

शरण्यं शरणं जग्मुः पोषयस्वेति वादिनः ॥
ततो जनहितार्थाय गोरूपामवनीं हि सः ॥ ४३ ॥

दुदोह सकलां पृथ्वीं तेन खिन्नाभवन्मही ॥
॥ इति श्रीस्कन्दपुराणे मानसखण्डे प्रथः (प्रथमः (?)) ॥ १ ॥

२

ऋषय ऊचुः ॥

कथं खिन्नाभवत्पृथ्वी दोहिता केन हेतुना ॥
प्रजाः सर्वा महाभाग शरणं केन हेतुनाः(ना?) ॥ १ ॥

संप्राप्तास्चापि तत्रैव कथं वै पालिता हि ते ॥
एतत्सर्वं महाभाग कथयस्व यथोचितम् ॥ २ ॥

व्यास उवाच ॥

पृथुर्नामा नरेन्द्रोभूद्वेण्वन्वयविवर्द्धनः ॥
तस्मिन्वै जातमात्रं(त्रे?) तु प्रजाः सर्वे समुत्सुकाः ॥ ३ ॥

नृपासनं गतं तं तु हृष्टास्ते जातकौतुकाः ॥
एष नो वृत्तिदो राजा भविष्यति न संशयः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति मीमांशमाना वै लोकास्तं शरणं ययुः ॥
बद्धाञ्जलिपुटाः सर्वे राजानं चारुदर्शनम् ॥ ५ ॥

वास्पगद्गदया वाचा तुष्टुवुः(वु?) स्ते नराधिपम् ॥
त्राहि त्राहि महाराज वेण्वन्वयविवर्द्धन ॥ ६ ॥

वृत्तिहीनान् महाराज पक्षिहीनान् खगामि(नि?)व ॥
इति संभाषमाणान् तान् स्वयमेव जनाधिपः ॥ ७ ॥

उवाच वदतां श्रेष्ठो वाचा चामृतपूर्वया ॥

पृथुरू(रु?)वाच ॥

सर्वे यूयं महाभागाः प्रार्थयन्ते हि मां पुनः ॥ ८ ॥

केनात्महेतुना प्राप्ताः कथ्यतां करवामि किम् ॥

व्यास उवाच ॥

इति तस्य वचः श्रुत्वा जनाःस्ते(नास्ते?) हर्षमानसा[:] ॥ ९ ॥
प्रत्यूचुस्तं महाभागं भूमिपं भूमिवल्लभम् ॥

जना ऊचुः ॥

धात्रा विरचिता ध्वा(?)स्मान्वयं हि पुत्रका यथा ॥ १० ॥

नास्माकं परमा वृत्तिस्तेन निर्देशिता विभो ॥
त्वं हि पुण्यैश्च ऋषिभिर्मथितः प्रार्थितोप्यसि ॥ ११ ॥

वृत्तिदः सैव सर्वेषा(षां?) नान्ये(न्यो?)स्ति भुवनस्थले ॥
तैरेव श्चो(चो?)पदिष्टा स्म गम्यतां शरणं पृथो[:] ॥ १२ ॥

तेषां हि वचनं प्राप्य देवा गुरू(रु?)गिरं यथा ॥
वृत्तिदो भव राजर्षे त्वां वयं शरणं गताः ॥ १३ ॥

वृत्तिहीनैः क्षणमपि न स्थातुमिह शक्यते ॥
नास्मानवति राजर्षे धरा शैलवनान्विताः(ता?) ॥ १४ ॥

शासयित्वा धरा(रां?) पुण्यां रक्षस्व मनुजाधिप ॥

व्यास उवाच ॥

इति तेषां वचः श्रुत्वा पृथुर्वैण्यः प्रजा(ता?)पवान् ॥ १५ ॥

उत्थाय सकलां पृथ्वीं धनुष्कोट्या प्रतापवान् ॥
उत्खातं(?) भूतलं दृष्ट्वा वसुधा प्राद्रवद् रुषा ॥ १६ ॥

ततः स्तां(तस्तां?) निसृतां ज्ञात्वा चौरानिव गृहेश्वरः ॥
अवनीं हन्तुमुत्तस्थौ पाकशासनविक्रमः ॥ १७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततस्तां गोस्वरूपेण धावन्तीं स ददर्श ह ॥
तामन्वधावद्राजर्षि[:] खड्गचर्मधरः स्वयम् ॥ १८ ॥

संगत्यु(त्य?) भुवनान्सर्वान् न प्राप्य शरणं हि सा ॥
ततस्तमेव राजानं प्रत्यपद्यत सा मही ॥ १९ ॥

तमुवाच तदा देवि(वी?) न स्त्रीवधमिहार्हसी(सि?) ॥
उपायं कुरु राजर्षे तेन त्वं सिद्धिमाप्नु हि ॥ २० ॥

मया विना प्रजान् सर्वान् कथं त्वं स्थापयिष्यसि ॥
उत्सारय गिरीन्सर्वान्त्वदर्थं त्याजयाम्यहम्(?) ॥ २१ ॥

दुहितृत्वं गमिष्यामि ततस्ते क्षितिवल्लभं(भ?) ॥

व्यास उवाच ॥

इतीरितां चापि गिरां महात्मा श्रुत्वा धरायाः सकलां महीपतिः ॥ २२ ॥
प्रगृह्य पाणौ सशरासनं शुभमुत्खातयामास गिरीन् समस्तान् ॥
ततोवनीं तां सकलां क्षितोश्वर च(श्च?)कार थालीमिव भूतलस्थितान् ॥२३॥

समां स चक्रे विसमां महीधरैः संसाधितं योगिभि[:]सन्मनो यथा ॥
कृत्वावनीं समां राजा विन्ध्यहेमाद्रिमध्यगाम् ॥

आज्ञापयामास तदा सर्वांल्लोका(कान्?) जनेश्वरः ॥ २४ ॥
क्रियतां हि गृहारम्भो पुरीणामपि मानवाः ॥ २५ ॥
स्थीयतां वर्षपर्यन्तं पुष्पमूलफलाशिभिः ॥
ततोपायं करिष्यामि भवतां नात्र शंसयः ॥ २६ ॥
येनोपायेन जोव्यन्ते जीवास्तु भुवनस्थले ॥

व्यास उवाच ॥

इति राज्ञा समादिष्टा जनाः सर्वे द्विजोत्तमाः ॥ २७ ॥
ग्रामाश्च नगराश्चैव चक्रुस्ते वै महोत्सवम् ॥
निवासभूता सा देवि(वी?) लोकानां क्षेमकारिणी ॥ २८ ॥
कथितं हि महाभागाः पृथोर्वैण्यस्य चानघः(घाः?) ॥
यथा तेन सुपुण्येन शाशि(सि ?)ता सा वसुंधरा ॥ २९ ॥

॥ इति श्रीमानसखण्डे द्वितीयः ॥ २ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३

सूत उवाच ॥

पुनरेव महाराज व्यासः सत्यवतीसुतः ॥
तानुवाच स धर्मात्मा प्रणतान् मुनिसत्तमान् ॥ १ ॥

व्यास उवाच ॥

पुनरेव स राजर्षि[:] पृथुर्वैण्यः प्रतापवान् ॥
लोकान् कृच्छ्रगतान्ज्ञात्वा कन्दमूलाशनान् नृपः ॥ २ ॥

पालयन् स्वां प्रतिज्ञा वै चिन्तयन् लोकपोषणम् ॥
वत्सं तु कल्पयित्वा वै मनुं स्वायंभुवं प्रभो ॥ ३ ॥

दुदोह पृथिवीं वैण्यः स्वैर्वाणै[:] स्वेन पाणिना ॥
तत्र जातानि शस्यानि बहूनि मुनिसत्तमा[:] ॥ ४ ॥

तेनान्नेन प्रजाः सर्वे पुपुषुः स्ववपूंसि ते ॥

ततः प्रभृति विप्रेन्द्रा[:] सा मही सस्यदाभवत् ॥
निवासभूता पुण्यानां कर्मभूरिति सा स्मृता ॥ ६ ॥

ततोपदिष्टां तां पुण्यां वसुधां वसुधाधिपः ॥
दुदुहुर्देवता[:] सर्वे तथा दैत्या महोरगाः ॥ ७ ॥

यक्षाः पिशाचा नागाश्च सिद्धविद्याधरादयः ॥
पर्वताः पितरश्चैव दुदुहुर्वसुधां नृपः ॥ ८ ॥

कल्पयित्वा पृथक् वत्सं जगृहुस्ते पृथक् वसुम् ॥
दुग्धा सा वसुधां(धा?) देवी खिन्नरूपाभवत् प्रभो ॥ ९ ॥

क्वचित्सा पर्वतगणैःराक्राता मुनिसत्तमाः ॥
ना(न?)गानां बहुभारेण पीडिता वरवर्णिनी ॥ १० ॥

क्वचिद्राजर्षिभिः पुण्यै [.] पृथग्वंशोद्भवैरपि ॥
विशद्भिरवनीभागं क्रान्ता सा कलिकारिभिः ॥ ११ ॥

क्वचिद्धि पर्वतगणैश्चारूढा तुङ्गतां गताः ॥
क्वचित्सभा(मा ?)भवद्देवी था(स्था ?)लीव शिल्पिनिर्मिता ॥ १२ ॥

क्वचिनिम्नाभवत्पुण्या पुण्यर्षिगणसेविता ॥
हृतस्वा लोकवशगा खिन्ना खिन्नेव कामिनी ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मभावं परित्यज्य चलमाना इतस्ततः ॥
मज्जयामि जले पुण्ये चिन्त्यमाना मुहुर्मुहुः ॥ १४ ॥

गौर्भूत्वाश्रुमुखी देवी पद्मजस्यान्तिकं ययौ ॥
प्रणम्य सा यथान्यायं स्रष्टारं लोकवन्दितम् ॥ १५ ॥

उवाच मधुरया वाचा ब्रह्माणं मा वसुंधरा ॥
देवदेव जगद्धातस्त्वामहं शरणं गता ॥ १६ ॥

त्वमेव स्रष्टा लोकानां त्वमेव परमा गतिः ॥
धाता चैव विधाता च त्वमेवासि पितामह ॥ १७ ॥

त्वया स्र(सृ?)ष्टास्मि लोकेश प्रजानां हितकाम्यया ॥
त्वयैव स्थापिता चास्मि त्वयैत्र निश्चला कृताः(ता ?) ॥ १८ ॥

अधुना राजशार्दूलैः खेदिता चास्मि वै प्रभो ॥
तथा देवैश्च दैतेयै ग(र्ग ?)न्धर्वोरगराक्षसैः ॥ १९ ॥

हृतस्वा हृतसंकल्पा कृतास्मि परमेश्वर ॥
गिरीणामपि भारेण दुःसहेनैव चैकतः ॥ २० ॥

नतास्मि देवदेवेश रक्षस्व त्वं जगत्पतेः ॥
विलेखितास्मि वैण्येन तध्वी(न्वी ?)भूतास्मि चैकतः ॥ २१ ॥

यद्विहीना क्षणमपि भवद्भिः परमेश्वरः(र ?) ॥
न शक्नोमि क्षणं स्थातुं रक्ष रक्ष प्रजापते ॥ २२ ॥

व्यास उवाच ॥

इत्याकर्ण्य ततो ब्रह्मा धरायाः समुदीरितम् ॥
नोवाच वदतां श्रेष्ठस्तथा विज्ञापितोपि सः ॥ २३ ॥

ततोत्थित्वा स्वयं ब्रह्मा ब्रह्मर्षिगणसंवृतः ॥
जगाम धरया सार्धं यत्र तौ संस्थितौ शिवौ ॥ २४ ॥

एकासनगतौ ते(तौ ?) तु दृष्ट्वा देवौ शिवाच्युतौ ॥
ननाम स तदा ब्रह्मा चतुर्मुकुटकोटिभिः ॥ २५ ॥

तुष्टाव स विभुं शान्तं प्रभविष्णुं महेश्वरम् ॥ २६ ॥

ब्रह्मोवाच

नमो नमस्ते परमेश्वराय देवाय देवेन्द्रनिषेविताय:(य?) ॥
अज्ञातमार्गाय महाभुजाय नमो नमस्ते धरणीधराय ॥ २७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवादिभिर्योगिभिरप्यगम्यो यद्गीयसे योगिभियो(र्यो?)गगम्यः ॥
तस्मै नमस्ते पुरुषोत्तमाय शिवान्वितायामितविक्रमाय ॥ २८ ॥

सोहं धरा चापि मया सह प्रभो तवान्तिकं पुण्यतमं सुशोभना ॥
आज्ञापयैना(नां?) कमलापते प्रभो विभर्षि लोकानपि पुण्यदान्विभो ॥२९॥

व्यास उवाच ॥

इति धातुर्गिरं श्रुत्वा धरा वाष्पोन्मुखी शुभा ॥
तुष्टाव तं मधुरया गिरा चामृतपूर्वयाः(या ?) ॥ ३० ॥

धरोवाच ॥

नमस्ते देवदेवेश शङ्खचक्रगदाधरः(र ?) ॥
पद्मपाणे नमस्तेषु(स्तु ?) पद्मनाभ नमोस्तु ते ॥ ३१ ॥

अनादिमध्यनिधन सृष्टिस्थित्यन्तकारिणे ॥
योगीशाय नमस्तेषु(स्तु?) शेषावासाय ते नमः ॥ ३२ ॥

प्रलयाब्धिनिवासाय मृकण्डुतनयेन च ॥
संस्तुतायादिदेवाय महामत्स्याय ते नमः ॥ ३३ ॥

दीर्घपृष्ठ कठोराय धराभारसहाय च ॥
अनन्ताद्भुतपादाय कमठाय नमो नमः ॥ ३४ ॥

अत्यद्भुतस्वरूपाय करालवदनाय च ॥ ३५ ॥

नखैर्दारितदैत्याय नृसिंहाय नमो नमः ॥
तुङ्गें(ण्डे ?)नोधृतगोत्राय विषाणविभवाय च ॥ ३६ ॥

धरोद्धरणदेहाय वराहाय नमो नमः ॥
बलेरद्भुतवीर्य्यस्य यज्ञान्तद्विजरूपिणे ॥ ३७ ॥

अत्यद्भुताकृतिकृते वामनाय नमो नमः ॥
दृप्तक्षत्रविनाशाय द्विजरूपधराय च ॥ ३८ ॥

जामदग्न्याय रामाय नमस्ते क्षत्रनाशिने ॥
पौलस्त्याऽन्वितवीर्य्यस्य श्री(श्रि?)योन्मत्तस्य चानघ ॥ ३९ ॥

बहुकन्दरनाशाय रघूणां पतये नमः ॥

यमुना कर्षिता येन येन नागाह्वयस्तथा ॥
तस्मै नमोस्तु रामाय वसुदेवसुताय च ॥ ४० ॥

निर्जिता येन चैकेन दैत्यदानवमानवाः ॥
तस्मै नमोस्तु देवाय वसुदेवसुताय च ॥ ४१ ॥

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पवित्रीकृतलोकाय　दर्शिताय　वधाय　च ॥
निर्दिष्टबुद्धमार्गाय　बौद्धरूपाय　ते　नमः ॥ ४२ ॥

आत्मरूपं समास्थाय भूत्वा चाशि(सि ?)धरः स्वयम् ॥
म्लेछ(च्छ?)हन्त्रे　नमस्तुभ्यं　कल्किरूपधराय　च ॥ ४३ ॥

त्वामेव लोकां(काः?) किल सृष्टिकाले धातारमेकं पुरुषं वदन्ति ॥
स्थितौ हि पुण्या ऋषयः समस्ता वदन्ति सर्वे भुवि विष्णुरूपम् ॥ ४४ ॥

त्वमेव चान्ते　प्रलयावसाने हरेरितो लोकपथेषु　गीयसे ॥
त्रि(त्रि?)भि[ः]स्वरूपैस्त्रिभिरेव जातो मां पाहि देवेश नमामि तुभ्यम् ॥ ४५ ॥

व्यास उवाच ॥

इति तस्यैरिता(तां?) वाणीं यथा धातुर्वचः शुभम् ॥
स्तवपूर्वां तु　संश्रुत्य　प्रत्युवाच　जगत्पति[ः] ॥ ४६ ॥

विष्णुरुवाच ॥

किमर्थं खिद्यसे देवि केन त्वमिह संस्थिता ॥
वरं　वरय　भद्रं　ते　यत्ते　मनसि　वर्तते ॥ ४७ ॥

मयि　त्रातरि　लोकानां　भयं　भीरु　न　विद्यते ॥
भवानपि वद ब्रह्मन् प्राप्नो(प्तो?)सि येन हेतुना ॥ ४८ ॥

स्थित्वास्मिन्नाशने　शुभ्रे　कथयस्व　समाहितः ॥
सहानया　च धरया　त्वच्छक्त्या ब्रह्मपदं　महत् ॥ ४९ ॥
तत्सर्वं　कथयस्वासु(शु ?)करिष्यामि हितं तव ॥

ब्रह्मोवाच ॥

भगवन्　देवदेवेश　शङ्खचक्रगदाधर ॥
त्वयि　त्रातरि देवेश　नास्ति　ब्रह्मपदे　भयम् ॥ ५० ॥

तथापि कथयिष्यामि पृछ(च्छ?)ते त्वयि वै विभो ॥
सृष्टास्त्वे(त्वे?)षा मया विष्णो सृष्टयोदिष्टेन कर्मणा ॥
अवनी　वनशोभाढ्या　खेदिता　राजभिः　प्रभो ॥ ५१ ॥

प्रछ(पृच्छ?)स्वेनां महाभाग कल्याणीं शुभभाषिणीम् ॥
यदर्थमागता पुण्या पृछ्य(च्छ्य?)तां वै स्वयं प्रभो ॥ ५२ ॥
तत्सर्वं क्र(क्रि?)यतामाशु　तद्ब्रूते　चारुभाषिणी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास उवाच ॥

इति विज्ञापितो देवो ब्रह्मणा ब्रह्मवादिना ॥ ५३ ॥

पुनरेव महाभागां धरां गौरूपधारिणीम् ॥
प्रत्युवाच तदा देवो गिरा सूनृतया तदा ॥ ५४ ॥

विष्णुरुवाच ॥

कथयस्व महाभागे येन त्वं कुपिता ह्यसि ॥
वरं वरय शुश्रोणि ईप्सितं ते ददाम्यहम्॥ ५५ ॥

त्वयाहं तोषितश्चास्मि गीर्भि[:] पुण्यार्थकारिभिः ॥
तस्माद् दास्यामि ते भद्रे वरमेकं न संशयः ॥ ५६ ॥

मयि प्रसन्नतां जाते नास्ति नास्ति भयं शुभेः(भे?) ॥

धरोवाच ॥

धन्यास्म्यनुगृहीतास्मि यत्त्वया भाषितास्म्यहम् ॥ ५७ ॥

विभोऽत्रिगोत्रसंपन्नो पृथुर्नामा बभूव ह ॥
तेनाहं खनिता चास्मि दुग्धास्मि भुवनेश्वर ॥ ५८ ॥

हृतालं(न्तः?) करणा चास्मि तथान्यैर्देवतागणैः ॥
उच्चावचापि भूतास्मि हीनाहं धातुभिस्तथा ॥ ५९ ॥

क्रान्तास्मि पर्वतगणैस्तथान्यैर्वसुधाधिपैः ॥
न हि जानन्ति ते मूढा(ढास् ?)त्वां वै शिवयुतं विभो ॥ ६० ॥

स्रष्टारं लोकस्रष्टारं न जानन्ति नराधमाः ॥
नास्ति पुण्यानि वै विष्णो भवद्भिन्नानि वै तथा ॥ ६१ ॥

धर्मं विना न तिष्ठामि क्षणार्द्धमपि केशव ॥
यदि तुष्टोसि देवेश यदि त्वं वरदो ह्यसि ॥
वरमेकं प्रयच्छामि(?) यदि दास्यं(स्य?)सि वै प्रभो ॥ ६२ ॥

ब्रह्मविष्णुमहेशाद्यैर्हीनास्मि त्रिदशेश्वर ॥
न शोभयामि देवेश पतिहीना यथा श(स?)ती ॥ ६३ ॥

क्षणार्द्धमपि वै तेषां भारं चातीवदुःसहम् ॥
न शयि(क्षमि?)ष्यामि देवेश मज्जयामि शुभे जले ॥ ६४ ॥

किंतु मां स्वपदैः पुण्यैस्तथा पादोद्भवैज्ज(र्जं?)लैः ॥
पुनीहि देवदेवेश लोकांश्चैवेह मद्गतान् ॥ ६५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किन्तु मां शिवदेहेन भवान्या चान्वितेन वै ॥
स्त(त?)था ब्रह्मपदैः पुण्यैः पुनीहि परमेश्वरः(र?) ॥ ६६ ॥

इदमेव वरं पुण्यं याचयामि जगत्पते ॥
वरेणानेन मां पुण्यां धारयस्व न संशयः ॥ ६७ ॥

व्यास उवाच ॥

इति विज्ञाय(पि ?)तो देवो धरिण्याः (रण्या ?)स शिवान्वितः ॥
विचार्य सुचिरं कालं ब्रह्मणा सशिवान्वितः ॥ ६८ ॥

मेघगम्भीरया वाचा विकसन्वदनाम्बुजः ॥
उवाच वदतां श्रष्टो(श्रेष्ठो?) निर्गुणो गुणिनां गतिः ॥ ६९ ॥

विष्णुरुवाच ॥

धारितासि मया भद्रे शेषांशेन शुभेन हि ॥ ७० ॥

तथा कमठरूपेण धृतासि स्वेन पृष्ठिना ॥
ततो धृतासि तुण्डेन विसृय (धृत्य?) शूकरं वपुः ॥ ७१ ॥

कालेन त्वां करिष्यामि निग(ज?)पादांकितां शुभेः(भे?) ॥
यदा यदा भयं भंगू(?)प्राप्स्यसि त्वं भुवस्थले ॥ ७२ ॥

तदा तदावतीर्यामि भारनिग्रहणाय ते ॥
श्वेतद्वीपे हि मे वास(सो?) योगी(गि?)नां हृदि वा शुभे ॥ ७३ ॥

योगिनामप्यगम्योस्मि काले काले न संशयः ॥
कालेन महता देवी(वि?) ब्रह्मणः परमेष्ठिनः ॥ ७४ ॥

कपालपतनं पुण्यं भविष्यति न संशयः ॥
तत्राञ्जलिप्रदानेन शुद्धिं यान्ति पितृद्रुहा[:] ॥ ७५ ॥

अथान्यदपि वक्ष्यमि गुह्याद् गुह्यतरं हि ते ॥
येन वै त्वद्गता मर्त्या यान्ति ब्रह्मपदं महत् ॥ ७६ ॥

तेन त्वं निश्चला देवि भविष्यसि न संशयः ॥
दिव्यवर्षसहस्रान्ते कृतादौ वरवर्णिनी(नि?) ॥ ७७ ॥

आगमिष्यति देवेशो यं शिवेति वदंति हि ॥
तपस्तप्तुं महाभागो वियोगाद् दक्षजोद्भवात् ॥ ७८ ॥

तत्र ते चारुवृक्षाढ्ये कक्षे क्षेत्रमनोहरे ॥
स टङ्कणगिरौ पुण्ये दारुकाननशोभिते ॥ ७९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपिष्यति तदा देवस्तपः परमदुस्स(श्च)रम् ॥
तत्रैव तस्य देवस्य मुनीनां शापकारणात् ॥ ८० ॥

लिङ्गस्य पतनं पुण्यं भविष्यति न संशयः ॥
तमाद्यं पुरुषं देवि शिवं शान्तं हि शङ्करम् ॥ ८१ ॥

यथा मां वेत्सि वै देवो(वि?) जानीहि तं तथैव हि ॥
लिङ्गस्य पतनाद्देवी(वि?) निश्चला त्वं भविष्यसि ॥ ८२ ॥

दुष्टाश्चौराः शठाश्चैव मानिनो दाम्भिकाश्च ये ॥
ब्रह्महिंसारता ये वै तथा स्त्रीणां वधे रताः ॥ ८३ ॥

स्मरणाच्छिवलिङ्गस्य शुद्धिं यान्ति ततो जनाः ॥
ततः परं महाभागे भविष्यति पदे पदे ॥ ८४ ॥

शिवलिङ्गाङ्किता पुण्या पूजिता मानवैस्तथा ॥
वैवश्व(स्व?)तकुले जातः नाम्ना राजा भगीरथः ॥ ८५ ॥

भविष्यति महातेजा[:] सूर्य्यान्वयविवर्द्धनः ॥
मदर्चनपरो भूत्वा ज्ञात्वा मामेव निश्चलम् ॥ ८६ ॥

अवतार्य पदोद्भूतां गङ्गां मत्पादसेविनीम् ॥
युक्तां प्रवाहसाहस्रैर्देवराजनिषेविताम् ॥ ८७ ॥

करिष्यति महत्पूज्यां राजा त्वां तदनन्तरम् ॥
श्वेतद्वीपनिभा पुण्या भविष्यति ततः परं ॥ ८८ ॥

ततोहं वामनं रूपमास्थायाद्भुतकारणम् ॥
बलेरद्भुतवीर्यस्य मानभङ्गाय भामिनी(नि?) ॥ ८९ ॥

निजपादाङ्कितां त्वां वै करिष्यामि न संशयः ॥
ततो भूतलवासिन्यो राजानश्चेतरे जना[:] ॥ ९० ॥

ज्ञात्वा मामेव लोकेशं करिष्यति(न्ति?) महत्तपः ॥
ततस्त्वं बहुपुण्येन भारहीना भविष्यसि ॥ ९१ ॥

अथान्यदपि वक्षा(क्ष्या?)मि गुह्या[द्]गुह्यतरं हि ते ॥
येन त्वं निश्चला पुण्या गमिष्यसि गृहं शुभे ॥ ९२ ॥

ये त्वया गिरयः प्रोक्ता[:] तानहं कथयामि ते ॥
न ते भारकरा देवि तव भारहरा हि ते ॥ ९३ ॥

हिमालयेति यो ख्यातः हिमसीकरसेवितः ॥
सोहमस्मि महाभागे नारदादिभिसंस्तुतः ॥ ९४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कैलाशस्तु शिवो ज्ञेयः पुण्यैः शिवगणैर्युतः ॥
गणेशादिभिः शिवगणैः स्तूयमानः पुनः पुनः ॥ ९५ ॥

विन्ध्यं ब्रह्माण्डसंभूत(तं?) ब्रह्मर्षिगणसेवितम् ॥
ब्रह्मविष्णुमहेशानामंशजान् स्मर भामिनी ॥ ९६ ॥

देवान्दैत्यान्पिशाचांश्च गन्धर्वोरगमानवान् ॥
पतङ्गकृमिजन्त्वादीन् वृक्षादी(दीं?)श्चापि भामिनी(नि?) ॥ ९७ ॥

मदंशसंभवान्सर्वान्जानीहि वसुधे शुभेः(भे?) ॥
गच्छ त्वं भवनं भीरू(रु?) पोषयस्व प्रजागणान् ॥ ९८ ॥

सहायं तव वै शुभ्रे करिष्यामि न संशयः ॥

व्यास उवाच ॥

श्रुत्वा तस्य विभोर्वाक्यं धरा सा स्वस्थमानसा ॥ ९९ ॥

पुनरेव विभुं पुण्यं पप्रछ(च्छ?) चारुभाषिणी ॥

धरोवाच ॥

कथं हि ध्रियते विष्णो भवद्भिः स्थावरं वपुः ॥ १०० ॥
सुखानि कानि तत्रैव कथ्यतां यदि रोचते ॥

विष्णुरुवा[च] ॥

शृणु भद्रे महापुण्यं वचो मे समुदाहृतम् ॥ १०१ ॥

स्थावरत्वे सुखा ये वै जङ्गमे तेन विद्यते ॥
शीतादितापभीतीनां भीतिस्तत्र न विद्यते ॥ १०२ ॥

न तु संभाषणं तत्र केनापि वरवर्णिनि ॥
न तु मित्रकलत्राणां भोगादीनां तथापि हि ॥ १०३ ॥

सुखदुःखादिकानां च नास्ति तत्र भयं महत् ॥
तस्माद्धि मानुषे पूज्यं रूपं स्थावरसंज्ञकम् ॥ १०४ ॥

स्थावरत्वात्सहिष्णुत्वात्पूजयन्ति शिवादयः ॥
लोकानां ज्ञापनार्थाय स्थावरत्वं विमस्र्यं(भर्म्यं?)हम् ॥ १०५ ॥

तस्माद्भद्रे महापुण्यं स्थावरत्वं विशिष्यते ॥
कथितं हि महाभागे स्थावरत्वस्य लक्षणम् ॥ १०६ ॥
गच्छ भद्रे महाभागे पुण्यं स्वभवनं प्रति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास उवाच ॥

इत्युक्त्वा देवदेवेशस्तत्रैवान्तरधीयतः(त?) ॥ १०७ ॥
शिवः शिवगणैः सार्द्धं जगाम शिवमन्दिरम् ॥
आज्ञापयित्वा तां पुण्यां ब्रह्माब्रह्मर्षिसेवितः ॥ १०८ ॥
जगाम ब्रह्मभवनं सिद्धर्षिगणसेवितम् ॥
धरा सा हृष्टमनसा पूर्णकामा यशश्विनी ॥ १०९ ॥
परिक्रम्याभिवाद्याथ ब्रह्माणं सा जगाम ह ॥
दुःसहमप्य(पि?)भारं सा लघ्वीभूतं(त?) ममन्यत ॥ ११० ॥
यश्चैनां श्रावयेत्पुण्यां पृथोर्वैण्यस्य वानघ ॥
धरायाश्चरितं पुण्यं तथा ब्रह्मेरितां स्तुतिम् ॥ १११ ॥
विष्णोरमितवीर्यस्य चरित्रं पापनाशनम् ॥
यः श्रृणोति महाराज पुत्रपौत्रसमन्वितः ॥ ११२ ॥
स प्राप्य विष्णुभवनं पुनरावृत्तिदुर्ल्लभम् ॥
दिव्याप्सरोभिः संकीर्णं मोदते देववद्द्विजाः ॥ ११३ ॥

॥ इति श्रीस्कन्दपुराणे मानसखण्डे धराश्वाशनं नाम तृतीयः ॥ ३ ॥

४

ऋषय ऊचुः ॥

कथितं भवता ब्रह्मन् धरायाश्चरितं महत् ॥
विष्णोरमितवीर्य्यस्य पृथोर्वैण्यस्य वै तथा ॥ १ ॥
अधुना श्रोतुमिच्छामि चरितं शूलपाणिनः ॥
शापस्य कारणं ब्रूहि ऋषीणामृषिसत्तमः ॥ २ ॥
तस्य ध्यानं सचरितं तथा शोकस्य कारणम् ॥
यथा लिङ्गस्य पतने कारणं तद्वदस्व वै ॥ ३ ॥

व्यास उवाच ॥

कथयामि महाभागा एतत्प्रश्नोत्तरं शुभम् ॥
कथ्यतां श्रृण्वतां चापि सर्वपापप्रणाशनम् ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दक्षप्रजापते कन्या कालीं वै नामनामतः ॥
उद्वाहकाले सविभुर्जग्राह तत्करं शुभम् ॥ ५ ॥

ततः कालेन महता काली कलुषनाशिनी ॥
श्रुत्वा यज्ञं समारब्धं स्वपितुर्भवनं ययौ ॥ ६ ॥

अनादरापि पित्रा सा अर्घ्यादिकरणैः प्रभोः ॥
दृष्ट्वा समूहं स्त्रीणां तद्भगिनीनां यशस्विनी ॥ ७ ॥

पित्रा सभूषितानां हि वस्त्रालंकारभूषणैः ॥
पित्रा चानादृता देवी गर्हिता स्त्रीजनैरपि ॥ ८ ॥

प्रविवेश चितां राजन्पितुर्गेहे मनस्विनी ॥
ज्ञात्वा दग्धां हि तां कालीं सविभुर्भूतभावनः ॥ ९ ॥

जगाम दक्षस्य गृहं ज्वलन्निव हुताशनः ॥
भित्वा तन्मखपात्राणि स्तम्भानुत्पाट्य स प्रभुः ॥ १० ॥

ददाह ऋत्विजान् सर्वान् वह्निना नेत्रजेन हि ॥
तत्रैव ब्राह्मणस्येकं सकिरीटं सकुंडलम् ॥ ११ ॥

हृत्वा स देवदेवेशो ब्रह्मणा संस्तुतः प्रभुः ॥
ररक्ष दक्षं राजर्षे ब्रह्मवाक्यप्रचोदितः ॥ १२ ॥

तपसे कृतसंकल्पः कपालकरभूषणः ॥
जगाम देवदेवेशो वसुधां वसुधाधिपः ॥ १३ ॥

तत्याज स गिरेः श्रृङ्गं कैलासस्य द्विजोत्तमाः ॥
तथा पुण्यं शिवगृहं रुद्रकन्याविराजितम् ॥ १४ ॥

नन्दिस्कन्दि रिटिभिः सेवितं गणनायकैः ॥
प्राप्य विन्ध्यं सुपुण्यं वै वर्षमात्रं नरेश्वरः ॥ १५ ॥

नन्दिना मह(हा)देवश्चक्कार विपुलं तपः ॥
ततो हिमाद्रि पुरुहूतसेवितं त्यक्त्वा हि विन्ध्यस्य भुवं पवित्रम् ॥
ज्ञात्वा सुपुण्यैर्हिमशीकरैरपि संपूरितं तं स ययौ महेशा(शः?) ॥ १६ ॥

प्राप्य चाधिक्य(त्य?)कां भूमिमृणिषपुण्याश्रमैर्वृताम् ॥
टङ्कणाण्य(ख्य?)गिरे राजन् सरयूजलसेविताम् ॥
ततो जगाम गहनं वृक्षैर्बहुविषै(धै?)रपि ॥ १८ ॥

तुषारस्य कणा यत्र निषेवन्तेप्यहर्निशम् ॥
चकार वासं देवेशस्तत्रैव दारुकानने ॥
नानाविधैः पक्षिगणैर्मृगयूथैर्न्निषेविते ॥ १९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दनोद्भववृक्षा ये देवदारुभि[:] संस्थिते ॥
तथान्यैर्वृक्षराजैश्च मृगराजैश्च शोभिते ॥ २० ॥

ततस्तु वासुदेवस्य तथ्यं कर्तुं वचो हरः ॥
चकार स्वाश्रमं पुण्यं देवदारुनिषेवितम् ॥ २१ ॥

वन्यानां पादपानां च छायाभिः परिवेष्टितम् ॥
आस्तीर्यासनमत्युग्रं मृगराजत्वगुद्भवम् ॥ २२ ॥

विवेश भगवान् रुद्रो ध्यायन्योगं सनातनम् ॥
ततो भवान्या स वियोगसंभवं प्रातः समुत्थाय कपालपाणिः ॥ २३ ॥

स्मृत्वा स्वदुःखं जनदुःखहंता भिक्षाटनं चारुवने चकारः(र?) ॥
तस्थौ स[त]त्राब्दसहस्रसंख्यैः संपूजितः पर्वतनायिकाभिः ॥ २४ ॥

चकार कान्तं रमणीयरूपं तदास्पदं योगिभिरप्यगम्यम् ॥
वशिष्ठाद्या महात्मानस्तत्रैवाश्रमवासिनः ॥ २५ ॥

आश्रमं चक्रतुः सर्वे सह शिष्या महर्षयः ॥
प्रत्यायान्ति स्त्रियस्तेषां नीत्वा नीत्वा शमु(मि ?)त्कुशान् ॥ २६ ॥

एकदा ऋषिपत्न्यो वै वशिष्ठवल्लभां विना ॥
जग्मुस्तं विपिनं पुण्यं यत्रास्ते जगदीश्वरः ॥ २७ ॥

दृष्टः कदाचिद्देवेशस्ताभी राजर्षिसत्तमः(म ?) ॥
अनन्यचित्तास्तं देवं ददृशुस्तानसंशयः ॥ २८ ॥

भस्मोद्धूलितसर्वाङ्गं नागमालाविराजितम् ॥
शोभितं मृगराजस्य चर्मणा बिन्दुशोभिना ॥ २९ ॥

ध्यायन्तमात्मनात्मानं योगिध्येयाह्नि(?) पंकजम् ॥
श्वसन्तं सकलां पृथ्वीं स्वेन स्वासेन वै द्विजाः ॥ ३० ॥

कोयमत्यद्भुताकारो ध्यानवृत्तिपरायणः ॥
सञ्चिन्त्य ऋषिपत्न्यो वै मुमुहुःस्ताः शुचार्द्दिता[:]॥ ३१ ॥

नेन्धनं जगृहे काचिन्न काचिद् वै शमित्कुशान् ॥
तमेव विश्वभर्त्तारं ध्यायन्ती नान्दितात्ययः(?) ॥ ३२ ॥

अभवद्राजशार्दूल निशासमनुपद्यतः ॥
ततस्ते ऋषयः सर्वे तासां मार्गं प्रदर्शिरे ॥ ३३ ॥

निशेयं समनुप्राप्ता न दृश्यन्ते तपोगना(णाः) ॥
समाप्यते विधिं साध्यं वशिष्ठस्य शमित्कुशैः ॥ ३४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततस्ते चिन्तयामासुर्मुनयस्तत्त्वदर्शिनः ॥
अहो कालो व्यतीतो वै नागतास्त्वध्वरप्रिया[ः] ॥ ३५ ॥
अद्याग्निहोत्रं सर्वेषां नष्टमेतन्न संशयः ॥
किन्तु(न्नु ?) व्याघ्रेण जग्धा वै मार्गं भ्रंशोऽथवा किमु ॥ ३६ ॥
किन्तु(न्नु?) पौलस्त्यतनयैर्हृतास्ता यज्ञवल्लभा[ः] ॥
विचार्य सुचिरं कालं ऋषयस्ते तपोधना[ः] ॥ ३७ ॥
तत ऊचुस्ते ऋषय(यो ?)वचनं सत्यवादिन[ः] ॥
तासां मार्गं महाभागाः प्रातरेव न संशयः ॥ ३८ ॥
जुहुयाग्निनामिष्यमस्तासामन्वेषणं(?) प्रति ॥

व्यास उवाच ॥

तत्र ते ऋषयः सर्वे स्थित्वा कृत्वाह्निकक्रियाम् ॥ ३९ ॥
जग्मुर्मार्गं तत[ः]स्त्रीणां वनादुपवनं प्रति ॥
मार्गमन्वेषमाणा वै गतास्ते दारुकाननम् ॥ ४० ॥
तत्र दृष्टं शिवं शान्तं ध्यायमानं परात्परम् ॥
तत्रोपविष्टास्ताः सर्वा[ः] तद्भवज्ञानमोहिताः ॥ ४१ ॥
अहोरात्रं गतं सर्वं न जानन्त्यशुचिव्रताः ॥

व्यास उवाच ॥

ततस्ते ऋषयः सर्वे शप्तुकामा यतव्रताः ॥ ४२ ॥
ददुः शापं महाभागा येन ते मोहिता[ः] स्त्रियः ॥

ऋषय ऊचुः ॥

येन वै भवता योगिनस्माकं हि कुलस्त्रियः ॥ ४३ ॥
तस्माल्लिङ्गस्य पतनं तव भूमौ महेश्वरः(र ?) ॥
भवतु तेथ विवेव यावदाहूतसंप्लवम् ॥ ४४ ॥

व्यास उवाच ॥

इत्युक्त्वा ऋषयः सर्वे शप्त्वा योगीश्वरं हरम् ॥
सहैव ऋषिपत्नीभिः गन्तुं यावत्समुत्सुका[ः] ॥ ४५ ॥
तावद्ददर्श देवेश ऋषीस्तान् शापकारकान् ॥
विनापराधजं शापं श्रुत्वा देवो जगत्पतिः ॥ ४६ ॥
उवाच तान्नृषीन् सर्वान् तदा ब्रह्मर्षिसत्तमा[ः] ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महेश उवाच ॥

यस्माद्भवद्भिर्धर्मज्ञाः सप्तोस्मि सुकृतेन हि ॥ ४७ ॥

तस्माद्भवन्तो धर्मज्ञाः शापं ह्येतत्प्रयच्छता ॥
अज्ञातकारण(णं?)यन्मां ध्यानेनामितकारणम् ॥ ४८ ॥

तस्मादयु(यू)यं महाभागा श्रूयतां मदुदाहृतम् ॥
मद्दर्शनो हि लोकानां वैरेणैव हि वै द्विजाः ॥ ४९ ॥

मुक्तेरेव हि लोकानां सर्वेषां पुत्रमित्रद्रुहामपि ॥
मत्तो मुक्ति समालभ्य सह पत्नीभिः वै द्विजाः ॥ ५० ॥

भोगहीनोत्तरस्योहि भवध्वं दिवि तारकाः ॥
दिशि मन्वन्तरं प्राप्य वैवस्व(स्व?)तमनोः शुभम् ॥ ५१ ॥

व्यास उवाच ॥

ऋषीणां हि महच्छापं मत्वा देवो महेश्वरः ॥
तत्रैव लिङ्गपतनं चकार मुनिसत्तमाः ॥ ५२ ॥

आक्रम्य सप्तपातालं तथा भूमण्डलं शुभम् ॥
शुशुवे(भे?) देवदेवेशो देवराजोपमद्वि(द्यु?)तिः ॥ ५३ ॥

तदा देवाः सगन्धर्वाः सिद्धविद्याधरोरगाः ॥
दर्शना(?) यज्ञपत्नीनां यागीशेति च तुष्टुवुः ॥ ५४ ॥

ऋषीणां मुक्तिदानाच्च तथान्येषां महीपते ॥
मुक्तिमण्डलमध्यस्थो मुक्तीशेति च विश्रुतः ॥ ५५ ॥

वैवश्व(स्व?)तं मनुं प्राप्य ते सर्वे ऋषयोपि हि ॥
महेशामु(न्मु?) क्तिमालभ्य सम्भूता दिवि तारका[:] ॥ ५६ ॥
सप्तर्षयो महाराज दृश्यतेद्यापि चोत्तरे ॥

ऋषय ऊचुः ॥

त्वयोक्तं देवदेवस्य यथा लिङ्गं भुवस्थले ॥ ५७ ॥

पतितं चापि विप्रर्षे सर्वज्ञेन महात्मना ॥
मूर्तिभूतो हि विप्रर्षे एकस्मिन्नेव मण्डले ॥ ५८ ॥

स कथं देवदेवेशो बहुत्वमुपलब्धवान् ॥
तस्य लिंगैर्महाभाग सादिता श्रूयते मही ॥ ५९ ॥

एतत्सर्वमशेषेण कथयस्व यथातथम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास उवाच ॥

अस्ते(स्त्ये?)वं देवदेवस्य सर्वव्यापी न संशयः ॥ ६० ॥

नास्ति नास्तीह वै विप्रास्तेन होनं भुवस्तत(ल?)म् ॥
तथापि कथ्यमानं च कथयामि न संशयः ॥ ६१ ॥

शिवलिङ्गं महापुण्यं श्रुत्वा तत्पतितं भुवि ॥
ब्रह्मा विष्णुश्च सोमस्य तथैव सविताकरः ॥ ६२ ॥

इन्द्रादिभिर्देवगणैः सह जग्मुर्जनाधिपः(प?) ॥
गत्वा तत्र यथान्यायं नमश्चक्रुर्महेश्वरम् ॥ ६३ ॥

तस्थुस्तत्रैव ते सर्वे कौतूहलसमन्विताः ॥
अहोयं रुद्रदेवस्य लिङ्गं ज्योतिःसमन्वितम् ॥ ६४ ॥

दृश्यतेद्यापि नो दृष्टं भाषमाणा दिवौकसः ॥
तस्थुस्तत्रैव वै विप्रा निजांशेन समाहिताः ॥ ६५ ॥

दृश्यन्तेद्यापि ऋषिभिः ब्रह्माद्या देवतागणाः ॥
एतस्मिन्नेव समये वसुधा वसुधाधिपः(प?) ॥ ६६ ॥

गोरूपधारिणी देवी तत्र विष्ण्वन्तिकमुपागताः ॥ ६७ ॥

तमुवाच वरिष्ठा सा स्तुतिप्रणयवादिनी ॥

गौरुवाच ॥

नमो नमस्ते पुरुषोत्तमाय धराधराधारणकारणाय ॥ ६८ ॥

ब्रह्मादिभिर्देवगणैः समस्तैरगम्यरूपाय नमो नमस्ते ॥
साहं हि लिंगेन शिवस्य वै प्रभो पुण्येन पातालगतेन वै तथा ॥ ६९ ॥

धृतास्मि पूतास्मि महावला तथा चारुसुभाग्याशुभदा तथा प्रभो ॥
तथाप्येकं करिष्यामि यद्यनुग्राह्यसि वै प्रभो ॥ ७० ॥

आक्रम्य सप्तपातालं शिवेन परमात्मनाः(ना?) ॥
शिवदाहं कृता चास्मि धृतास्मि परमेश्वरः(र?) ॥ ७१ ॥

धर्तुं त्वं(त्वां) देवदेवेशं न समर्थास्मि वै प्रभो ॥
एतत्कौतूहलं तत्र पश्यतां यदि रोचते ॥ ७२ ॥

अहमप्यस्य लिङ्गस्य नान्तं जानामि वै प्रभो ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास उवाच ॥

अथ ब्रह्मादयो देवा धराया वचनं शुभम् ॥ ७३ ॥

श्रुत्वा कौतूहलं सर्वं ययुस्ते देवतागणाः ॥
उपदिष्टा महेशेन विष्णुना प्रभविष्णुना ॥ ७४ ॥

तलातलं विष्णुगृहं यत्रास्ते शेषसंज्ञकः ॥
नत्वा शेषं महाभागा[:] ददृशुस्ते शिवं प्रभो ॥ ७५ ॥

पातालादप्यधो भागे गतं ज्योतिःसमन्वितम् ॥
नान्तं प्राप्याथ ते सर्वे देवा ब्रह्मर्षिभिः सह ॥ ७६ ॥

प्रत्याजग्मुस्तेपि सर्वे यत्रास्ते स शिवोव्ययः ॥
तत्रोवाच तदा देवी ब्रह्माणं चारुभाषिणीम् ॥ ७७ ॥

दृष्टं त्वया शिवस्यान्तं ब्रह्मन् मां कथयस्व वै ॥
तत्रोवाच स्वयं ब्रह्मा तां शुभां चारुभाषिणीम् ॥ ७८ ॥

कर्तुं त्वां निश्चला(लां?) भूमिं धराधरसमन्विताम् ॥
दृष्टोस्माभिः शिवस्यान्तं मा खिद्यस्व वरानने ॥ ७९ ॥

ततोवाच विधातारं कुपिता वसुधा तदा ॥
यस्मात्त्वयातथ्यगिरा सृष्टिसंहारकारिणा ॥ ८० ॥

तस्मात्वपूज्य(ज्यो?) लोकेश भव भूमण्डले शुभे ॥
ततस्तां स च देवेशः स्रष्टा देवर्षिपूजितः ॥ ८१ ॥

यतो मामाद्यपुरुषं शपसि त्वं वरानने ॥
तस्मान्म्लेच्छगणैः सर्वैर्युगान्ते पूरिता भवः(व?) ॥ ८२ ॥

व्यास उवाच ॥

तदा शप्त्वैव चान्योन्यं देवानामग्रतः स्थिता ॥
तानपृच्छन्नृद्धरा देवी शिवान्तं राजसत्तमः ॥ ८३ ॥

ततो देवाः सगन्धर्वा सिद्धविद्याधरान्विताः ॥
ऊचुः सर्वे गुरुयुता वसुधां वसुधारिणीम् ॥ ८४ ॥

यस्यान्तमाद्या हरिसंमितास्तु ते ब्रह्मादयोब्रह्मसुतादयस्तथा ॥
योगैः ससांख्यैः कपिलादयस्तथा शेषादयोयं न विदुर्वयं कुतः ॥ ८५ ॥

व्यास उवाच ॥

इति तेषां वचः सत्यं ज्ञात्वा क्षोणी हरिं ययौ ॥
ततो विज्ञापयामास वासुदेवं सतां गतिम् ॥ ८६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवैः समस्तैर्देवेशः गत्वा वै शेषमन्दिरम् ॥
न प्राप्तं हि शिवस्यान्तं दुःप्राप्यं योगिनामपि ॥ ८७ ॥
ते सर्वेपि महाभागा[:] प्रभुविष्णोरिहागताः ॥
महेन्द्रेणान्विताः सर्वे देवदेवगणैर्युताः ॥ ८८ ॥
तदत्रोपायकरणं चिन्त्यतां परमेश्वर:(र?) ॥
नास्त्यन्योपायकरणे त्वां विना पुरुषोत्तमः ॥ ८९ ॥
दुःसहं शिवजं तेजः कालेषु त्रिष्वपि प्रभो ॥
पातालगेन लिङ्गेन तथा ज्योतिर्षु(?) तेन च ॥ ९० ॥
सुदुःसहतरं विष्णोः ष्णो) जानामि नहि संशयः ॥

व्यास उवाच ॥

ज्ञात्वा मतमवन्यास्तु हरिर्योगीश्वरेश्वरः ॥ ९१ ॥
तल्लिङ्गभागकरणे मतमास्थाय स प्रभुः ॥
तमेव देवं देवेशं ब्रह्मणा स समन्वितम् ॥ ९२ ॥
तुष्टाव प्रयतो भूत्वा विष्णुर्योगीश्वरेश्वरः ॥

विष्णुरुवाच ॥

नमस्ते शितिकण्ठाय वृषवाहाय ते नमः ॥ ९३ ॥
भवाय भवबीजाय शिवाय शिवदाय च ॥
हराय नागहाराय विषमाक्षाय ते नमः ॥ ९४ ॥
त्रिनेत्रायादिदेवाय दक्षयज्ञविनाशिने ॥
भस्मोद्धूलितसर्वाङ्गं मौलिमालाधराय च ॥ ९५ ॥
कामघ्नायादिदेवाय प्रलयान्तकराय च ॥
नमो नमस्ते कालीश कालान्तक नमोस्तु ते ॥ ९६ ॥

व्यास उवाच ॥

एवं स्तुतो भगवता हरिणा लोकधारिणा ॥
उवाच स तदा देवो ध्यानोन्मीलितलोचनः ॥ ९७ ॥

शिव उवाच ॥

तुषितोस्मि त्वया विष्णो हेतुना केन चात्मनः ॥
तत्वं कथय सुप्रीते मयि ध्यानपरायिणे ॥ ९८ ॥
वरं वरय भद्रं ते यत्ते मनसि वीप्सितम् ॥
ददामि नात्र संदेहो दुःप्राप्यममरैरपि ॥ ९९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुरुवाच ॥

विज्ञापयति देवेश धरेयं समुपस्थिता ॥
तव लिङ्गस्य भारेण पीडिता त्वां न संशयः ॥ १०० ॥

दीप्ता हि तव लिङ्गेन सप्तपातालगामिना ॥
नराणां पर्वतानां च लघ्वीभूता महाभवत् ॥ १०१ ॥

तथापि तव लिङ्गस्य चैकत्र कीलितस्य च ॥
न सहामि महद्भारं ब्रूते पुंजीभवं हि सा ॥ १०२ ॥

कुरूप्येनां(?) महाभाग भावहीना न संशयः ॥
यथा हि तव लिङ्गं वै धरिष्यसि (ति?)वसुंधरा ॥ १०३ ॥

तत्तथा क्रियतामासु(शु) सुविचार्य्यं महेश्वरः(र?) ॥
एषा मे वीप्सिता वाञ्छा वर पूर्वा न संशयः ॥ १०४ ॥

पूरणीया त्वयेवैह न चान्येन महात्मना ॥

शिव उवाच ॥

मया पूर्वं प्रतिज्ञातं संकल्पो हि न चान्यथा ॥ १०५ ॥

तथापि मत्वा वचनं करिष्यामि न संशयः ॥
अदेयमपि दास्यामि भक्तेषु तत्सुरेषु च ॥ १०६ ॥

त्वया विज्ञापितः सोहं लिङ्गनिग्रहणं प्रति ॥
ऋषीणां वचनं सत्यं मास्त्वसत्यं जनार्दन ॥ १०७ ॥

संहरिष्याम्यहं लिङ्गं तवैव पश्यतोव्ययम् ॥
क्रियतां तज्जगन्नाथ छित्वा चक्रेण कोटिधा ॥ १०८ ॥

कृत्वा त्वं स्थापयस्वाग्रयं वसुधायां न संशयः ॥
तत्र ये रेणवः पुण्याः पतिष्यन्ति भुवस्तले ॥ १०९ ॥

ते सर्वे लिङ्गतां यान्ति(न्तु?) लिङ्गोद्भूता न संशयः ॥
यत्र यत्र गमिष्यामि नन्दिना स्कन्दिना सह ॥ ११० ॥

तथान्यैर्नायकगणैर्भवता ब्रह्मणा सह ॥
तत्र तत्र हि लिङ्गानि भवन्ति धरणीतले ॥ १११ ॥

तत्र तत्र निजांशेन भवता ब्रह्मणा स हि ॥
स्थेयं मद्वचनाद् विष्णो तथान्यैर्देवतागणैः ॥ ११२ ॥

स्थास्यन्ति दानवास्तत्र तथा नागादयः शुभाः ॥
मद्भक्तियुक्ताः सर्वे वै नामलिङ्गसमन्विता[ः] ॥ ११३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपासयन्ति मामेव सर्वे ते नात्र संशयः ॥
यत्राहं भवता सार्द्धं वसामि ब्रह्मणा युतः ॥ ११४ ॥
तत्र तत्र भविष्यामि पूजनोयो न संशयः ॥
जानन्ति तत्र मनुजा महादेवेति मां शुभाः ॥ ११५ ॥
तत्रैव पुण्यतीर्थाश्च भवन्ति त्वत्पदोद्भवा[ः] ॥

व्यास उवाच ॥

रुद्रस्य वचनं श्रुत्वा स हरिर्ल्लोकपावनः ॥ ११६ ॥
चक्रमुद्यम्य तल्लिङ्गं रुद्रेण च समाहृतम् ॥
चिच्छेद भगव(वा?)न्कृष्णः कोटिधा कोटिकोटिधा ॥ ११७ ॥
छित्वा तान् स्थापयामास नवखण्डेषु भूतले ॥
यत्र यत्र स तान् लिङ्गान्स्थापयामास सः प्रभुः ॥ ११८ ॥
तत्र तत्र निजांशेन ब्रह्मणा चापि वै द्विजाः ॥
पूजितं तं विभुञ्चक्रे तथान्यैर्द्देवतागणैः ॥ ११९ ॥
तदा लिङ्गमयी पृथ्वी नवखण्डेषु भारतः ॥
त्यक्त्वा भूमण्डलं पुण्यं पदात्पदतरं विभोः ॥ २२० ॥
स्थापयामास स विभुस्तांलिङ्गान्नात्र संशयः ॥
प्रतिष्ठितानि लिङ्गानि जानन्ति भुवि मानवाः ॥ २२१ ॥
तथा देवगणाः सर्वे सिद्धदैत्यमहोरगाः ॥
प्रतिष्ठितेस्तु(?) स्थानेषु तथा खण्डेस्तु(?) वै द्विजाः ॥ २२२ ॥
सत्येव शिवलिङ्गानि त्यक्त्वा भूमिं पदात्पदम् ॥
यत्र यत्र गतः शम्भुर्नन्दिना सह भारतः(त ?) ॥ २२३ ॥
तत्र तत्र महेशस्य सन्ति लिङ्गान्यनेकशः ॥
तान्सर्वान्देवताः सर्वे दैत्यदानवमानवाः ॥ २२४ ॥
पूजयन्ति महाभागास्तथा सिद्धमहोरगाः ॥
दृश्यन्तेद्यापि भूलोके खण्डे खण्डे न संशयः ॥ २२५ ॥
महादेवस्य लिङ्गानि धरणीमध्यगानि च ॥

सूत उवाच ॥

इत्येतत्कथितं राजन् धरायाश्चरितं महत् ॥ २२६ ॥
तथा लिङ्गस्य पतनं विभागं तस्य चैव हि ॥
व्यासेन वेदविदुषा यथा तत्समुदाहृतम् ॥ २२७ ॥
कथितं हि महाभाग किमन्यच्छ्रोतुमिच्छसि ॥ १२७ ॥

॥ इति श्रीस्कन्दपुराणे मानसखण्डे धरावर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५

जन्मे(नमे ?)जय उवाच ॥

कथितं हि त्वया ब्रह्मन् धरायाश्चरितं महत् ॥
तस्या वदस्व खण्डानां नामधेयं तपोधनः(न ?) ॥ १ ॥

सूत उवाच ॥

कथयामि महाराज व्यासेन समुदाहृतम् ॥
ऋषीणामग्रतः पुण्यं सत्यवत्या सुतेन यत् ॥ २ ॥

ऋषय ऊचुः ॥

कथितं हि महाभाग लिङ्गानां कारणं महत् ॥
यथा बहुत्वमापन्नस्तथा तत्समुदाहृतम् ॥ ३ ॥

त्वयेरितानि खण्डानि नवसंज्ञानि वै तथा ॥
तेषां वदस्य नामं वै यथास्ते भगवान्हरः ॥ ४ ॥

व्यास उवाच ॥

श्रूयतामृषिशार्दूला वचो मे समुदाहृतम् ॥
मया पूर्वमनिन्द्या हि कथयामि न संशयः ॥ ५ ॥

वैशम्पायन उवाच ॥

पृथिव्याः प्रथमश्चैव हिमाद्रिः श्रूयते नृप ॥
यत्र सन्ति सुपुण्यानि महेशस्य शिरां स(सि?) वै ॥ ६ ॥

सेवितानि महाभाग पुष्पैरिव हिमैः शुभैः ॥
यानि दृष्ट्वा महाराज पतङ्गाद्याः शिवादयः ॥ ७ ॥

व्रजन्ति ब्रह्मभवनं पुनरावृत्तिदुर्लभम् ॥
यत्र पुण्या दक्षसुता अवतीर्णा महामते ॥ ८ ॥

हिमजेति च विख्याता ता(?)तत्रैव गिरिकन्यका ॥
तत्रैवोद्वाहिता देवी शिवेन मनुजोत्तम ॥ ९ ॥

विवाहस्तु तयोस्तत्र समुद्गीतो द्विजातिभिः ॥
वदन्ति मुनयः सर्वे तस्य भागचतुष्टयम् ॥ १० ॥

तस्य वै प्रथमो भागः मानसाख्येति विश्रुतः ॥
यं ससर्ज स्वयं ब्रह्मा शिवलिङ्गसमन्वितम् ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीर्थैर्बहुभिः संयुक्तं मानसाख्यं सरोवरम् ॥
तमाद्यं मुनयः सर्वे वदन्ति नृपसत्तमः(म ?) ॥ १२ ॥

तं स्मृत्वा सर्वपापेभ्यो मुच्येत नात्र संशयः ॥
स्मरणाद्दर्शनाद् ध्यानाद् यस्य स्नानादयोपि हि ॥ १३ ॥

व्रजन्ति विष्णुभवनं सेवितं नारदादिभिः ॥
सैव वैः(वै ?) प्रथमः खण्डः ख्यातोभूद् राजसत्तमः(म ?) ॥ १४ ॥

इन्द्रादिभिः देवगणैः पूज्यमानो धरान्वितः ॥
ततस्तस्योत्तरोभागो गीयते देवतागणैः ॥ १५ ॥

यत्र पुण्या महाभागा राजान ऋषयस्तथाः(था?) ॥
मुक्तार्थिनः शिवपुरं प्राप्तास्ते नात्र संशयः ॥ १६ ॥

तत्र वै प्रार्थितं राजन् देहस्य पतनं शुभम् ॥
मृताः शिवपुरं यान्ति भूत्वा लिङ्गमयं वपुः ॥ १७ ॥

ततः परं महाभाग खण्डं कैलाशसंज्ञकम् ॥
नन्दिस्कन्दिकिरीटिभिः पूजितं सुमनोहरम् ॥ १८ ॥

रुद्रकन्या समाकीर्णं देवराजनिषेवितम् ॥
तपस्विनो महाभागा प्रार्थयन्ति यतः(त?) व्रताः ॥ १९ ॥

यस्य कान्तासु पुण्यासु गुहासु नृपसत्तम ॥
तप्त्वा सुदुर्जयं लोके जयन्ति यमसंज्ञकम् ॥ २० ॥

ततः परं महाराज शिवलिङ्गसमन्वितम् ॥
केदाराख्यं महत् खण्डं विद्यते लोकपूजितम् ॥ २१ ॥

यत्र वै स शिवो राजन् नाम्ना केदारसंज्ञकः ॥
राजते देवदेवेशो भवान्या चापि सेवितः ॥ २२ ॥

यं दृष्ट्वा पाण्डवा सर्वे संबन्धिश्वसुरोद्भवात् ॥
गुरुभ्रातृवधोद्भूतात्पाकतात् कुलसंभवात् ॥ २३ ॥

मुक्ताः स्वर्गं प्रयातास्ते स्त्रि(त्रि ?)दशैः सेवितं प्रभो ॥
पातालखण्डं हि ततः परं स्मृतं संसेवितं नागवरैः सुशोभनैः ॥ २४ ॥

शिवस्य लिङ्गैः परमाद्भुतैरपि नागादिभिर्नागसुतारिसेवितैः ॥
ततः परं महाराज काशीखण्डं वदन्ति हि ॥ २५ ॥

विश्वेरस्य देवस्य लिङ्गेन च विराजितम् ॥
यत्र कीटपतङ्गाद्या मृताः शिवपुरं प्रति ॥ २६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयान्ति राजशार्द्दूल शिवकन्यानिषेविताः ॥
ततः परं हि वै विप्रा रेवाखण्डमितीरितम् ॥ २७ ॥

रेवाजलैबहुविधैः सेवितं सुमनोहरम् ॥
यत्र वै प्रस्थराः सर्वे लिङ्गरूपधरा प्रभोः(भो?) ॥ २८ ॥

पूज्यन्ते देवप्रवरैर्नार्मदीया इति प्रभो ॥
नास्त्यन्यत्र महाबुद्धेर्नार्मदीयासि या समा ॥ २९ ॥

लिङ्गरूपधरा देवा इन्द्रेणापि निषेविता ॥
तत्रैव रघुनाथस्य तथा रामेश्वरस्य च ॥ ३० ॥

शोणिताख्यपुरस्यापि माहात्म्यमनुवर्णितम् ॥
ततः परं महाभाग नाम्ना ब्रह्मोत्तरं शुभम् ॥ ३१ ॥

यत्र सन्ति कथा[ः] पुण्या गोकर्णेशस्य वै प्रभो ॥
तथाहि शिवलिङ्गानामाख्यानं विधिविस्तरम् ॥ ३२ ॥

माहात्म्यं शिवभक्तानां यत्र संश्रूयते महत् ॥
ततस्तु राजशार्द्दूल नागरं खण्डमुच्यते ॥ ३३ ॥

यमुपास्य जनाः सर्वे प्रयाताः शिवमन्दिरम् ॥
यत्र वै शिवपूजा या महात्म्यमनुवर्णितम् ॥ ३४ ॥

उज्जयिन्याश्च माहात्म्यं तत्रैव समुदाहृतम् ॥
यथा च शिवलिङ्गानामाख्यानं कथितं प्रभो ॥ ३५ ॥

अन्तरिक्षगतानां च माहात्म्यं हि प्रकीर्तितम् ॥
खण्डानां नामधेयं वै मयैतत्समुदाहृतम् ॥ ३६ ॥

विभागं शिवलिङ्गानां व्यासदेवेन कीर्तितम् ॥
यः श्रृणोति महाराज श्रावयेद्वा समाहितः ॥
दिव्यं विमानमारुह्य सेविताश्चाप्सरोगणैः ॥ ३७ ॥

त्रिसप्तकुलमुद्धृत्य शिवलोके वशेच्चिरम् ॥ ३७ ॥

॥ इति श्रीस्कन्दपुराणे मानसखण्डे पञ्चमोऽध्यायः ॥ ५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६

जन्मे(नमे ?)जय उवाच ॥

नामधेयं हि खण्डानां भवता परिकीर्त्तितम् ॥
अधुना श्रोतुमिच्छामि विवाहं शूलपाणिनः ॥ १ ॥

कथं सा पार्वती देवि(वो ?) हिमकन्यात्वतां गताः(ता?) ॥
विसृज्य पूर्वं देहं वै सर्वदेवांशसंभवा ॥ २ ॥

कथं सा देवदेवेन प्रतिज्ञाता समाधिना ॥
उद्वाहमभवं(वत् ?) तस्याः संयोगश्च कथं द्विज ॥ ३ ॥

एतत्सर्वमशेषं वै कथयस्व तपोधन ॥
त्वत्समो नास्ति वै लोके सर्वं ते दिवि तं(विदितं ?) यतः ॥ ४ ॥

सूत उवाच ॥

श्रृणुष्व त्वं महाराज कथ्यमानं मयाधुना ॥
यदुक्तं व्यासदेवेन ऋषीणामग्रतः पुरा ॥ ५ ॥

इदमेव पुरा पृष्टः सत्यवत्याः सुतः सुधीः ॥
धर्मार्थ(र्थं?) सङ्गतवतै ऋषिभिः पुण्यकारिभिः ॥ ६ ॥

स तानुवाच धर्मात् रम्या(?)बृहस्पतिरिव स्वयम् ॥
तदहं श्रूयमानो वै कथयामि नरेश्वरः(र ?) ॥ ७ ॥

भूमौ हिमाद्रिप्रवर(रो ?) हिमसीकरसेवितः ॥
स चिरं हि तपस्तेपे मैथुनेन समन्वितः ॥ ८ ॥

ब्रह्माविष्णुमहेशाद्या तोषितास्तेन वै तदा ॥
ते तस्मै चाति सुप्रीता ददुः पुण्यतमं वरम् ॥ ९ ॥

ततो वव्रे स हिमवान् वरमेकं मनोहरम् ॥
ब्रह्माविष्णुमहेशानां तेजःसम्भवसम्भवम् ॥ १० ॥

तथा देवमु(मनु ?)ष्याणां नागानामपि वै प्रभो ॥
अंशसम्भवदेहं वै मम पुत्रत्वतां प्रभो ॥ ११ ॥

ददध्वं परमप्रीतास्तव पूज्यो भवाम्यहम् ॥
प्राप्य पुत्रं च पुत्रीं च प्रापयिष्यन्ति तद्वपुः ॥ १२ ॥

इत्युक्त्वा देवदेवेशारन्तर्द्धीता हि वै प्रभो ॥
ततः कालेन महता मेनकायां सुतोत्तमम् ॥ १३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्य कन्यां च सुश्रोणी कालं तं ददृशे तदा ॥
ततः काले व्यतीते तु देवी देवांशसम्भवम् ॥ १४ ॥

देहं हि मेनकागर्भे वेशयामास वै प्रभो ॥
प्रसुष्वापाथ तं गर्भं कन्यारूपं गुणान्वितम् ॥ १५ ॥

सर्वंदेवांशसम्भूतं मायाशतसमन्वितम् ॥
दृष्ट्वा कन्यां महाभागां मेने पूर्णमनोरथः ॥ १६ ॥

हिमाद्रिः स सुतैर्मित्रैः कलत्रेण तथा विभो ॥
वर्द्धमाना पितुर्गेहे सा देवी वरवर्णिनी ॥ १७ ॥

[चकार पूजां देवस्य निराहारा यतव्रता ॥
उमेति मात्रा तपसा निषिद्धा वरवर्णिनी ॥ १८ ॥]

चकार पूजां देवस्य निराहारा यतव्रता ॥
उमेति मात्रा तपसा निषिद्धा वरवर्णिनी ॥ १९ ॥

उमाख्यामाप सा देवी लोकेषु नृपसत्तम ॥
ततो देवैः सगन्धर्वैः स्तुता सा वरवर्णिनी ॥ २० ॥

बहुनाम्ना निकेतेषु बहु नामा बभूव ह ॥
गौरी दुर्गेति भद्रेति कालिकेति च विश्रुता ॥ २१ ॥

विजयेति हरिद्रेति महादुर्गेति वै नृप ॥
तस्मिन्नवसरे राजन् संग्रामे तारकामये ॥ २२ ॥

निर्जिता देवताः सर्वे दितिजैर्दनुजैरपि ॥
ततो देवा [:] सगन्धर्वा ब्रह्माणं शरणं ययुः ॥ २३ ॥

निर्ज्जिता दानवगणैः कुण्ठितास्त्रा विशेषतः ॥
तुष्टुवुस्त(स्ते ?) विधातारं सृष्टिसंहारकारणम् ॥ २४ ॥
बृहस्पतिं पुरस्कृत्य शक्राद्या देवतागणाः ॥

देवा ऊचुः ॥

नमस्ते देवदेवाय ब्रह्मणेनन्तशक्तये ॥ २५ ॥
सृष्टिस्थितिविनाशानां हेतुभूताय ते नमः ॥

सूत उवाच ॥

देवानां(ना ?)मीरितं श्रुत्वा ब्रह्मालोकपितामह(हः ?) ॥ २६ ॥
उवाच श्लक्षण(क्ष्ण?)या वाचा स्वयमेव पितामहः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मोवाच ॥

किमर्थं देवताः सर्वे बृहस्पतिपुरोगमाः ॥ २७ ॥
न्यस्तशस्त्रारि(इ?)हायाता ब्रूत किं करवाम्यहम् ॥

देवा ऊचुः ॥

ब्रह्म(ह्मन्?)दैत्यकुले जातो नाम्ना वै तारकासुरः ॥ २८ ॥
तेन वै निर्ज्जिता देवाः संग्रामे तारकामये ॥

उपायं चिन्त्यतां ब्रह्मं(ह्मन्?) तारकस्य वधं प्रति ॥ २९ ॥

त्वमुपायोसि लोकानां मया योसि(?)त्वमेव हि ॥

ब्रह्मोवाच ॥

उपायं कथयिष्यामि क्र(क्रि)यतामासु मा चिरम् ॥ ३० ॥

मयैतस्मिन्वरो दत्तो मा वध्यता भवेदिति ॥
मया वा विष्णुता(ना ?) वापि मृत्युस्तेन भविष्यति ॥ ३१ ॥

तस्मादवध्यो दैत्येंद्रो न मया विष्णुना तथा ॥
गम्यतां यत्र देवेशो ध्यानमास्थाय पौरुषम् ॥ ३२ ॥

आस्ते देवगणैः सार्द्धन्नपि भृङ्गिरिटादिभिः ॥
हनिष्यसि महाभाग दैत्येयं तत्सुतः(त ?) स्तथा ॥ ३३ ॥

क्रियतामासु देवेन्द्र ध्यानभङ्गं हरस्य वै ॥
तत् सुतो गिरिजायां वै भूत्वा तं दानवाधमम् ॥ ३४ ॥

हनिष्यति न संदेहो गम्यतामासु(शु?) मा चिरम् ॥

सूत उवाच ॥

इति धातुवचः श्रुत्वा वृहस्पतिपुरोगमाः ॥ ३५ ॥

देवा हरस्य शरणं ते जग्मुर्नृपसत्तम ॥
ततः काम(मं?)पुरस्कृत्य देवाः सिद्धगणैः सह ॥ ३६ ॥

तुष्टुवुस्तं मृडानीशं महाकालोपमं प्रभुम् ॥

देवा ऊचुः ॥

नमो विशालाय महाप्रभाय हराय गर्भाय शिवाय तुभ्यम् ॥ ३७ ॥

नमोस्तु देवाय रविप्रभाय रविस्तुता या भवकालहन्त्रे ॥
कालाय काले(ना?)पि संस्तुताय मृत्युञ्जयायाखिलयोगमूर्त्ते ॥ ३८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवाय वेदान्तपथाय शम्भो पाहि त्वमस्मान् वरदोसि देव ॥

सूत उवाच ॥

देवानां वचनं श्रुत्वा दृष्टिभिस्तान् ददर्श ह ॥ ३९ ॥

ददाह कामं राजर्षे दृष्टिपातान्महेश्वरः ॥
दग्ध्वा कामं सकामोभूद्देवेशो देवतैस्तुतः ॥ ४० ॥

भस्मोद्धूलितसर्वाङ्गनागमालाविराजितः ॥
ततोवाच स देवेशः सकलान् देवतागणान् ॥ ४१ ॥

प्राप्ता यूयं महाभागा वृहस्पतिपुरोगमाः ॥
केनात्महेतुना सर्वे कथ्यतां मा विलम्ब्यताम् ॥ ४२ ॥

सूत उवाच ॥

रुद्रस्य वचनं श्रुत्वा देवाः सेन्द्रादयो हि ते ॥
कथयामासुस्तत्सर्वं तारकासुरचेष्टितम् ॥ ४३ ॥

देवा ऊचुः ॥

नमस्ते देवदेवेशस्तारकेन जिता वयम् ॥
तस्य नाशाय देवेश चिन्त्यतां देववल्लभः(भ ?) ॥ ४४ ॥

गृहाण कालीं कालीश संभूतां हिमपर्वते ॥ ४५ ॥

त्वत्पादनिरतां देवीं(वी ?)मवतीर्णा हिमाचले ॥ ४५ ॥

समुत्पाद्य सुतं तस्यां नाशस्तस्य विधीयताम् ॥

सूत उवाच ॥

तथेत्युक्त्वा स देवेशो मदनाविष्टमानसः ॥ ४६ ॥

चकार गौरि(री ?)ग्रहणे मतिं मतिमतां वरः ॥
ध्यापयामास धातारं गौरीमिलनकारकम् ॥ ४७ ॥

स्मृत्वा स्मृत्वा स देवेशो गौरी(रीं?)गौरमुखीं तदा ॥
यावध्यातः स्वयं ब्रह्मा तावत्तस्याग्रतः स्थितः ॥ ४८ ॥

उवाच किं करिष्यामि कथयस्व महेश्वरम्(र ?) ॥
ततोवाच विधातारं स्मयन्निव हरः स्वयम् ॥ ४९ ॥

हिमाद्रिभवनं ब्रह्मन् गम्यतां यदि रोचते ॥
मदर्थे गिरिजां देवीं याचयस्व समाहितः ॥ ५० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत उवाच ॥

ततः शिवस्य वचनाद् ब्रह्मा लोकपितामहः ॥
हिमालयं महाराज जगाम हिमसेवितम् ॥ ५१ ॥

ततो हिमाद्रि ब्र(ब्रं)ह्माण दृष्ट्वा चोत्थाय सत्वरम् ॥
पूजयामास देवेशं तुष्टा च(व ?) प्रयताञ्जलिः ॥ ५२ ॥

हिमालय उवाच ॥

नमामि पादयुगलं ब्रह्मर्षिगणसेवितम् ॥
अथघ्नं लोकपालानां शिवदं शिवसेवितम् ॥ ५३ ॥

अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥
कृतार्थोस्म्यद्य देवेश पूतोस्मि तव दर्शनात् ॥ ५४ ॥

धन्योस्म्यनुगृहीतोस्मि विधेस्त्वत्पादसेवनात् ॥
मामाज्ञापय वै ब्रह्मन् भृत्यं त्वत्पादसेवकम् ॥ ५५ ॥

किं करोमि वद ब्रह्मननुग्राह्योस्मि ते यदि ॥

ब्रह्मोवाच ॥

शृणु त्वं गिरिराजेश वचनं मदुदाहृतम् ॥ ५६ ॥

त्वत्समो नास्ति गिरयो विंध्याद्यापि न संशयः ॥
पूजयस्त्व(पूज्यस्त्वं?)मानुषे लोके गिरीणां नात्र संशयः ॥ ५७ ॥

तस्माद्विज्ञापयिष्यामि वचनं यदि मन्यसे ॥
प्रयछ(च्छ ?) गिरिजां देवीं अवतीर्णा गृहे तव ॥ ५८ ॥

महाभागां दक्षसुतां महेशाय महामते ॥
नान्यं हि वरमेतस्या योग्यमस्ति गिरीश्वर ॥ ५९ ॥

तस्यापि सदृशी भार्य्या नान्यास्ति भुवनत्रये ॥
तस्मात्प्रयच्छ गिरिजां महेशाय महामते ॥ ६० ॥

ततस्त्वं श्रेयमाप्नोति ददस्व वचनां(नान्?)मम ॥
सर्वदेवेषु यो देव(वो ?) महादेव इतीरितः ॥ ६१ ॥

मानयत्वं महाभाग ददस्व गिरिकन्यकाम् ॥

सूत उवाच ॥

हिमाद्रिर्ब्रह्मवचनं श्रुत्वा धैर्यसमन्वितः ॥ ६२ ॥
उवाच वचनं राजन् बृहस्पतिरिव स्वयम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाद्रिरुवाच ॥

धन्योस्मि देवदेवेश यत्त्वया भाषितोस्म्यहम् ॥ ६३ ॥

दास्यामि गिरिजां ब्रह्मन् महादेवाय शूलिने ॥
क्रियतां भूषणं सत्रं शाला चैव विरच्यताम् ॥ ६४ ॥

सूत उवाच ॥

हिमाद्रेर्वचनं श्रुत्वा महादेवस्य संनिधौ ॥
प्रत्याजगाम राजर्षे ब्रह्मा ब्रह्मर्षिसेवितः ॥ ६५ ॥

कथयामास वै ब्रह्मा हिमाद्रेर्वचनं शुभम् ॥
उपविश्यासने शुद्धे देवर्षिगणसेविते ॥ ६६ ॥

जगाद वाणीं धर्मात्मा दत्ता कन्येति वै प्रभो ॥
विवाहं रोचते मह्यं तव तस्यापि शङ्कर ॥ ६७ ॥

ततो देवाः सगन्धर्वा[ः] सुखिनोपि भवन्ति हि ॥

सत उवाच ॥

धातु[ः] समीरितं श्रुत्वा शङ्करो लोकशङ्करः ॥ ६८ ॥

ऊचे वाणी(णीं?) स मधुरां शुद्धदन्ताग्रमध्यगाम् ॥

शिव उवाच ॥

आहूय विश्वकर्माणं शिल्पज्ञं कारुनायकम् ॥ ६९ ॥

रच्यन्तां यज्ञपात्राणि शुभानि भूषणानि च ॥
विनायकस्य पूजार्थं विधिश्चापि विरच्यताम् ॥ ७० ॥

अमङ्गल्यविघातार्थं पूजयामि गणेश्वरम् ॥
अनभ्यर्च्य गणेशानं मया काली विवाहिता ॥ ७१ ॥

कालेन कालवशगा जाता साप्यजरामरा ॥
अस्मिन् हेतौ मयान्पू(मया पू?)र्वं कामदेवो विनाशितः ॥ ७२ ॥

तस्माद्वैनायकी शान्तिः कर्त्तव्यास्माभि वै(र्वै ?) तथा ॥
तस्माद्विनायकः पूर्वं कार्य्यो वै विश्वकर्मणा ॥ ७३ ॥

सूत उवाच ॥

शिवेरितं समाकर्ण्य ब्रह्मा लोकपितामह[ः] ॥
पुनर्विज्ञापयामास शिवलोकः (शिवं लोक?) शिवप्रदम् ॥ ७४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मोवाच ॥

एतद्विरोचते मह्यं तथोक्तं भवता विभो ॥
नाशोयं कामदेवस्य मा भूयाच्छकर प्रभो ॥ ७५ ॥

प्रनष्टे कामदेवे तु भविष्यन्त्यप्रजा जनाः ॥
तस्मात् कामसमुत्पत्ति[मृ] कुरुष्व परमेश्वर ॥ ७६ ॥

ततो वैनायकी शान्तिमृषिभिः सह ऋत्विजैः ॥
मया सह महाभाग क्रियतामाशु मा चिरम् ॥ ७७ ॥

सूत उवाच ॥

तथेत्युक्तो भगवता शिवेन करुणात्मना ॥
हृदि स्थापितकामेन ब्रह्मा लोकपितामहः ॥ ७८ ॥

आहूय विश्वकर्माणं शिल्पज्ञं शिल्पनायकम् ॥
प्रतिमां कारयामास गणेशस्य महामते ॥ ७९ ॥

अप्राप्तजननस्यास्य गण(णा?)नां नायकस्य च ॥
ततः स कारयामास भूषणानि शुभानि च ॥ ८० ॥

तथैव यज्ञपात्राणि स्तम्भानि विविधानि च ॥
ततो निवेदयद्धाता महेशाय महात्मने ॥ ८१ ॥

गणेशप्रतिमां दिव्यां स्तम्भानि भूषणानि च ॥
दृष्ट्वा स देवदेवेशस्सामग्रीं समुपस्थिताम् ॥ ८२ ॥

विलिप्य स चिताभस्म धृत्वा एणाजिनं शुभम् ॥
नागानां वलयं कृत्वा . धृत्वा शूलं तदा प्रभो ॥ ८३ ॥

नृ(?) करोति शतैर्युक्तां ग्रथितां प्राणतन्तुभिः ॥
धृत्वा मालां स देवेश आरुह्य वृषभं स्वकम् ॥ ८४ ॥

नन्दिभृङ्गिकिरीटिभिः परिवारैर्विराजितः ॥
हिमालयं महाराज ययौ ब्रह्मसहायवान् ॥ ८५ ॥

गत्वा गिरिन्द्रभवनान्नाति दूरे महामते ॥
विवेश ब्रह्मणा सार्द्धं गोमत्या दक्षिणे गिरे[ः] ॥ ८६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आजुहाव ऋषीन् सर्वा(न) वशिष्ठाद्याननन्तरम् ॥
शिवाहूतास्तु हृ(ऋ?)षयस्ते जग्मुः शिवसन्निधौ ॥ ८७ ॥

ततस्तैर्ऋषिभिः सार्द्धं ब्रह्माद्यैर्वेदवल्लभैः ॥
स्थापयामास प्रतिमां गणेशस्य तपोधनाः ॥ ८८ ॥

धात्रा प्रतिष्ठितां पुण्यां निर्मितां विश्वकर्मणाम्(णा?) ॥
स्थापितां तां महाराज पूजयामास शङ्करः ॥ ८९ ॥

पञ्चामृतैः ज(तैर्ज?)लैः पुण्यैः कुसुमैः सुमनोहरैः ॥
मोदकैर्घृतयुक्तैश्च तथा दूर्वाङ्कुरैरपि ॥ ९० ॥

ततस्तं प्रार्थयामास ऋषिभिर्ब्रह्मणा सह ॥

महेश उवाच ॥

नमो नमस्ते गणनायकाय देवैः समस्तैरपि संस्तुताय ॥ ९१ ॥

प्रधानरूपाय वरप्रदाय तस्मै नमस्ते गिरिजासुताय ॥
कुरुष्व देव्या मम चैव सङ्गमे निर्विघ्नमेकं वरदोसि नायक ॥ ९२ ॥

देवीं च शुभ्रूं मम सेवकां ततः कुरुष्व ब्रह्मादिभिः संस्तुतः प्रभो ॥ ९३ ॥

सूत उवाच ॥

एवं स्तुत्वा भवानीशो गणेशं नृपसत्तम ॥
चक्रे वैनायकीं शान्ति ऋत्विजैर्वेदवादिभिः ॥ ९४ ॥

वेदवेदान्तपथगैर्धात्रा चैवोपदेशितैः ॥
समाप्य शान्ति राजर्षे हुत्वा चाग्निं प्रयत्नतः ॥ ९५ ॥

गणाध्यक्षायेति नत्वा स्तुत्वा चैव पुनः पुनः ॥
जगाम गोमतीतीरे गारुडोसङ्गशोभिते ॥ ९६ ॥

ततः प्रभृति राजेन्द्र गणनाथान्वितं गिरिम् ॥
स्तुवन्ति मुनयः सर्वे गणाध्यक्षेति तं शुभम् ॥ ९७ ॥

प्राप्य तद् गोमतीतीरं शिवो ब्रह्माणमब्रवीत् ॥
गम्यतां पर्वतगिरं हिमसीकरशोभितम् ॥ ९८ ॥

कथ्यता(तां?)मामिह प्राप्तं बध्वा कौतुकमङ्गलम् ॥
ततः शिवस्य वचनाद् ब्रह्मा ब्रह्मर्षिसेवितः ॥ ९९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनर्जगाम भवनं पर्वतस्य महात्मनः ॥
तमासनं ददौ प्रीतो हिमाद्रिः स सुतान्वितः ॥ १०० ॥

पप्रच्छ च तदा राजन् ब्रह्माणममितौजसम् ॥
ब्रूयतां भगवन् शीघ्रं महेशचरितं शुभम् ॥ १०१ ॥

ततोवाच जगद्धाता हिमाद्रिं राजसत्तमः(म?) ॥

ब्रह्मोवाच ॥

श्रृणुष्व पर्वतश्रेष्ठ वचनम्मे उदाहृतम् ॥ १०२ ॥

कृत्वा चोद्वाहिकं सर्वं समग्रमतिशोभनम् ॥
साम्प्रतं गोमतीतीरे बध्वा कौतुकमङ्गलम् ॥ १०३ ॥

प्राप्य चाधिप(त्य?)कां तेद्य शोभिता(तां?) गारुडीजलैः ॥
स्थितः स देवदेवेशस्त्रिशूलकरभूषणः ॥ १०४ ॥

तमाद्यं पार्वतीनाथं पार्वती(तीं?) पर्वतोत्तमः ॥
प्रयच्छद् गृहसम्प्राप्तं अर्घ्यादिभिः समन्वितः ॥ १०५ ॥

अलङ्काराणि सर्वाणि त्वष्टुर्विरचितानि च ॥
इमानि पर्वतश्रेष्ठ गृहाण परिधापय ॥ १०६ ॥

अलङ्काराणि सर्वाणि वामान्सि(सांसि?) विविधानि च ॥
गृहीत्वा राजशार्दूल कन्यका भवनं प्रति ॥ १०७ ॥

जगाम पर्वतः श्रेष्ठो मैनाकेन समन्वितः ॥
गत्वा तां कन्यकां देवीं उवाच वदतां वरः ॥ १०८ ॥

पर्वत उवाच ॥

श्रृणु भद्रे महाभागे चार्वास्ये चारुवर्णिनि ॥
भूषणानि गृहाण त्वं त्वं भूषय स्वकं तनुम् ॥ १०९ ॥

वस्त्राणि चापि योग्यानि तन्तुक्षौममयानि च ॥
परिधापय वै शुभ्रू हराय त्वां ददाम्यहम् ॥ ११० ॥

स योज्ञ(ग्य?)स्ते पतिर्नान्यो भवितुमर्हसि शोभने ॥

सूत उवाच ॥

इति श्रुत्वा पितुर्वाक्यं सा देवी हृष्टमानसा ॥ १११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूषयामास स्वं देहं मेने योग्यं पतिं हि तम् ॥
ततो हिमाद्रिस्तां देवीं सर्वालङ्कारसंयुताम् ॥ ११२ ॥

दातुं हि देवदेवाय मैनाकेन समन्वितः ॥
अर्घ्यादिकरणैर्युक्तां नीत्वा कन्यां महामते ॥ ११३ ॥

प्रत्युज्जगाम गिरिशं गिरिराजो महामते ॥
अर्घमाचमनीयं वै दत्वा तस्मै नृपोत्तम ॥ ११४ ॥

स तं निवेशयामास औषधीनां शुभासने ॥
ऋषिभिः सह राजर्षे वेदवेदान्तपारगैः ॥ ११५ ॥

वेदमन्त्रैश्च तं राजन्[औषधीनां शुभासने ॥
ऋषिभिः सह राजर्षे वेदवेदान्तपारगैः ॥ ११६ ॥]

तं(तां?) तत्र वेशयामास राजन् पर्वतनायकः ॥
ततस्तां चारुवदनां कन्यां रत्नसमन्विताम् ॥ ११७ ॥

हराय राजशार्दूल समुत्सृज्य ददौ गिरिः ॥
ततस्तु पाणिग्रहणं चकार गिरिजाधिपः ॥ ११८ ॥

देव्या हिमाद्रिणा दत्तं रत्नकङ्कणशोभितम् ॥
ततः स रोपयामास ब्रह्मा लोकपितामहः ॥ ११९ ॥

औद्वाहिकमहत्स्तम्भा[न्] शुभान् मङ्गलकारकान् ॥
ततः स कारयामास वरवध्वोः सुमङ्गलम् ॥ १२० ॥

ऋत्विजैः ऋषिभिः सार्द्धं विधिदृष्टेन कर्मणा ॥
दिवि दुन्दुभयो नेदुर्निपेतु[ः] पुष्पवृष्टयः ॥ १२१ ॥

जयशब्दपुरस्कृत्य सर्वमङ्गलपाणयः ॥
देवास्तयोर्विवाहं वै ददृशुः स्वस्थमानसा[ः] ॥ १२२ ॥

जगुर्गन्धर्वपतयो मृदङ्गानकपाणयः ॥
तष्टुवुर्देवगन्धर्वा ननृतुश्चाप्सरोगणा[ः] ॥ १२३ ॥

ततो हिमाद्रिःस्तं देवं प्रार्थयामास भूपते ॥
हिमालय उवाच ॥
त्राहि मां देवदेवेश पुनीहि परमेश्वर ॥ १२४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणोपार्जितं पापं नाशयस्व न संशयः ॥
महादेव उवाच ॥
यथा हि पूज्यते लोकैस्तथा पूज्यो भवानिह ॥ १२५ ॥

भविष्यसि महाभाग मत्प्रसादान्न संशयः ॥
स्वति तेस्तु महाभाग गम्यतां भवनं प्रति ॥ १२६ ॥

पूज्यो भव सदा लोकैर्मत्प्रसादान्न संशयः ॥
सूत उवाच ॥
नत्वा तं पार्वतीनाथं परिक्रम्याभिवाद्य च ॥ १२७ ॥

जगाम स्वगृहं पुण्यं हिमाद्रिः स सुतान्वितः ॥
ब्रह्मब्रह्मर्षिभिः सार्द्धं विशिष्टाद्यैर्नरेश्वर ॥ १२८ ॥

जगाम ब्रह्मभवनं नत्वा देवेश्वरं हरम् ॥
शिवोपि राजशार्दूल भवान्या स समन्वितः ॥ १२९ ॥

निजनामाङ्कितं लिङ्गं देव्या नन्दिसमन्वितम् ॥
संस्थाप्य राजशार्दूल ययौ केदारमण्डलम् ॥ १३० ॥

नन्दिस्कन्दिकिरीटिभिर्देव्या चापि समन्वितः ॥
तथान्यैः परिवारैश्च सर्वदा स विराजितः ॥ १३१ ॥

ततः प्रभृति राजेन्द्र गत्वा केदारमण्डलम् ॥
रेमे गिरिजया सार्द्धं दैवतैरपि पूजितः ॥ १३२ ॥

ततस्तु गारुडीमध्ये गोमत्यास्तु तथैव च ॥
ऋषीणां वेदपठनाद् औषधीनां समासनात् ॥ १३३ ॥

वैद्यनाथेति तं देवं तुष्टुवुर्द्देवतागणाः ॥
इदं पवित्रं परमं रहस्यं देव्या महेशस्य विवाहकीर्त्तनम् ॥ १३४ ॥
कुर्वन्ति ये भारत देवपूज्या भवन्ति सम्प्राप्य गृहं शिवस्य ॥

॥ इति श्रीस्कन्दपुराणे मानसखण्डे गौरीमहेशविवाहवर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७

जन्मे(नमे?)जय उवाच ॥

कथितं हि त्वया ब्रह्मन् विवाहचरितं शुभम् ॥
हिमाद्रिचरितं पुण्यं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥

सूत उवाच ॥

धन्योसि राजशार्दूल यत्त्वं पृच्छसि शोभनम् ॥
हिमाद्रिचरितं पुण्यं दुःकृतानां विनाशनम् ॥ २ ॥

कथयामि महाराज कृष्णद्वैपायनेरितम् ॥
पुण्यदं पुण्यकीर्त्तीनां धर्मंकामार्थदं शुभम् ॥ ३ ॥

ऋषयो हि महाभागाः कृष्णद्वैपायनं गुरुम् ॥
संपूज्य राजशार्दूल पप्रच्छुः शुभलक्षणः(णाः?) ॥ ४ ॥

ऋषय ऊचुः ॥

कथितं भवता ब्रह्मन् पुण्याख्यानं सुविस्तरम् ॥
गौरीविवाहचरितं धरायाश्चरितं महत् ॥ ५ ॥

यत्त्वया प्रथमः ख्यातो हिमाद्रिर्द्विजसत्तमः(म?) ॥
खण्डैः सुपुण्यैः संयुक्तो गणगन्धर्वसेवितः ॥ ६ ॥

यत्र जाता जगद्धात्री चण्डिका चण्डविक्रमा ॥
भवस्य वल्लभा साध्वी पूजिता दैवतैरपि ॥ ७ ॥

यत्र वै देवदेवस्य वासः समनुवर्णितः ॥
दैवतैर्गणगन्धर्वैः सेवितस्यार्थंदस्य च ॥ ८ ॥

हिमाचलस्य व्याख्यानं श्रोतुमिच्छामहे गुरो ॥

व्यास उवाच ॥

शृणुध्वं हि महाभागा हिमाद्रिचरितं शुभम् ॥ ९ ॥

धर्मार्थंकाममोक्षाणां हेतुभूतं शिवान्वितम् ॥
देवतागणगन्धर्वाः सिद्धविद्याधरोरगाः ॥ १० ॥

ऋषयो हि महाभागाः सेवते यं गिरीश्वरम् ॥
गुहासु चातिपुण्यासु पूजितं शिवकिंकरैः ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमहं कथयिष्यामि शिवास्पदसमन्वितम् ॥
हिमसीकरसंसिक्तं यं दृष्ट्वा पापकोटयः ॥ १२ ॥

दूरादेव विलीयन्ते हिमानी(नि?)व दिनोदये ॥
हिमान्वितं हि यन्नाम श्रुत्वा ब्रह्मवधादपि ॥ १३ ॥

मुच्यन्ते ऋषिशार्दूलाः कोन्यस्तस्माद् गिरीश्वरात् ॥
अथाहं कथयिष्यामि कथ्यमानां कथामिमाम् ॥ १४ ॥

पठतां शृण्वतां चैव सर्वपापप्रणाशिनी(नीम्?) ॥
दत्तेन कथिता ब्रह्मन् काशिराजाय धीमते ॥ १५ ॥

हिमाद्रिगुणसंयुक्तो(क्तां?) शिवाख्यानसमन्विताम् ॥
दैवतैरपि संगीतां मानवानां शुभार्थदाम् ॥ १६ ॥

दत्तात्र(त्रे?)येति विख्यातो त्यक्त्वा सह्याचलं द्विजा[:]॥
ज्ञात्वा हिमालयं पुण्यं जगाम हिमसेवितम् ॥ १७ ॥

सरोवरजलैः पुण्यं शीतलानिलसेवितम् ॥
भूर्ज्जादिवृक्षसंकीर्णं स्वर्णाकरविराजितम् ॥ १८ ॥

मृगसृङ्गालसिंहैश्च वसामेदाशिभिर्वृतम् ॥
शार्द्दूलशब्दाभिरुतं पक्षिसंघैर्विराजितम् ॥ १९ ॥

रजताकरसंपूर्णगैरिकादिविराजितम् ॥
किरातैश्चापि सम्पूर्णं वनौषधिसमन्वितम् ॥ २० ॥

गत्वा तमृषिशार्दूला ददर्श गिरिसत्तमः(मम्?) ॥
हिमैर्बहुविधैः कीर्णं गुहाभिश्च विराजितम् ॥ २१ ॥

दृष्ट्वा तमागतं दत्तं प्रत्युत्थाय गिरीश्वरः ॥
धन्योस्म्यनुगृहीतोस्मि कृतार्थोस्मि तपोधनः(न?) ॥ २२ ॥

पूजयामास विधिवत् विधिदृष्टेन कर्मणा ॥
अर्घमाचमनीयं वै निवेष(द्य?) नृपसत्तमः(म?) ॥ २३ ॥

पप्रच्छ(च्छा?)नामयं तस्मै योगीशाय महात्मने ॥
उपविश्यासने शुभ्रे तमुवाच गिरीश्वरः ॥ २४ ॥

धन्योस्म्यनुगृहीतोस्मि कृतार्थोऽस्मि तपोधनः(न?) ॥
त्वत्पादयुगले नाथ पतितं मे गृहं ऋषे ॥ २५ ॥

मयोपाहृतमन्नं वै भुज्यतामृषिसत्तम ॥
कथ्यतां सुप्रिया वार्त्ता येन प्राप्ता(प्तो?)सि मामिह ॥ २६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास उवाच ॥

भुक्त्वा तदन्नं सुप्रीतो वचनं तमुवाच ह ॥
प्रीतियुक्तं सुसम्पन्नं देवतानां सुपूजितम् ॥ २७ ॥

दत्त उवाच ॥

त्वत्समा नास्ति गिरयो विंद्या(न्ध्या?)द्याः शुभलक्षणाः ॥
नदीभिर्बहुभिर्युक्ताः पूजिता दैवतैरपि ॥ २८ ॥
यस्मिन् त्वयि महाभाग शिवावास(सं?)शिवार्थदम् ॥ २९ ॥

वर्तते पर्वतश्रेष्ठ कोस्ति त्वत्तोधिको भुवि ॥
तव कुक्षे(क्षौ?) गिरिश्रेष्ठ लिंगस्य पतनं शुभम् ॥ ३० ॥
गिरिजाया विवाहं च श्रुत्वा त्वमिहमागतः ॥
द्रष्टुं त्वद्विभवं सर्वं तथा तीर्थानि तेधुना ॥ ३१ ॥
तथाकराणि सर्वाणि शिवलिङ्गानि वै तथा ॥
ज्ञात्वा त्वां देवसदृशं देवरूपधरं गिरिम् ॥ ३२ ॥
नमन्ति गिरयः सर्वे विन्ध्याद्या(द्यास्?)त्वान्न संशयः ॥
अहमप्यमितप्रज्ञ देवरूपधरं गिरिम् ॥ ३३ ॥
स्वधोपर्यं(?) हिमयुतं नमामि त्वां हिमालयम् ॥
दर्शयस्व स्वतीर्थानि शिवलिङ्गयुतानि च ॥ ३४ ॥
हिमशीकरपूतानि स्वशरीराणि वै गिरे ॥
दर्शयस्य स्वभवने गुहाः कान्ताः सुशोभनाः ॥ ३५ ॥
शिवलिङ्गयुताः सर्वाः तथा किन्नरशोभिता[:] ॥
तथाकराणि सर्वाणि स्वर्णरौप्यान्वितानि च ॥ ३६ ॥
गैरिकादिभियु(र्यु?)क्तानि दर्शयस्व गिरीश्वरः(र?)॥

व्यास उवाच ॥

ततो दत्तस्य वचनाद्धिमाद्रिस्फुल्ललोचन[:] ॥ ३७ ॥
स तं प्रदर्शयामास मानसाख्यं सरोवरम् ॥
ब्रह्मणा निर्मितं साक्षात्तीर्थैर्बहुभि[:]सम्वृतम् ॥ ३८ ॥
ऋषीणामाश्रमैर्युक्तं गुहाभिर्बद्ध(हु?)भिर्युतम् ॥
तन्मध्ये देवदेवस्य लिङ्गं स्वर्णमयं शुभम् ॥ ४० ॥
राजहंसस्वरूपेण दर्शयन्तं शुभं वपुः ॥
तं दृष्ट्वा देवदेवेशं परिचक्राम मानसम् ॥ ४१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञापयामास तीर्थेषु पूतेषु च सरित्सु च ॥
ततस्तं दर्शयामास गुहासु शंकरं प्रभुम् ॥ ४२ ॥

रिरं(रमं?)तं गिरिजया सार्द्धं पूजितं गणनायकैः ॥
ब्रह्माविष्ण्वादिभिर्देवैरचि(र्चि?)तं देवनायकैः ॥ ४३ ॥

गाङ्गेयजलसंयुक्तं सेवितं चाप्सरोगणैः ॥
ततस्तं दर्शयामास हिमाद्रि[ः]फुल्ललोचनः ॥ ४४ ॥

विष्णुपादोद्भवां शुक्लां कैलासभवनाच्युताम् ॥
पतन्ती(न्तीं?) मानसक्षेत्रे गंगासागरतारिणीम् ॥ ४५ ॥

विष्णुपादाङ्कितां भूमिं दर्शयामास तं ततः ॥
ब्रह्मादिभिर्विष्णुगणैः सेवितां पुण्यकाननाम् ॥ ४६ ॥

कपालेनाङ्कितां शुद्धां ब्रह्मणः परमेष्ठिनः ॥
सप्तर्षिसेवितां तत्र प्रजापतिविनिर्मिताम् ॥ ४७ ॥

परिक्रम्य मानसं राजन् सर्वभूतसुखावहम् ॥
दर्शितं गिरिराजेन गुहातीर्थसमन्वितम् ॥ ४८ ॥

हिमाद्रिदर्शितं राजन् ततः कैलाशपर्वतम् ॥
जगाम दत्तो भगवान् शिवकिंकरसेवितम् ॥ ४९ ॥

ददर्श तत्र देवेशं गन्धर्वगणसेवितम् ॥
रुद्रकन्यासमाकीर्णं देवराजमिव श्रिया ॥ ५० ॥

दीर्यंतं निजतेजोभिर्हुतमग्निमिवेधसाम् ॥
सेवितं पार्षदगणैः सिद्धविद्याधरोरगैः ॥ ५१ ॥

पूजितं गिरिजया सार्द्धं ब्रह्माविष्णवादिभिः सुरैः ॥
पूजयामास गिरिशं दत्तात्रेयो महातपाः ॥ ५२ ॥

योगैर्विधानैर्बहुभिः स्तवैर्गीतान्वितैरपि ॥
तुष्टाव तं शिवं राज(न्)गीर्भि(र्)दत्तो महातपाः ॥ ५३ ॥

संवाद्य वीणामुरजं मृदङ्गं वाप्यनेकशः ॥

दत्त उवाच ॥

नमस्ते व्युप्तकेशाय शितिकण्ठाय ते नमः ॥ ५४ ॥
पशूनां पतये तुभ्यं करालास्याय ते नमः ॥
महाभैरवरूपाय भैरवान्तकराय च ॥ ५५ ॥

नन्दिस्तुताय देवाय महादेवाय ते नमः ॥
कपर्दिने नमस्तुभ्यं त्वोग्ररूपधराय च ॥ ५६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालान्तकाय देवाय नमो विष्णुस्तुताय च ॥

व्यास उवाच ॥

दत्तेरिता(तां?) स्तुतिं श्रुत्वा प्रहसन् पञ्चभिर्मुखैः ॥ ५७ ॥
वरं वरय वै दत्तमत्रेति तमुवाच ह ॥
वव्रे वरं तदा दत्तरगम्या(?) मास्तु मे महि[ः] ॥ ५८ ॥
प्राप्य योगबलैश्वर्यं त्वत्तो वै शंकर प्रभो ॥
पप्रच्छ च तदा दत्तो महेशमृषिसत्तमाः ॥ ५९ ॥
सन्देहैर्बहुभिर्युक्तो नत्वा देवेश्वरं हरम् ॥

दत्त उवाच ॥ ६० ॥

सर्वेषां पर्वतानां वै पुण्या के गिरयः स्मृताः ॥
आवाशः(सः?)कुत्र ते शम्भो लोकैः समनुर्वर्णितः ॥ ६१ ॥
को हि भूमण्डले पूतः स्थलः समनुर्वर्णितः ॥
एतन्मे संशयं शम्भो छिन्धि कौतुककारकम् ॥ ६२ ॥

महेश उवाच ॥

अहमत्र च विन्ध्ये च वसामि मुनिसत्तमः(म?) ॥
तथेतरेषु खण्डेषु द्वीपेषु च सरित्सु च ॥ ६३ ॥
वसामि नात्र सन्देह[ः] समुद्रेषु नदेषु च ॥
तथाप्यहं कथयिष्यामि शृणुष्व मुनिसत्तमः ॥ ६४ ॥
हिमाद्रिभवनं पुण्यं न मया त्याजितं शुभम् ॥
न मया तत्स्थलं शुद्धं त्यक्तं कालेषु त्रिष्वपि ॥ ६५ ॥
नेतरे गिरयः पुण्यास्तस्मान्मे द्विजसत्तम ॥
प्रिया हिमाद्रिसदृशा नास्ति नास्ति भुवस्तले ॥ ६६ ॥
स्थितो स्थितोस्मि सुप्तोस्मि हिमाद्रौ योगिसत्तम ॥
यत्र मे पूज्यते देवैः शिरांसि हिमपर्वते ॥ ६७ ॥
मच्छि(च्छि?)रोत्तरभागे वै पूज्यते नन्दपर्वते ॥
विष्णुरेव महायोगिन् मया च ब्रह्मणा तथा ॥ ६८ ॥
तस्माद्धिमाद्रिसदृशा नेत्यन्या गिरयः शुभाः ॥
लिङ्गैर्बहुभि संकीर्णा नदीभिः समलंकृताः ॥ ६९ ॥
गच्छ पश्यस्व वै योगिन् हिमाद्रिं श्रेयमाप्नुहि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यास उवाच ॥ ७० ॥

ततः शिवस्य वचना(नान्?) नत्वा देवेश्वरं हरम् ॥
जगामोत्तरमार्गेण हिमाद्रिदर्शितेन च ॥ ७१ ॥

पुण्यं सरोवरं नाम जम्बुवृक्षफलोद्भवम् ॥
सेवितं पुष्पदन्ताद्यैर्गन्धर्वैर्वल्लकीयुतै[ः] ॥ ७२ ॥

दृष्ट्वा सरोवरं विप्रास्तथान्यांश्च सरोवरान् ॥
शिवलिङ्गान्वितान् कांश्चित् कांश्चिद्विष्णुसमन्विताम् ॥ ७३ ॥

ततो जगाम स ऋषिः शुद्धं केदारमण्डलम् ॥
गुहाभिश्चातिपुण्याभिः शोभितं सुमनोहरम् ॥ ७४ ॥

नरनारायणाख्याभ्यां गिरिभ्यां समलंकृतम् ॥
पूतं हि विष्णुपादाभ्यां सिक्तं मन्दाकिनीजलैः ॥ ७५ ॥

संपूज्य बदरीशं तं नारदादिसमन्वितम् ॥
श्रिया जुष्टं मणियुतं पार्षदैश्चापि सेवितम् ॥ ७६ ॥

तथा केदारसंज्ञो(ज्ञं?) वै संपूज्य च पुनः पुनः ॥
पुनर्जगाम राजर्षे हिमाद्रिभवनं प्रति ॥ ७७ ॥

ततस्तं दर्शयामास आकराणि च बहून्यपि ॥
स्वर्णान्वितानि साराणि गैरिकैः शोभितानि च ॥ ७८ ॥

तत्र दृष्ट्वा सुपुण्यानि हिमाद्रिदर्शितानि च ॥
शरांसि देवदेवस्य सेवितान्यप्सरोगणैः ॥ ७९ ॥

संपूज्य तानि राजर्षे हिमाद्रिप्रतिपूजितः ॥
दृष्ट्वा सर्वाणि तीर्थानि भुवि पातालगानि च ॥ ८० ॥

इमां गाथामगायन्वै दत्तात्रेयो महातपाः ॥
लोकसंपूजितो योगी धर्माख्यान्(न?) समन्विताम् ॥ ८१ ॥

अहो हिमाद्रेर्महिमानमद्भुतं दृष्टं मया पुण्यगुहासु शोभितम् ॥
यासु सुपुण्यासु महेन्द्रपूजितो विराजते देवपतिः स शंकरः ॥ ८२ ॥

प्रत्याजगाम राजर्षे काशीकाशीशशोभिताम् ॥
विश्वेश्वरस्य लिङ्गेन पूता(तां?) दुःकृततारिणीम् ॥ ८३ ॥

इदं पवित्रं परमं रहस्यं हिमाद्रिणा दत्तपथे प्रकाशितम् ॥
शृण्वन्ति ये शंकरवाणियुक्तं व्रजन्ति ते ब्रह्मपदं प्रशान्तम् ॥ ८४ ॥

इति श्रीस्कन्दपुराणे मानसखण्डे हिमा[द्रि?] चरितो नाम सप्तमोध्यायः ॥७॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

८

व्यास उवाच ॥

दत्तं समागतं श्रुत्वा काशीराजसुतो बली ॥
प्रत्याजगाम वै विप्रा दृष्टतीर्थं तपोनिधिम् ॥ १ ॥

धन्वन्तरीति विख्यातो देवब्राह्मणपूजकः ॥
पूजयामास तं योगीं तीर्थपूतं हरिप्रभुम् ॥ २ ॥

अभिषिक्तानि राजर्षे काशीराजपदे शुभे ॥
ददौ तमासनं शुभ्रं भोजयामास वै तथा ॥ ३ ॥

स तेन पूजितो राजंश्चोपविष्टः सुखासने ॥
स तस्मै नामयं सर्वंमप्रच्छद्योगिवल्लभम् ॥ ४ ॥

तेन पृष्टः स राजर्षिर्वचनं तमुवाच ह ॥
तव प्रसादाद्योगीश भव्य(व्यं?) मे समुपस्थितम् ॥ ५ ॥

वदन्ति मुनयः सर्वे वशिष्ठाद्यास्तपोनिधे ॥
राज्ञां चोत्तमवंश्यानां ब्रह्मायत्ता हि संपदः ॥ ६ ॥

त्वयि योगीश्वरे योगिन् ध्यानमार्गगते प्रभो ॥
संपदः सुखभोज्या वै न जाता विपदः क्वचित् ॥ ७ ॥

त्वया दृष्टानि वै ब्रह्मन् तीर्थानि विविधानि च ॥
सरित्सरांसि स्थानानि वाराणस्यादिकानि च ॥ ८ ॥

त्वामहं प्रष्टुमिच्छामि यद्यनुग्राह्यसि वै प्रभो ॥
ख्यातं योगपथैर्युक्तं अवतीर्णं दिवादिह ॥ ९ ॥

दत्त उवाच ॥

पृच्छस्व राजशार्दूल अपि गुह्यं वदामि ते ॥
ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ १० ॥

धन्वन्तरिरुवाच ॥

पृच्छामि ऋषिशार्दूल तीर्थानि कानि सन्ति वै ॥ ११ ॥

पवित्राणि सुपुण्यानि के दृष्टानि त्वयाधुना ॥
केन तीर्थेन वै विप्र सुलभा देवसंपदाः(दः?) ॥ १२ ॥

कथयस्व महाभाग मयि त्वत्पदवर्तिनी(नि?) ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दत्त उवाच ॥

साधु साधु महाभाग कथयामि न संशयः ॥ १३ ॥
त्वत्समा(मो?)नास्ति राजानः प्रजाभिश्चाप्यलंकृता[:] ॥
येन त्वया महाराज पुण्या वाराणसी पुरी ॥ १४ ॥
शासिता नीतियुक्तेन कोन्यस्त्वत्रो(त्तो?)नरेश्वरः ॥
किमन्यानीह तीर्थानि प्राप्य वाराणसीं पुरीम् ॥ १५ ॥
पृछ(च्छ?)सि त्वं महाराज कायक्लेशकराणि च ॥
काशीसमानि तीर्थानि कोटिकोटिशतानि च ॥ १६ ॥
न सन्ति नृपशार्दूल सत्यं सत्यं वदामि ते ॥
अहं काश्यां गमिष्यामि वशामि शिवसन्निधौ ॥ १७ ॥
यो ब्रूते स लभेद्राज[न्] शिवसायुज्यतां शुभाम् ॥
तस्मात् काशीं परित्यज्य किमन्यत् पृच्छसे प्रभो ॥ १८ ॥
यत्र कीटपतंगाद्या मृताः शिवपुरं प्रति ॥
व्रजन्ति राजशार्दूल त्यक्त्वा चेन्द्रपदं शुभम् ॥ १९ ॥
यत्र विश्वेश्वरो देवो जागर्ति मनुजेश्वर ॥
तस्मानान्यतमं स्थानं नास्ति लोकेषु त्रिष्वपि ॥ २० ॥
यत्र विष्णुपदोद्भूता गंगात्रिपथगामिनम्(नी?) ॥
दृश्यते राजशार्दूल कालेषु त्रिष्वपिस्तथा(?) ॥ २१ ॥
तस्मानान्यं स्थलं दिव्यं पश्यामि भुवनत्रये ॥
निश्चलो भव राजर्षे स्थित्वा काशी शिवप्रिया ॥ २२ ॥

व्यास उवाच ॥

ऋषेर्वाचं समाकर्ण्य स राजा स्वस्थमानसः ॥
पुनर्योगीश्वरं दत्तमुवाच वदतांवरः ॥ २३ ॥

धन्वन्तरिरुवाच ॥

सत्यमुक्तं महायोगिन् भवता नात्र संशयः ॥
काशीसमानि तीर्थानि नास्त्यन्यानि मया श्रुतम् ॥ २४ ॥
तथापि त्वामपृच्छामि(?) योगीशं योगिसत्तम ॥
काशीसमं तदधिकं कथयस्व द्विजोत्तम ॥ २५ ॥
यत्रेह लोकादमृतं प्राप्यते स्वर्गमेव हि ॥
यं दृष्ट्वा मानुषेनैव देहेन द्विजसत्तम ॥
प्राप्यते विष्णुभवनं पुरा(पुनरा?) वृत्तिदुर्लभम् ॥ २६ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तमहं श्रोतुमिच्छामि त्वत्तो नैवात्र संशयः ॥
दुर्ल्लभं मानुषे देहं स्मरामि द्विजसत्तमम् ॥ २७ ॥

मानुषेनैव देहेन यथाहं स्वर्गमाप्नुयात् ॥
वदन्ति पूर्वे राजानो देहे नैवामुना गुरोः ॥ २८ ॥

प्राप्ता ते केन मार्गेण कथयस्व न संशयः ॥

दत्त उवाच ॥

धन्योसि नृपशार्दूल यत्वं मुक्तिमिहेच्छसि ॥ २९ ॥

दुःप्राप्यो ऋषिभिश्चापि तथान्यैर्देवतागणैः ॥
मुक्ति सुदुर्ल्लभा मन्ये शृणु राजर्षिसत्तम ॥ ३० ॥

अदृष्ट्वा हिमसंसिक्ते हिमाद्रिं गिरिजागुरुम् ॥
यं स्मृत्वा हिमसंयुक्तं काशीवाससमं फलम् ॥ ३१ ॥

प्राप्यते राजशार्दूल योजनायुतदूरतः ॥
हिमाद्रिसदृशं पुण्यं स्थलं भूमण्डले क्वचित् ॥ ३२ ॥

नास्ति नास्ति महाराज सत्यं सत्यं वदाम्यहम् ॥
हिमं हिममिति ब्रूयाद् योजनायुतदूरगः ॥ ३३ ॥

स सर्वपापैर्मुच्येत विष्णुसायुज्यमश्नुतो(श्नुते?) ॥
अपि कीटपतङ्गाद्या[:] हिमं श्रुत्वा म्रियन्ति ये ॥ ३४ ॥

व्रजन्ति विष्णुभवनं पुनरावृत्तिदुर्ल्लभम् ॥
तस्माच्च ऋषिशार्दूलाः प्राणत्यागमुपस्थिते ॥ ३५ ॥

स्मरणीयं हिममिति हिममेव न संशयः ॥
यस्मिन् देशे हिमं नास्ति वक्तव्यं च हिमं हिमम् ॥ ३६ ॥

प्राणत्यागे समुत्पन्ने प्राणैः कण्ठगतैरपि ॥
दर्शनात् स्मरणा(णात्?)ध्यानाद्धिमस्य नृपसत्तमः ॥ ३७ ॥

प्राप्यते विष्णुभवनं नारदादिभिसेवितम् ॥
पुण्यं वक्तुं महाराज हिमाद्रिदर्शनोद्भवम् ॥ ३८ ॥

अहमप्यु(प्य?)समर्थोस्मि दिव्यैर्वर्षशतैरपि ॥
हिमाद्रेः पथमालम्ब्य राजानः सत्यसंज्ञके ॥ ३९ ॥

युगे देहेन पुण्येन गता विष्णुगृहं प्रति ॥
यत्र वै शिवलिङ्गं हि पतितं नृपसत्तम ॥ ४० ॥

यत्र विष्णुपदोद्भूता गंगात्रिपथगामिनी ॥
मृणालतन्तुसदृशी पतिता सा चतुर्विधा ॥ ४१ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्माद्धिमाद्रिसदृशं स्थलं भूमण्डले क्वचित् ॥
नास्ति नास्ति महाराज तथ्यं ते कथयाम्यहम् ॥ ४२ ॥

यत्र वै देवदेवस्य शंकरस्य शिरांसि हि ॥
हिमशीकरसिक्तानि दृश्यन्ते नृपसत्तम ॥ ४३ ॥

दृश्यन्ते राजशार्दूल स्थलेषु च जलेषु च ॥
गह्वरेषु च पुण्येषु शिवलिङ्गान्वितो गिरिः ॥ ४४ ॥

हिमाद्रिसदृशा[:] सर्वे नास्त्यन्यो गिरयो नृप ॥
विन्ध्याद्या मलययुता नदीभिश्चापि सेविता[:] ॥ ४५ ॥

खण्डैर्बहुविधैर्युक्तो हिमाद्रिः पुण्यलक्षणः ॥
दृश्यते राजशार्दूल शरैश्च समलङ्कृतः ॥ ४६ ॥

तत्राप्येकं गुह्यतमं कथयिष्यामि नृपोत्तम ॥
गिरिणा दर्शितं मह्यं मानसाख्यं सरोवरम् ॥ ४७ ॥

यत्र हंसस्वरूपेण जागर्ति शंकरः स्वयम् ॥
ब्रह्मणा निर्मितेनापि सरसा परिसेवितम् ॥ ४८ ॥

तस्मादन्यतमं स्थानं त्रिषु लोकेषु वै नृप ॥ ४९ ॥

पुण्यं पुण्यजलैर्युक्तं सेवितं शिवकिङ्करैः ॥
यस्मात्पुण्या महानद्यो गंगाद्या[:] नृपसत्तम ॥ ५० ॥

शरज्वा(य्वा?)द्यास्तथा पुण्याः संभूताः सरितास्वराः ॥
नदीनां च नदीनां च यमाद्यं प्रवदन्ति हि ॥ ५१ ॥

तन्मानसे महत्तीर्थं जानीहि नृपसत्तम ॥
य(यं?) स्मृत्वा योगिनः सर्वे ध्रुवाद्या नारदादयः ॥ ५२ ॥

संप्राप्ता विष्णुभवनं मार्कण्डेयादिसंस्तुतम् ॥
यं दृष्ट्वा ऋषयः सर्वे तथा वैण्यादयो नृपाः ॥ ५३ ॥

कलेवरेण स्वेनापि प्राप्ता विष्णुगृहं प्रति ॥
न पश्यामि महाभाग त्रैलोक्ये मानसं समम् ॥ ५४ ॥

तीर्थं भवादिसंयुक्त विष्णुपादाङ्कितं तथा ॥
भवन्ति मानवा राजन् यस्य मृत्तिकलेपनात् ॥ ५५ ॥

देवदेहा देवपूज्याः सेव्यमानाप्सरोगणैः ॥
यस्य स्नानान् महाराज त्यक्त्वा देहं हि मानुषम् ॥ ५६ ॥

भवन्ति ब्रह्मभवने ब्रह्मर्षिगणसेविताम् ॥
जलपानान् महाराज प्राप्य वै शाङ्करं पदम् ॥ ५७ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवन्ति वै शिवगणाः शिवकन्याभिसेवितम् ॥
सरोवरजलं राजन् कणमात्रं स्पृशन्ति ये ॥ ५८ ॥

शतजन्मार्जितं पापं नाशयन्ति न संशयः ॥
पुण्यं मानसनामं वै क्रमिकीटादयोपि हि ॥
श्रुत्वा ब्रह्मपदं शुद्धं व्रजन्ति नृपसत्तम ॥ ५९ ॥

प्राप्य वै मानसीं भूमिं मर्तुमिच्छन्ति ये जना[ः] ॥
ते वै विमानमारुह्य व्रजन्ति ब्रह्मणः पदम् ॥ ६० ॥

हिमसीकरसंसिक्तं जलं यः स्नाति मानवः ॥
स गंगास्नानसदृशं फलमाप्नोति मानवः ॥ ६१ ॥

किमु मानसतीर्थस्य वर्णनं नृप सत्तम ॥
वक्तुं वर्षशतैर्वापि न समर्थोस्मि नान्यथा ॥ ६२ ॥

मुक्ताफलसमं तोयं दृश्यते नृपसत्तम ॥
ताम्रधातुसमं यत्र सिकता सारसत्तमम् ॥ ६३ ॥

मानससदृशक्षेत्रं त्रिषु लोकेषु वै नृप ॥
नास्त्युसत्यं(?) मया प्रोक्तं जानीहि नृपसत्तम ॥ ६४ ॥

तस्माद्धिमाद्रिसदृशा नास्त्यन्या गिरयो नृपः(प?)॥
यत्र कैलाशशिखरं यत्र वै मानसः सरः ॥ ६५ ॥

स्मृत्वा हिमाद्रिशिखरं राजानस्तु कृते युगे ॥
गत्वा स्वेनैव देहेन गता ब्रह्मपदं प्रति ॥ ६६ ॥

हिमाद्रिसदृशा नान्ये गिरयः सन्ति वै नृप ॥
यत्र वै रुद्रदेवस्य विराजन्ते शिरांसि ह ॥ ६७ ॥

यस्य कक्षे महाराज शिवलिङ्गं तथाच्युतम् ॥
पूजितं देवगन्धर्वैर्ब्रह्माद्यै ऋषिभिस्तथा ॥ ६८ ॥

यत्र सुप्तः शिवः साक्षाद् भवान्या सह वै नृप ॥
घण्टाकर्णादिभिश्चान्यैः पार्षदैः सुविराजितः ॥ ६९ ॥

यत्र केदारमार्गेण योगभ्रष्टा हि योगिनः ॥
प्राप्योत्तरगिरिं राजन् शिवलिङ्गत्वतां गताः ॥ ७० ॥

हिमदर्शनजं पुण्यं वक्तुं वर्षशतैरपि ॥
न शक्नोमि महाराज किमु तत्पूजनं शुभम् ॥ ७१ ॥

हिमाद्रिमूलं(ल?) संस्पर्श(र्शात्) पदमात्रादपि प्रभो ॥
विलीयन्तेह पापानि हिमवद्भास्करोदये ॥ ७२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाधित्यगतां भूमिं दृष्ट्वा राजर्षिसत्तमः ॥
अपि कीटपतङ्गाद्या[:] व्रजन्ति ब्रा(ब्र?)ह्मणः पदम् ॥ ७३ ॥

संस्पृश्य नृपशार्दूल हिमाद्रिं पर्वतोत्तमम् ॥
व्याधाः किराताः पापिष्ठाः गता ब्रह्मपदं प्रति ॥ ७४ ॥

शिष(ख?)राणां हि माहात्म्यं वक्तुं राजर्षिसत्तम ॥
स्वयमेव हरः साक्षान्न शक्नोति न संशयः ॥ ७५ ॥

को हि मानसक्षेत्रस्य ब्रह्मणा रचितस्य च ॥
शिवलिङ्गान्वितस्यापि गाङ्गेयैः पूरितस्य च ॥ ७६ ॥

माहात्म्यं कथितुं राजन् स्वयमेव शतक्रतु[:] ॥
बृहस्पतियुतः साक्षा(न्) न शक्नोति न संशयः ॥ ७७ ॥

यं ब्रह्मा रचयामास मनसा मानसं सरस् ॥
माहात्म्यं तस्य कथितुं न शक्नोमि नरेश्वरः(र?) ॥ ७८ ॥

यस्य पूर्णे जलै राजन् जाताः सर्वे सरिद्वरा[:] ॥
गङ्गाद्या वेरिकां(?) ताश्च तथा पूर्णसरोवरा[:] ॥ ७९ ॥

यत्र पुण्यं तपस्तप्त्वा राजन् राजा भगीरथः ॥
आनयामास वै गङ्गा रथमार्गे न संशयः ॥ ८० ॥

यस्मात् पुण्या सरिच्छ्रेष्ठा शरयूलोकपाविनी ॥
वशिष्ठोद्दिष्टमार्गेण संभूता नृपसप्तम ॥ ८१ ॥

यस्मात् सुपुण्यदा नद्यो जाता वान्या नरोत्तम ॥
नानाविधैः पक्षिगणैर्मत्स्याद्यैरपि शोभिता[:] ॥ ८२ ॥

यस्य नामेन(?) राजर्षे मानसः खण्ड उच्यते ॥
तावत् खण्डं महाराज पूरितं मानसैर्जलैः[:] ॥ ८३ ॥

तस्य खण्डस्य मध्ये च मानसाख्यस्य वै तथा ॥
हिमाद्रिशिखराः पञ्च दृश्यन्ते नृपसत्तम ॥ ८४ ॥

तेभ्यो भागो हि विज्ञेयं खण्डानां नृपसप्तम ॥

इति श्रीस्कन्दपुराणे मानसखण्डे हिमाद्रौ मानसवर्णनं नामाष्टमोध्यायः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

९

व्यास उवाच ॥

इति दत्तवचः श्रुत्वा धन्वन्तरिर्नृपोत्तमः ॥
सरोवरसमुत्पत्तिं पप्रच्छ ऋषिसत्तमाः ॥ १ ॥

धन्वन्तरिरुवाच ॥

कथं हि मनसा ब्रह्मन् ब्रह्मा लोकपितामहः ॥
ससर्ज मानसं पुण्यं ब्रह्मर्षिगणसेवितम् ॥ २ ॥

दत्त उवाच ॥

श्रृणुष्व नृपशार्दूल कथ्यमानां मयाधुना ॥
मानसाख्यसमुत्पत्तिं विस्तरेण न संशयः ॥ ३ ॥

ज्ञात्वा कैलाशशिखरे देवदेवं शिवापतिम् ॥
गणैर्बहुभिः संयुक्तं रुद्रकन्याभिः सेवितम् ॥ ४ ॥

तथा हिमालयं पुण्यं देवगन्धर्वसेवितम् ॥
पुण्याश्रमसमायुक्तं हिमसीकरसेवितम् ॥ ५ ॥

स्मृत्वा ब्रह्मसुताः सर्वे मरीचिप्रमुखादयः ॥
कैलासाधित्यगां भूमिं तपस्तप्तुं प्रजग्मु हि ॥ ६ ॥

तत्र हंसस्वरूपेण ददृशुः शंकरं प्रभुम् ॥
सेवितं पार्षदगणैः पार्वत्या च समन्वितम् ॥ ७ ॥

तं तत्र पूजयामासुर्मरीचिप्रमुखादयः ॥
वैदिकेन विधानेन तान्त्रिकैर्नृपसत्तम ॥ ८ ॥

तत्र कान्तासु पुण्यासु गुहासु नृपसत्तम ॥
तेपिरे सुमहात्मानस्तपः परमदुष्करम् ॥ ९ ॥

तेषां तपस्यमानानामृषीणां नृपसत्तम ॥
ययुर्द्वादशवर्षाणि स्नात्वा मन्दाकिनीजलैः ॥ १० ॥

ततः कालेन महता ऋषयः सत्यवादिनः ॥
हिमर्तुं हि महाराज प्राप्तं दृष्ट्वा तपोधनाः ॥ ११ ॥

तथा पुण्या[न्] गिरीन् सर्वान् हिमेन परिपूरितान् ॥
बभूवुर्म्लानवदना[:] तपसा नृपसत्तमः ॥ १२ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्तुं मन्दाकिनी राजन् न शक्तः ब्रह्मणः सुताः ॥
खिद्यमाना महाराज दृष्ट्वा तन्निर्जलं स्थलम् ॥ १३ ॥

प्रजग्मुर्ब्रह्मभवनं देवेन्द्रप्रतिपूजितम् ॥
तत्र गत्वा विधातारं महेन्द्रप्रतिपूजितम् ॥ १४ ॥

तुष्टुवु ऋषय सर्वे मरीचिप्रमुखादयः ॥

ऋषय ऊचुः ॥

नमो ऋषीणां गुरवे ब्रह्मणेनन्तशक्तये ॥
सृष्टिस्थित्यन्तरूपेण सृष्टिस्थित्यन्तकरिणे ॥ १५ ॥

दत्त उवाच ॥

इति तेषां हि वचनं श्रुत्वा लोकपितामह[ः] ॥
उवाच वचनं राजनृषीणां हितकारकम् ॥ १६ ॥

ब्रह्मोवाच ॥

कथयध्वं महाभागा येन यूयमुपागता ॥
कारणं तदशेषेण भवतां खेदकारकम् ॥ १७ ॥

ऋषय ऊचुः ॥

त्वत्प्रसादेन वै ब्रह्मन् नास्ति दुःखानि साम्प्रतम् ॥
दैत्यानां दानवानां च राक्षसानांस्तथैव च ॥ १८ ॥

कैलासाधित्यगां भूमिं प्राप्य सर्वे तपस्विनः ॥
तपस्तपन्ति वै ब्रह्मन् स्नात्वा मन्दाकिनीजले ॥ १९ ॥

दृष्ट्वा हिमर्तुं सम्प्राप्तं मत्वा गङ्गा हि दूरगाम् ॥
खिद्यन्ति ऋषयः सर्वे जलहीना न संशयः ॥ २० ॥

इत्याचारविहीनास्मो वादिनो ब्राह्मणा विभो ॥
खिद्यन्त्यहर्निशं सर्वे कुलहीना यथा स्त्रियः ॥ २१ ॥

तेषामुपायं लोकेश चिन्त्यतां यदि रोचते ॥
येनोपायेन ते सर्वे भवन्ति सुखिनो द्विजाः ॥ २२ ॥

दत्त उवाच ॥

तथेत्युक्ता स भगवान् ब्रह्मा लोकपितामहः ॥ २३ ॥

मनसा मानसं क्षेत्रं ससर्जं नृपसत्तमः ॥
लिङ्गं तन्मध्यगं राजन् स्वर्णहंसमयं शुभम् ॥ २४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चकार स स्वयं ब्रह्मा मनसा हंससेवितम् ॥
गङ्गया पूरितं चक्रे विष्णुपादोपपन्नय(?) ॥ २५ ॥

राजन् प्रवाहबहुभिर्युक्तया मनसा प्रभुः ॥
निकाशरहितं राजन् गौरीकैलासमध्य(ध्यम?)म् ॥ २६ ॥

गाङ्गेयैश्च प्रवाहैर्वै चतुर्दशभिरलंकृतम् ॥
ससर्ज मनसा ब्रह्मा मानसाख्यं सरोवरम् ॥ २७ ॥

ऋषीणामाश्रमैः पुण्यैः सेवितं सुमनोहरैः ॥
मूलं तमेव राजर्षे सरितां स चकार ह ॥ २८ ॥

तथा नदानां शुद्धानां पूज्यानां दैवतैरपि ।
तस्य संचिन्तनाद् राजन् गंगाविष्णुपदोद्भवा ॥ २९ ॥

आविर्भूता सरिच्छ्रेष्ठा पुण्ये मानसरोवरे ॥
ततस्तानब्रवीद् ब्रह्मा मरीचिप्रमुखान् द्विजान् ॥ ३० ॥

गम्यतामाश्रमं पुण्यं तत्र सुखमवाप्स्यथ ॥
ततस्तु ब्रह्मवचनान् मरीचिप्रमुखादयः ॥ ३१ ॥

प्रजग्मुः स्वाश्रमं राजन् गुहाभिः समलङ्कृतम् ॥
ददृशुःस्ते तदा राजन् पुण्यं मानसरोवरम् ॥ ३२ ॥

तन्मध्ये शिवलिङ्गं च स्वर्णहंसमयं शुभम् ॥
ततस्ते निश्चला राजन् बभूवुर्ब्राह्मणोत्तमाः ॥ ३३ ॥

पुण्याश्रमसमायुक्ता[ः] ऋषिपत्नीभिरन्विता[ः] ॥
गुहासुकान्तिपुण्यासु स्नात्वा मानसरोवरे ॥ ३४ ॥

पूजयन् शंकरं राजंस्तस्थु[ः] सह पत्निभिः ॥
इदं पवित्रं परमं रहस्यं श्रीमानसाख्यस्य च सृष्टियुक्तम् ॥ ३५ ॥
शृण्वन्ति ये ब्रह्मपदं प्रयान्ति संसेवितां किन्नरनायकाभिः ॥

इति श्रीस्कन्दपुराणे मानसखण्डे सरोवरसमुत्पत्तिर्नाम नवमोध्यायः ॥ ९ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०

व्यास उवाच ॥

सरोवरसमुत्पत्तिं श्रुत्वा काशिपतिस्तदा ॥
पूजयित्वा ऋषिश्रेष्ठं पुनः पप्रच्छ धर्मवित् ॥ १ ॥

धन्वन्तरिरुवाच ॥

अगम्य रूपं हि गिरिं हिमालयं वदन्ति सर्वे मुनयः शुभव्रताः ॥
विलङ्घ्यतं पर्वतनायकं गुरो स केन मर्त्ये प्रकटीकृतं वद ॥ २ ॥

दत्त उवाच ॥

शृणु त्वं राजशार्दूल मयोक्तं शुभलक्षणम् ॥
पुराणवचनैर्युक्तं शुभैर्वेदविचारतैः ॥ ३ ॥

वैवश्वतकुले जातो मान्धाता नाम नामतः ॥
बभूव राजा मतिमान् प्रजापोषणतत्परः ॥ ४ ॥

धर्मात्मा सत्यवाग्दातो(न्तो?) धर्मो विग्रहवानिव ॥
स यागविरतो राजा बभूव नृपसत्तमः ॥ ५ ॥

कदाचिन्नृपशार्दूल तस्मै राज्ञे वसुन्धरा ॥
स्त्रीरूपधारिणी देवी भूभुजस्यान्तिकं गता ॥ ६ ॥

वव्रे सा तं तदा देवी राजानं मनुगोत्रजम् ॥
उपस्थिता महाराज निशीथे वरवर्णिनी ॥ ७ ॥

कामयामि न संदेहो हत्वा कामोपमं नृपम् ॥
दृष्ट्वा तां(त्वां?) राजशार्दूला(ल?)कामतप्तास्मि सम्प्रतम् ॥ ८ ॥

मान्धाता उवाच ॥

काशि(सि?)त्वं वै वरारोहे कामिनी कामनायिका ॥
देवानां दानवानां वै राक्षसा(साना?)मुतासुरी ॥ ९ ॥

वल्लभाश्च(च?) सिवा भद्रे नागानां तक्षकादिनाम् ॥
किमु त्वं मानुषाणां हि गन्धर्वाणां तथा शुभे ॥ १० ॥

वल्लभा ह्यसि भद्रं ते कथयस्व न संशयः ॥

धरोवाच ॥

नास्म्यहं देवदैत्यानां नायिका नृपसत्तमः (म?)॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नास्म्यहं मानुषाणां वैं गन्धर्वाणां महात्मनाम् ॥
तवास्मि नायका कान्त मन्यसे यदि मे वच[ः] ॥ १२ ॥
त्वमेव नायको राजा विधिना चोपदेशितः ॥
स्त्रीरूपधारिणी चाहं धरास्मि नृपसत्तम ॥ १३ ॥
दृष्ट्वा त्वां कामसदृशं रन्तु[म्] त्वामिहमागता ॥
नान्ये मद्भोगकरणे राजानो नृपसत्तम ॥ १४ ॥
शक्तास्त्वमेव शक्तोसि सत्यं ते कथयाम्यहम् ॥

राजोवाच ॥

मया पूर्वं प्रतिज्ञातमेकपत्नीव्रतं शुभे ॥ १५ ॥
नाहं तदन्यथा कर्त्तुमुत्सहामि न संशयः ॥
गच्छ चान्यान्महाभागे नृपांस्त्वद्भोगसंमतान् ॥ १६ ॥
कान्ता[न्]रागसमायुक्तान् स्वर्णलिङ्कारशोभितान् ॥
प्रार्थ्यत् तास्त्वं(?) महाभागे क्रीडिष्यसि यथासुखम् ॥ १७ ॥
किमीदृशानां भूपानां तर्ज्जनं प्रसहिष्यसि ॥

धरोवाच ॥

मा वदस्व महाराज कालकूटोपमेव च ॥ १८ ॥
ऋते त्वां नृपशार्दूल न भजामि धराधिपम् ॥
त्वमेव धर्मं जानासि धर्मत्यागः कथं त्वया ॥ १९ ॥
कृ(क्र?)यते राजराजेश कथयस्व न संशयः ॥
कामं हि याच्यमानां वै यस्त्रियं त्यजति प्रभो ॥ २० ॥
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥

राजोवाच ॥

यदि धर्मं हि जानासि धर्मज्ञे धर्मलक्षणम् ॥ २१ ॥
तर्हि मे वचनं सत्यं श्रृणुष्वेकाग्रमानसा ॥
स्मरसि त्वं महाभागे यद्येवं धर्मलक्षणम् ॥ २२ ॥
तर्हि योग्यान् पतींस्त्यज्य किमिह संस्थिता ह्यसि ॥

धरोवाच ॥

न जीर्णास्मि महाराज राजभिः पुण्यकारिभिः ॥ २३ ॥
भुक्त्वा मां वै गताः स्वर्गं राजानः शुभलक्षणः(णाः?) ॥
न जीर्णं वै महाभाग देहं मे शुभलक्षणम् ॥ २४ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात्तेषां सह गतं मया त्यक्ता न संशयः ॥
भुंक्ष्व मां नृपशार्दूल न त्वां त्यक्षामि सांप्रतम् ॥ २५ ॥
तव धर्म्मचरी साहं भविष्यामि न संशयः ॥

राजोवाच ॥

यदि सत्यं त्वया प्रोक्तं मनोवाक्कर्मभिः शुभे ॥ २६ ॥
तर्हि त्वं शपथं सत्यं कुरु सत्यं वदाम्यहम् ॥
वयं हि मानवा भद्रे मृत्योर्वशगता भुवि ॥ २७ ॥
स्त्रियस्तु सहचारिण्यः सन्त्यस्माकं न संशयः ॥
स्थित्वा भुवस्थले देवी त्वमासीत्यजरामरा ॥ २८ ॥
भोगं न रोचते मह्यं तस्मात्ते मानवैः सह ॥
यदि सत्यं त्वया प्रोक्तं वचनं वीरवल्लभे ॥ २९ ॥
आत्मसत्यं पुरस्कृत्य शपस्व शांकरौ पदौ ॥

धरोवाच ॥

यदि मां राजशार्दूल भोगजीर्णां करिष्यसि ॥ ३० ॥
सहैवाहं गमिष्यामि सत्यं ते कथितं मया ॥
भूत्वा जीर्णे शरीरा वै यदि त्वां हि ज्य(त्य?)जाम्यहम् ॥ ३१ ॥
तर्हि शपामि राजर्षे पादयोः शङ्करस्य वै ॥
सहधर्मचरी राजन् भविष्यामि न संशयः ॥ ३२ ॥
वचनं ते परित्यज्य न चान्यत् करवाम्यहम् ॥
मया सत्यं पुरस्कृत्य वचनं समुदाहृतम् ॥ ३३ ॥
न चान्यमनुपश्यामि शपामि शिवपादयोः ॥

दत्त उवाच ॥

इति तस्याः समाकर्ण्यं वचनं मानवेश्वर[ः] ॥ ३४ ॥
चकार पाणिग्रहणं धरायाः राजसत्तमः ॥
तया सह तदा राजा कुञ्जेषु च वनेषु च ॥ ३५ ॥
रेमे नृपशार्दूलः शचीपतिरिवः(व?) स्वयम् ॥
गृहे कदाचिद्विपिने कदाचित् जले कदाचित्सखिभिः समन्तात् ॥ ३६ ॥
स वेष्टितो भूपतिरेकसंज्ञो रेमे धरायाः सहितो नरेन्द्रः ॥
ततः कालेन राजर्षिः शतक्रतुसमोपमः ॥ ३७ ॥
राजसूयं महायज्ञं कृत्वा तां समुपाह(ह्व?)यत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धरोवाच ॥
(राजोवाच ?)

धरे भवतु भद्रं ते उत्तिष्ठ गहनं प्रति ॥ ३८ ॥
तत्र गत्वा तपिष्यामस्तपः परमदुष्करम् ॥
सर्वेषां गमनं देवी वार्द्धक्ये काननं प्रति ॥ ३९ ॥
अस्माकं तु परो धर्मस्तपसे च न संशयः ॥
तेन स्वर्गं गमिष्यामि त्वया सह वसुन्धरे ॥ ४० ॥
तेनैव भोगानखिलान् प्रापयासि न संशयः ॥

दत्त उवाच ॥

ततस्तद्वचनं श्रुत्वा धरा सा चारुहासिनी ॥ ४१ ॥
अट्टाट्टहासमशिव(वं?) चकार नृपसत्तम ॥
उवाच वचनं साध्वी राजानं चारुदर्शनम् ॥ ४२ ॥
तपःपूतं सुगम्भीर(रं?)शचीरिव पुरन्दरम् ॥

धरोवाच ॥

नाहं जीर्णास्मि राजर्षे जरया देहजीर्णया ॥ ४३ ॥
त्वया सह कथं यूना गमिष्यामि यतव्रता ॥
सांप्रतं जीर्णदेहस्त्वं किमुमा(?) नहि जीर्यते ॥ ४४ ॥
जरयित्वाथ मां बाला(लां?) शोभाढ्यां चारुहासिनीम् ॥
ततस्त्वं नृपशार्दूल भुक्त्वा भोगान्यथेप्सितान् ॥ ४५ ॥
संपूज्य च ऋषीन्सर्वान् मया सह दिवं व्रज ॥

दत्त उवाच ॥

तयेरितं समाकर्ण्य कोपाविष्टोभवन्नृपः ॥ ४६ ॥
समुत्थाय महासिं स हन्तुं तामुपचक्रमे ॥
उवाच वचनं चापि ॥ ४७ ॥
हनिष्यामि दुराचारे पापे सत्यविवर्जिते ॥
त्वामद्य वेदरहितां सत्यवाणिविवर्जिताम् ॥ ४८ ॥
दृष्ट्वा मां स्थविरं दान्तं या त्वम् भाषसि सांप्रतम् ॥
जीर्जयत्वेति तस्मात्त्वां हनिष्यामि न संशयः ॥ ४९ ॥
तस्य तद्वचनं श्रुत्वा दृष्ट्वा चासिं समुद्यताम् ॥
नृपस्य भयसन्त्रस्ता स्त्रीरूपा प्राद्रवन्मही ॥ ५० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावन् वधाद्राजर्षिर्भित्वा चासि(सिं?) समुद्यताम् ॥
ततो हिमाद्रिभवने प्रविष्टां तां वसुंधराम् ॥ ५२ ॥

ददर्श नृपतिर्दूरात् कुण्डलेन विराजिताम् ॥
तत्रैव च राजर्षिर्जगामासिधरः स्वयम् ॥ ५३ ॥

ब्राह्मणैः क्षत्रियैश्चापि संस्तुतो नृपतिस्तदा ॥
ततस्तस्माद्विनिष्क्रम्य भीता राज्ञो भयाद्धराः(रा?) ॥ ५४ ॥

जगाम मानसं क्षेत्रं यं ब्रह्मा विसृजत्पुराः(रा?) ॥
तामन्वधावद्राजर्षिश्चक्रासिवरभृत्स्वयम् ॥ ५५ ॥

स्थविरो वालवद्दान्तः पदातिरपराजितः ॥
तत्र गत्वा स राजर्षि असिमुत्पाद्य(द्य?) वेगवान् ॥ ५६ ॥

वसुधायाः शिरं राजन् संजहार सकुण्डलम् ॥
अजरामरदेहा सा हतमात्रा वसुन्धरा ॥ ५७ ॥

विवेश मानसक्षेत्रं देवर्षिगणसेवितम् ॥
ततस्तेनैव मार्गेण धराधरगृहं शुभम् ॥ ५८ ॥

प्रविश्य सा धरा राजन् दधार वसुधातलम् ॥
ततः प्रभृति राजर्षे मत्वा गूढां वसुंधराम् ॥ ५९ ॥

क्षेत्रं तं खनयामास सर्वदेवनमस्कृतम् ॥
खनित्वा नृपशार्दूल(लो?) धनुषा स्वेन वै तदा ॥ ६० ॥

न प्राप वसुधादेवीं रत्नाकरसमन्विताम् ॥
ददर्श शिवलिङ्गं वै स्वर्णहंसमयं ततः ॥ ६० ॥

पूजयामास तं राजा विधिदृष्टेन कर्मणा ॥
पुनः स विनयामास पूजयित्वा शिवं प्रभुम् ॥ ६१ ॥

दृष्ट्वा वापि त्रिलोकेशं पूर्वं योगीश्वरं हरम् ॥
यत्र यत्र खनद्राजा तत्र तत्र सरिद्वरा ॥ ६२ ॥

धात्रा चाप्युपदिष्टा सा आविर्भूता बभूव ह ॥
ततः स राजा मतिमान् मानसाख्यं सरोवरम् ॥ ६३ ॥

मनसा निर्मितं धात्रा ददर्श नृपसत्तम ॥
तं दृष्ट्वा मानसं क्षेत्रं ब्रह्मणा निर्मितं प्रभो ॥ ६४ ॥

ब्रह्माविष्णुमहेशाना स्थानैर्बहुभिरङ्कितैः ॥
हर्षेण महता युक्तः स राजा नृपसत्तम[:] ॥ ६५ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चकार मानसक्षेत्रं शतयोजनमायतम् ॥
षष्ठियोजनविस्तीर्णं द्वितीयमिव सागरम् ॥ ६६ ॥

दशयोजनगम्भीरं स चकार तदा नृपम्(पः?) ॥
ततो जलैः स गाङ्गेयैर्धनुःक्षतसमुद्भवैः ॥ ६७ ॥

पूरयामास तं क्षेत्रं सागरं मघवानिव ॥
ततो जलांञ्जलीं नीत्वा स राजा कुसुमान्वितम् ॥ ६८ ॥

शिवलिङ्गस्य शिरसि चिक्षेप नृपसत्तम[ः] ॥
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥ ६९ ॥

राजानं पूर(ज?)यामासुर्दृष्ट्वा मानसरोवरम् ॥
ब्रह्मलोकादिह प्राप्तं विमानं सर्वकामदम् ॥ ७० ॥

तमारुह्य स राजर्षिर्जगाम हरिमन्दिरम् ॥
ततस्तु ऋषयः सर्वे कैलाशतलनिवासिनः ॥ ७१ ॥

ददृशुर्मानसं राजन् द्वितीयमिव सागरम् ॥
ऊचुः सर्वे महाराज केनायं मानसं सरः ॥ ७२ ॥

प्रकासि(शि?)तो प्रकाश्योसौ संशयाविष्टमानसाः ॥
योगिनामप्यगम्योसौ देवपूज्यः सरोवरम् ॥ ७३ ॥

प्रकाशरूपः केनायं कृतः संशेरते द्विजाः ॥
इति प्रशंसमानानां द्विजानां नृपसत्तमः ॥ ७४ ॥

अशरीरा ततो वाणी अन्तरिक्षादभाषत ॥
संशयो मास्तु वै विप्राः श्रृण्वन्तु मम भाषितम् ॥ ७५ ॥

सत्ययुक्तं शुभमतं संशयच्छेदकारकम् ॥
वैवस्वतकुले जातो मान्धाता नाम भूपतिः ॥ ७६ ॥

तेनायं खनितो विप्रा महता कारणेन च ॥
प्रकाशितोयं तेनैव नदीभिश्चापि रन्वितः(?) ॥ ७७ ॥

दत्त उवाच ॥

तदीरितं समाकर्ण्यं खेचराया नृपोत्तमः(म?) ॥
बभूवुः स्वस्थचित्तास्ते ऋषयो नष्टविभ्रमाः ॥ ७८ ॥

तमेव नृपतिं राजंस्तुष्टुवुस्ते न संशयः ॥
लोकानां हितकर्त्तारं मानसाख्यप्रकाशतः ॥ ७९ ॥

धन्योस्ति स नृपो राजन् येनायं मानसः सरः ॥
मनसा निर्मितः पुण्यो ब्रह्मणा हितकारिणा ॥ ८० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशितोयं राजर्षे शिवलिङ्गसमन्वितः ॥
स राजा भूतले पुण्ये ख्यातव्यो नात्र संशयः ॥ ८१ ॥

ततः प्रभृति राजर्षे मानसाख्यसरोवरः ॥
ऋषिगम्यो सुगम्योभूद् गिरिराजशिरोपरिः(रि?)॥ ८२ ॥

मान्धातुश्चरितं राजन् यः शृणोति समाहितः ॥
प्राप्नोति विष्णुभवनं यावदाहूतसंप्लवम् ॥ ८३ ॥

इति श्रीस्कन्दपुराणे मानसखण्डे मान्धातुश्चरितं नाम दशमोऽध्यायः ॥ १० ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यासस्तोत्रम्

अमरचन्द्रसूरिप्रणीत-बालभारतकाव्यगतम्*

[प्रतिसर्गारम्भे सूरिणा व्यासमहिमसूचकः कश्चिच् श्लोकः पठ्यते; एषां श्लोकानामिह संग्रहः प्रस्तूयते]

आदिपर्व

सतां परब्रह्मविलोकमार्गमपङ्किलं दूरितकण्टकं यः ।
[1]श्रीभारत ब्रह्म ततान शाब्दं स श्रेयसे सत्यवतीसुतोऽस्तु ॥१॥

द्वैपायनः पातु जगन्ति दूरमुद्यत्-पुराणामृतबिन्दुवृन्दः[2] ।
यन्मान[3]सज्ञानसुधासमुद्रे वाग्देवताया जलकेलिरासीत् ॥२॥

सुकृतस्य खड्गमिव तारतीव्रता-
व्रतधारमाश्रयत कृष्णयोगिनम् ।
यदि वो दिवानिशपराभवोद्यत-
भ्रमदन्तरारिभयभङ्गुरं मनः ॥ ३॥

पाराशरमकूपारमिव पुंरूपिणं स्तुमः ।
येनोद्गीर्णाः सुधासिक्तमुक्तावद्भारतोक्तयः ॥ ४॥

पाराशरो मुनिपतिः स मुदे हृदायं
लक्ष्मच्छलेन कलयन् हरशेखरोऽपि ।
तद्वच्यमा[4]नजगदिष्टपुराणवाणी-
गर्भाद्रिलद्भिरमृतैरमृतांशुरासीत् ॥ ५॥

अन्तर्धुतानाममलेन धाम्ना बहिर्महाभारतजैर्यशोभिः ।
तमस्त्विषां येन तनुत्वगेव पदं ददे कृष्णमुनिर्मुदेऽसौ ॥ ६॥

---

* काव्यमालायां (४५ संख्याकायाम्) प्रकाशितमिदं काव्यम् ।

१. श्रीभारतं ब्रह्मेति युक्ततरः पाठः, तथैव पठ्यते शल्यपर्वगते व्यास-महिमपरके श्लोके ।

२. वृन्दा (पाठा०) ।

३. मानसे (पाठा०) ।

४. तद्‍ग्रथ्यमान (पाठा०) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवध्वमध्वरभुजामपि सेवनीयं
पाराशरं मुनिमवाप्तयदङ्गसंगः ।
वर्णः शुचित्वमसितोऽपि तदाप केश-
व्याजेन येन शिरसा ध्रियते न कैः कैः ॥ ७॥

अहो महत्त्वं वचसामगोचरं प्रपञ्चयन् कृष्णमुनिः पुनातु वः ।
भवार्णवोऽप्येष विशोषमेति यत्पदद्वयीरेणुकणैरपि क्षणात् ॥ ८॥

कृष्णमानमततं महामुनिं यत्पदद्वयनखांशुभासुरः ।
भुक्तिमुक्तिरमणी शिरोमणीभावमावहति को नु कोविदः ॥ ९॥

दुष्टकर्मफणिदष्टजनाली-दोषमोषकृतयेऽङ्कमिषेण ।
यः सुधात्विषि विवेश सुधार्थं स श्रिये भवतु भारतकारः ॥ १०॥

कृतवसतिरजस्रं साधुहृत्पञ्जरान्तः
किमपि किमपि वक्ता सत्पुराणोक्तिसूक्तीः ।
भवतु भुवनचित्रप्रीतये ज्ञानलक्ष्मी-
कुतुकशुकविहङ्गः सत्यवत्यङ्गजन्मा ॥ ११॥

समुदे पराशरसुतः सुतरां भवतोयराशितरणैकतरी ।
प्रससार भारतमिषेण मुखे खलु यस्य निर्मलवितानपटः ॥ १२॥

सभापर्व

चन्द्रायमाणाः सुकृताम्बुराशेः
सूर्यायिताः साधुहृदम्बुजानाम् ।
स्फारं त्रिलोकीदुरितान्धकारं
पाराशरस्याङ्घ्रिनखाः क्षिपन्तु ॥ १॥

शुद्धज्ञानसुधाम्भोधिघनं द्वैपायनं स्तुवे ।
योऽवर्षद् विश्वहर्षाय श्रीभारतसुधारसैः ॥ २॥

अस्तु वस्तुषु पराशरात्मज[५]ज्ञानदुग्धजलधिः स शुद्धये ।
नीयते बत यदेकबिन्दुना भारतेन विलयं भवानलः ॥ ३॥

ज्ञानप्रदीपपात्राणां सर्वेषामुपरि स्फुरन् ।
पायाद् द्वैपायनो विश्वजनमञ्जनमञ्जुलः ॥ ४॥

शितिद्युतिः सत्यवतीतनूजः पुनातु सूर्येन्दुविलोचनो वः ।
बभौ महाभारतशब्दनाम्ना गुणेन संक्षिप्तमिवाम्बरं यः ॥ ५॥

---

५. ०त्मजो (पाठा०) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आरण्यकपर्व

रामादपि श्लाघ्यगुणः श्रियेऽस्तु व्यासो मुनिः श्रीदयितावतारः।
विनिर्मितो येन परार्थमेव भवार्णवे भारतसेतुबन्धः॥ १॥

कनीनिकीभवन् ध्यानदृशि दर्शयतां सताम्।
संसारपारावारस्य पारं पाराशरो मुनिः॥ २॥

सूत्रधार इव मुक्तिपुरैक-द्वारभारतकृतौ कृतकृत्यः।
श्रेयसेऽस्तु स मुनिर्महनीये स्वात्मधामनि सुखेन निषण्णः॥ ३॥

दृशोराधाय यत्कायकान्तिसिद्धाञ्जनं जनः।
द्राक् त्रिलोकीविलोकी स्यात्तं सेवे कृष्णयोगिनम्॥ ४॥

विराटपर्व

कर्ता जगत्पापविषाहृतीनां स्तात् स श्रिये सत्यवतीसुतो वः।
जगच्चमत्कारकमुज्जगार श्रीभारतं नाम सुधारसं यः॥ १॥

स पराशरनन्दनो मुदे रिपुनारीनयनाञ्जना शनैः।
असिभिन्नतीव्रताजितैरिव यः कान्तिमिषान्निषेव्यते॥ २॥

सुस्वादुशीतविशदः सुधारसो यद्वक्त्रपद्मगतिसारसौरभः।
कर्णप्रियोऽप्यजनि भारतीभवन् कृष्णं तमानमत योगिनं जनाः॥ ३॥

मुदे[६]ऽस्तु वः कृष्णमुनिर्यदीयभास्वद्वपुर्दन्तनखप्रभाभिः।
विचित्ररत्नाभरणा न के के विमुक्तिकान्तासुभगीभवन्ति॥ ४॥

उद्योगपर्व

संसारवारिधिद्वीपं द्वैपायनमुनिर्मुदे।
मध्यस्थोऽप्याश्रिताञ्शास्त्रैर्यः प्रीणात्यमृतोपमैः॥ १॥

अप्रमेयमहिमा हिमाचलश्रीः पराशरसुतः श्रियेऽस्तु नः।
यस्य विश्ववलयैकपावनी स्वर्धुनीव विससार भारती॥ २॥

धराधृतिद्वेषिहतिप्रतिष्ठितावतारसंभारसमुद्भवश्रमः।
शमामृते विश्रमधीर्विवेश यः स पातु पाराशरविग्रहो हरिः॥३॥

अमृतवृष्टिरिवाजनि हृष्टिदा जगति यस्य पुराणपरम्परा।
भवदवार्तिभिदे जलदद्युतिर्न किमिवास्तु स सत्यवतीसुतः॥ ४॥

६. मुदे स वः (पाठा०)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदा हृदन्तःस्फुरितस्य विष्णोर्विस्तारणीभिर्द्युतिधोरणीभिः ।
रोमावलीद्वारविनिःसृताभि रिवासितः सत्यवतीसुतोऽव्यात् ॥ ५॥

भीष्मपर्व

यत्र भात्यनपवृत्तनिवेशः कालदेशपिहितोऽपि पदार्थः ।
वैभवानि भुवि भारतकारज्ञानतत्त्वमुकुरः स करोतु ॥ १॥

क्षीरोदचिरशायित्वात् पीयूषमिव संचितम् ।
स्फारयन् भारतं व्यासः श्रीकृष्णावतरः श्रिये ॥ २॥

द्रोणपर्व

क्षमां दधानः स गिरिप्रधानः सिद्ध्यै सतां व्यासमुनिर्महोच्चैः ।
यः पुण्यकृत्पर्वशतावबद्धभास्वन्महाभारतवंशहेतुः ॥ १॥

धर्मशास्त्रकविमिष्टकवित्वाद्
धत्त चित्तभुवि कृष्णमुनीन्द्रम् ।
तत्कवित्वगुणनप्रतिशब्दा
येन वक्त्रकुहरे विहरन्ति ॥ २॥

छन्द[७]निर्दलितारातिकलङ्कच्छेदधीरिव ।
पाराशर्यशरीरेण तपस्यन् पातु वो हरिः ॥ ३॥

केशान्तभूतजीमूतविद्युद्दीप्त्यैव पिञ्जरम् ।
जटाजूटं वहन् व्यासः पायादवतरो हरेः ॥ ४॥

कर्णपर्व

अगोचरं वागधिदेवताया वाचामपि स्वं चरितप्रपञ्चम् ।
वक्तुं जगत्तारणकारणेन व्यासीभवन् पातु स वो मुरारिः ॥ १॥

शल्य-सौप्तिकपर्वणी[८]

[१॥ श्लोकः खलु आदिपर्व १॥ श्लोक एव; अत्र श्रीभारतम् इति पठ्यते; श्लोकोऽयं संपातायात इति प्रतीयते]

---

७. छल (पाठा०) ।

८. शल्य-सौप्तिक-पर्वद्वयमत्र एकमेव पर्व । उक्तं च ग्रन्थकृता सौप्तिकपर्वपुष्पिकान्ते—'अनयोरेकसर्गेण शल्यसौप्तिकपर्वणोः' इति । यतः पर्वद्वयमत्र एकपर्वरूपेण पठितम्, अतो द्वौ व्यासपरकौ श्लोकौ पठितौ—इति व्यक्तमेव प्रतीयते । बालभारतस्य मुद्रिते संस्करणे शल्यपर्व नवमम्, सौप्तिकं च दशममिति दृश्यते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्भारतीभारतपानलीला: सुधाभुजां धाम न कामयामः।
समुक्तिकानां परिलोभनानि ज्ञानानि नः कृष्णमुनिस्तनोतु ॥ १।२

युष्मान् शमसुधाम्भोधिः पायाद् द्वैपायनो मुनिः।
शर्मशास्त्रैर्न[९]कस्तापं यस्योर्मिभिरिव त्यजेत् ॥ १।३

स्त्रीपर्व

छलयुद्धहृताहितो हरिस्तपसे मुक्तकलत्रपुत्रकः।
अविशच् छुचि यन्मनस्तपोवनमृद्धचै[१०] स पराशरात्मजः ॥ १।१

शान्तिपर्व

ओंकारो यः सदाद्यैकवर्णो[११]ऽपीशस्त्रयीमयः।
[१२]व्यास निश्वसितान्[१३] वेदान् पायाद्[१४] व्यासमुनिः स नः ॥१।१

अनुशासनपर्व

पाराशरः पातु स मां तमालशितिद्युतिर्दैत्यभिदोऽवतारः।
वाच्याय विश्वैकहिताय देवी वागेव जिह्वाजनि यन्मुखाब्जे ॥ १।१

अश्वमेधपर्व

[१५]भवाकूपारपारद्रुः[१६], पाराशर्यमुनिर्ददे।
नैति यद् भारतीगुच्छस्तुच्छभाग्यस्य भोग्यताम् ॥ १।१

[आश्रमवासादि-स्वर्गारोहणान्तेषु पर्वसु व्यासपरकाः श्लोका न पठ्यन्ते]

आस्तीकपर्व

यद्भारतीभारतपानलीनः[१७] सुधाभुजां धाम न कामयेऽहम्[१८]।
स मुक्तिकान्तापरिलोभनानि ज्ञानानि[१९] मे[२०] कृष्णमुनिस्तनोतु ॥ १।१

९. पापतापं न कः शास्त्रैर्यस्यो (पाठा०)।
१०. वृद्धै (पाठा०)।
११. यदाप्येकः कर्णो (पाठा०)।
१२. ०याप (पाठा०)।
१३. विश्वासिभाचेदान् व्यन् (पाठा०)।
१४. न्यश्यन् व्यासमुनिर्मुदे (पाठा०)।
१५. भवकूपार (पाठा०)।
१६. पारंगः (पाठा०)।
१७. लीनाः (पाठा०)।
१८. न कामयानः (पाठा०)।
१९. शुभानि (पाठा०)।
२०. नः (पाठा०)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवस्तोत्रम्

[पुराणोक्ता दीर्घच्छन्दोरचिता मङ्गला-चरणरूपाः शिवपरकाः केचन श्लोकाः]

(१)

आद्यन्तमङ्गलमजातसमानभावम्
आर्यं तमीशमजरामरमात्मदेवम् ।
पञ्चाननं प्रबलपञ्चविनोदशीलं
संभावये मनसि शंकरमम्बिकेशम् ॥
(शिवपु० विद्येश्वर० १।१)

(२)

विश्वोद्भवस्थितिलयादिषु हेतुमेकं
गौरीपतिं विदिततत्त्वमनन्तकीर्तिम् ।
मायाश्रयं विगतमायमचिन्त्यरूपं
बोधस्वरूपममलं हि शिवं नमामि ।
(शिवपु० रुद्र० सृष्टि० १।१)

(३)

वन्दे वन्दनतुष्टमानसमतिप्रेमप्रियं प्रेमदं
पूर्णं पूर्णकरं प्रपूर्णनिखिलैश्वर्यैकवासं शिवम् ।
सत्यं सत्यमयं त्रिसत्यविभवं सत्यप्रियं सत्यदं
विष्णुब्रह्मनुतं स्वकीयकृपयोपात्ताकृतिं शंकरम् ॥
(शिवपु० रुद्र० कुमारखण्ड १।१)

(४)

यो धत्ते निजमाययैव भुवनाकारं विकारोज्झितो
यस्याहुः करुणाकटाक्षविभवौ स्वर्गापवर्गाभिधौ ।
प्रत्यग्बोधसुखाद्वयं हृदि सदा पश्यन्ति यं योगिन
स्तस्मै शैलसुताञ्चितार्धवपुषे शश्वन्नमः श्रेयसे ॥
(शिवपु० कोटिरुद्र० १।१)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५)

कृपालतिलवीक्षणं स्मितमनोज्ञवक्त्राम्बुजं
शशाङ्ककलयोज्ज्वलं शमितघोरतापत्रयम् ।
करोतु किमपि स्फुरत्-परमसौख्यसच्चिद्वपु-
र्धराधरसुताभुजोद्वलयितं महीमङ्गलम् ॥
(शिवपु० कोटिरुद्र० १।२)

(६)

यो धत्ते भुवनानि सत्त्वगुणवान् स्रष्टा रजःसंश्रयः
संहर्ता तमसान्वितो गुणवतीं मायामतीत्य स्थितः ।
सत्यानन्दमनन्तबोधममलं ब्रह्मादिसंज्ञास्पदं
नित्यं सत्त्वसमन्वयादधिगतं पूर्णं शिवं धीमहि ॥
(शिवपु० उमा० १।१)

(७)

ललाटे त्रैपुण्ड्री निटलकृतकस्तूरितिलकः
स्फुरन् मालाधारः स्फुरितकटिकौपीनवसनः ।
दधानो दुस्तारं शिरसि फणिराजं शशिकलां
प्रदीपः सर्वेषामरुणगिरियोगी विजयते ॥
(स्कन्दपु० माहेश्वर० अरुणाचल० पूर्वं० १।१)

(८)

विविधगुणविभेदैर्नित्यमस्पृष्टरूपं
जगति च बहिरन्तर्वा समानं महिम्ना ।
स्वमहसि विहरन्तं वाङ्मनोवृत्तिदूरं
परमशिवमनन्तानन्दसान्द्रं प्रपद्ये ॥
(स्कन्दपु० ब्रह्म० उत्तर० २२।१३६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

NOTES ON THE ŚIVASTOTRA

(*Verse* 1) Śiva (Śaṅkara) is all-auspicious; there is none that equals him; he is noble, powerful, self-shining and bereft of decay and death; he has five faces and five natural powers; he is the husband of Ambikā.

Śiva is called *maṅgala* since he destroys all misfortunes and calamities and creates prosperity and good fortune.[1] For *ajātasamānabhāva*, cp. Śvetāśvatara-up. 6.8 (न तत्समश्चाभ्यधिकश्च दृश्यते). The word *ārya* (venerable) is very rarely applied to Śiva; in the Śivagītā Śiva says 'I am *ārya*' (6.15) which means '*pūjyatama*' (see the comm.). It may also mean 'taintless'.[2]

Ātmadeva may be analysed as आत्मना दीव्यति (self-shining) i.e., self-revealing, *svaprakāśa*; cp. Śiva's names आत्मसहाय (Anuśāsana-p. 17. 120) and आत्मलिङ्ग (Tai. Ār. 16. 16).

The five faces of Śiva represent his five forms, namely Sadyojāta, Vāmadeva, Aghora, Tatpuruṣa and Īśāna (Kālikā-p. 51. 1i). Kālikā-p. 107-108 inform us that these faces are to be worshipped by five *mantras* called Sammada, Sandoha, Nāda, Gaurava and Prasāda.

The expression *pañcavinodaśīla* seems to refer to five eternal functions (*kṛtya*) of Śiva, namely *sṛṣṭi*, *sthiti*, *saṁhāra*, *anugraha* (or *āvirbhāva*) and *nigraha* (or *tirobhāva*).[3] It may also refer to his five

---

1. Cp. अशुभानि निराचष्टे तनोति शुभसन्ततिम् । श्रु तिमात्रेण यत् पुंसां ब्रह्म तन्मङ्गलं विदुः ॥ (Viṣṇu-p. quoted in the Bhāṣya on the Lalitāsahasranāma, p. 193; it is however not found in the printed editions of the Purāṇa).
2. Cp. आराद् याता पातकेभ्य इत्यार्यः (Tātparyaṭikā 1. 1. 7); cp. उदेति योगयुक्तानामत्र केवलमार्यता (Yogavāsiṣṭha 1. 126.53).
3. पञ्चविधं तत्कृत्यं सृष्टिः स्थितिसंहृती तिरोभावः । तद्वदनुग्रहकरणं जगतः सततोदितस्यास्य ॥ (Bhoja's Tattvaprakāśa quoted in Lalitāsahasranāma-bhāṣya, p. 81). सृष्टिः स्थितिश्च संहारस्तिरोभावोऽप्यनुग्रहः । पञ्चैव मे जगत्कृत्यं नित्यसिद्धमजाच्युतौ ॥ सर्गः संसार-संरम्भः तत्प्रतिष्ठा स्थितिर्मता । संहारो मर्दनं तस्य तिरोभावस्तदुत्क्रमः ॥ तन्मोक्षोऽनुग्रहस्तन्मे कृत्यमेवं हि पञ्चकम् । (Śiva-p., Vidyeśvara. 10.1-4a).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

powers, namely *cit* (intelligence), *ānanda* (bliss), *icchā*, (will), *jñāna* and *kriyā* (creative power) (Tantrasāra, Āh. 1; Paramārthasāra 14). On account of these powers Śiva is described in the Liṅga-p. as *svaśaktyā pañcadhā sthitaḥ* (quoted in the Bhāṣya on the Lalitā-sahasranāma, p. 74).

The word Śaṅkara (one conferring prosperity, शं मङ्गलं करोति)[4] is conventionally used for Śiva (यथा शङ्करशब्दोऽयं महादेवेऽवतिष्ठते, a purāṇa-vacana quoted in the Śivārkamaṇidīpikā on Br. Sū. 1. 2. 9). The word has however been explained (rather fancifully) in the sense of 'the dispeller of all doubts' by Nilakaṇṭha (शङ्कानां समूहः शङ्कः, तस्य र इव रः शङ्करः सर्वसंशयदाहकः, comm. on Anuśāna-p. 17. 102). For Ambikeśa, cp. अम्बिकापतये नमः (Tai. Ār. 10. 18; see also 10. 22).

The form सभावये is from the root भू प्राप्तौ आत्मनेपदी वा (Curādi-gaṇa 232), which is used here in the sense of *cintana*. It may also be derived from the root भू अवकल्कने taking the root as ātmane-padin.[5]

(*Verse* 2) Śiva is the sole cause of origination, subsistence and dissolution of the world; he is the husband of Gaurī, the knower of reality, the abode of *māyā* and is deviod of *māyā*; he possesses unlimited fame; he is inconceivable, is bereft of all blemishes; his essential nature is awareness.

The view that Śiva is the sole cause is to be found in many Purāṇic passages;[6] cp. एको हि रुद्रो न द्वितीयाय तस्थुः (Śvetāśvatara-up.

---

4. शंकरोमि सदा ध्यानात् परमं यन् निरामयम् । भूतानामसकृद् यस्मात्तेनाहं शंकरः स्मृतः ॥ Skanda-p. quoted in the Trikāṇḍacintāmaṇi comm. on Amarakośa, p. 25).
5. Cp. भुवोऽवकल्कने, अवकल्कनं चिन्तनमित्युक्तम् । (Virarāghava's comm. on Uttararāmacarita); see also 'भावय चिन्तय, भू शुद्धिचिन्ताभिश्रणेषु चुरादिः परस्मैपदी' (Rasikapriyā comm. on Gītāgovinda, ch. 1).
6. एक एव यतो लोकान् विसृजामि सृजामि च । विवासमामि गृह्णामि तस्मादेको ऽहमीश्वरः ॥ (Śivagītā 6. 37). Śivagitā is said to belong to the Uttarakhaṇḍa of the Padma-p. (see the colophon); it is however not found in the printed editions of the Purāṇa.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

3. 2). In *viditatattva, tattva* seems to have been used in the Śaiva sense.[7]

Since *māyā* is regarded as *māheśvarī śakti* (Śiva-p. 7. 15. 20), Śiva is rightly called *māyāśraya.* In his own form Śiva is *cidrūpa* and as such he is free from *māyā.*

Anantakīrti—cp. *Mahāyaśas*—a name of Śiva in Anuśāsana-p. 17. 35 and 17. 85. *Acintyarūpa*—*Acintya,* a name of Śiva, is read in Anuśāsana-p. 17. 147. Since Śiva transcends *prakṛti* he is beyond comprehension (प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्, Bhīṣma-p. 5. 12); cp. अचिन्त्यं....शिवम् (Kaivalya-up. 6).

Śiva—The word signifies purity; विशुद्धिः शिवना मता (Śiva-p. 7. 1. 5. 20).[8] The word is usually derived from the root *vaś* (वश कान्तौ शिवः स्मृतः). The essential nature of Śiva as shown in Śiva-p. 7. 2 12. 18 is worth noticing (आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः । सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥)

(*Verse* 3) Śaṅkara (Śiva) is dear to those whose minds are satisfied on account of performing worship; he bestows love and truth; he is infinite and is the abode of all lordly powers; he loves truth, his greatness consists of three truths; he is extolled by Brahmā and Viṣṇu; he assumes various bodies and forms through his grace.

Vandanatuṣṭamānasamatiprema-priya has to be analysed as वन्दनतुष्टमानसमतीनां यत् प्रेम तत् प्रियं यस्य. The Śiva-p. says that as a

---

7. आप्रलयं यत् तिष्ठति सर्वेषां भोगदायि भूतानाम् । तत् तत्त्वमिति प्रोक्तम् (तत्त्वप्रकाश 6. 3); आमहाप्रलयस्थायि सर्वप्राण्युपभोगकृत् । तत्त्वमित्युच्यते तज्ज्ञैर्नशरीरघटाद्यतः ॥ (quoted in Jayaratha's comm. on Tantrāloka 9. 5); तस्य भावस्तत्त्वमिति भिन्नानां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तत् तत्त्वम् ; यथा गिरिवृक्षपुरप्रभृतीनां नदीसरःसागरादीनां च पृथिवीरूपत्वम् अब्रूपत्वं च (प्रत्यभिज्ञाविमर्शिनी 3. 1. 2). The Śiva-purāṇa contains the list of *tattvas* in 7. 1. 33. 12-15.

8. अनादिमलसंश्लेषप्रागभावात् स्वभावतः । अत्यन्तपरिशुद्धात्मा शिव इत्यभिधीयते ॥ अथवाऽशेषकल्याणगुणैकघन ईश्वरः । शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ॥ (Śiva-p. 7. 1. 32. 29-30).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

father becomes pleased with his sons etc. on account of their love, so Śiva becomes pleased with all who love him.[9]

That Śiva is the abode of lordly powers is an established doctrine of the Śaivas. There is specific mention of these powers in authoritative works.[10]

In Śivagītā we find Śiva to declare himself as *satya* (6. 14). For Śiva's connection with *satya* we may consider the mantra ऋतं सत्यं.... which is applied to महादेवपादोदकप्राशनविधि (Comm. Śivārkamaṇidīpikā on Br. Sū. 1. 2. 8) *Trisatya* (trebly truthful) seems to mean त्रिकालसत्य, existing in the present, past and future; or it may mean that Śiva is truthful in thought, word and deed.

In स्वकीयकृपयोपात्ताकृति, *ākṛtis* are the incarnations of Śiva (mentioned in the Purāṇas; *vide* Liṅga-p. 1. 7; 1. 24; Kūrma-p. 1.52; Śiva-p. 7. 2. 9) with a view to bestowing divine knowledge or performing glorious deeds.

'*Viṣṇu-Brahma-nutam*' refers to those Purāṇic stories in which Śiva was extolled by Brahmā and Viṣṇu for his greatness, majesty and lordly powers.

(*Verse* 4) Śiva, though untouched by changes, assumes the form of the world through his own *māyā*; heaven and emancipation

---

9. यथैव पुत्रपौत्रादेः प्रीत्या प्रीतो भवेत् पिता । तथा सर्वस्य संप्रीत्या प्रीतो भवति शंकरः ।। (Śiva, 7. 2. 3. 31).

*10 ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः । स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ।। (quoted in Śivārkamaṇidīpikā 1. 2. 9 as a Paurāṇikī bhaṇiti); *vide* Vāyu-p. 10. 65-66; Kūrma-p. 1. 10. 40-41; Brahmāṇḍa-p. 3. 2. 218-219; Saura-p. 23. 16-17; द्रष्टृत्वम् and आत्मसंबन्धम् are read in some Purāṇas in the place of स्रष्टृत्वमात्मसंबोधः; see also सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ।। (A Yāmala-vacana according to the Tantrasāra of Kṛṣṇānanda, ch. 2; Vāyu-p. 12. 33; Śiva-p. 1. 18. 12; स्वच्छन्दता is sometimes read in the place of स्वतन्त्रता; according to Bhāskara's bhāṣya on Lalitāsahasranāma this verse belongs to the Devībhāgavata (p. 102).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

are said to be attained through Śiva's grace; yogins in their hearts perceive Śiva who is *tejas*, non-dual and is characterized by internal awareness and bliss; half part of Śiva's body is covered by Pārvatī.

It is the established doctrine of the Śaivas that Śiva in his own form is immutable and it is his *māyā* which is the material cause of the world. The doctrine of grace (*prasāda*) is one of the peculiar doctrines of the Śaivas.[11]

The word *pratyak* (stem *pratyac*) is usually explained to mean either 'what underlies everything' or 'the knower of opposites', or 'that which is in the interior'. It is the last sense which suits the context well.

The *advaya* aspect of Śiva has aptly been described in the Śivagītā (13.10). It is well known that *advaitadṛṣṭi* (not necessarily the same as is found in the school of Śaṅkara) has been propounded in the Śaiva Āgamas : शिवागमेषु चाद्वैतं बभाषे परमेश्वरः (Brahmagītā, ch. 9).

The expression *śailasutāñcitārdhavapus* refers to the *ardhanārīśvara* form of Śiva. Śiva's name Śveta-piṅgala (read in Anuśāsana-p. 17. 138) shows the same idea;[12] cp. the epithet Umādehārdhadhārin in Śivagītā 12.27.

---

11. *Prasāda* is accepted as one of the five means (Gaṇakārikā, p. 7). योगेन तु परा भक्तिः प्रसादस्तदनन्तरम् । प्रसादान्मुच्यते जन्तुर्मुक्तः शिवसमो भवेत् ॥ (Śiva-p. 7. 1. 3. 40); प्रसादात् सर्वपाशेभ्यो मुक्तिः (Śiva-p. 7. 2. 7. 32).

12. Nilakaṇṭha observes 'अर्धनारीनटेश्वरः दक्षिणार्धे कर्पूरगौरो वामार्धे कनकपिङ्गलः'; see Mahimnaḥstotra 23. Cp. पुरुषं कृष्णपिङ्गलम् in Tai. Ār. 10. 12 on which Sāyaṇa remarks : दक्षिणे नटेश्वरभागे कृष्णवर्णः, उमाभागे वामे पिङ्गलवर्णः. According to Nīl. this explanation is however untenable. "तत्र या सा महाभागा शङ्करस्यार्धकामिनी । कायार्धं दक्षिणं तस्याः शुक्लं वामं तथाऽसितम् ॥ (Vāyu-p. quoted in Lalitāsahasranāma-bhāṣya, p. 103). For a charming Purāṇic ardha-nārīśvara-stotra, see Śiva-p. 7. 1. 15. 16-30.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The use of the word *hṛd* as the place of perceiving Śiva is significant. Śiva is said to exist in the heart[13] in the form of *bālāgramātra* (the hundredth part of the point of a hair) (Saura-p. 2. 47).

The word *añcita* (derived from the root *añc*) is highly significant. It shows that the female part has rendered the body highly glorious.[14]

(*Verse* 5) Śiva is prayed to bestow *maṅgala*; his gazing is attractive on account of grace; his lotus-feet is charming on account of smiling; his body is shining as he holds the digit of the moon; in him the three-fold miseries have come to an end; his transcendental body is full of manifestedly highest felicity; he is embraced by Pārvatī with her hands.

'*Kṛipālalitavīkṣaṇam*' suggests the *anugraha śakti* of Śiva (See Ahirbudhnyasaṁhitā 14.35 for this *śakti*). Most of the *dhyānas* of Śiva (as stated in Tāntric works) describe the smiling face of Śiva by using the words like *smeravaktra*, *smitamukha*, *cāruhasa* etc. Since Śiva's body[15] is transcendental, it is rightly regarded as *paramasaukhya-sac-cid* (*saukhya* stands for *sukha* i. e, *ānanda*).

In many of the *dhyānas* of Śiva as given in Tantra works we often find the description which is similar to the epithet *dharādharasutābhujodbalayitam*.[16]

The three kinds of *tāpa* (miseries) are vividly described not only in the works on philosophy, but also in the Purāṇas. They are *ādhyātmika* (arising within one-self), *ādhibhautika* (inflicted by

13. Cp. प्रसिद्धं च पुराणागमेषु शिवस्य लिङ्गरूपेण हृदि सन्निधानम् (शिवाकर्मणिदीपिका 1. 3. 24).
14. Cp. अञ्चु विशेषणे—अतिशयः । अञ्चयति अर्थात् व्यक्तीकरोतीत्यर्थः (क्षीरतरङ्गिणी 10. 188).
15. In connection with the *vapus* (body) of Śiva the following passage is to be noted : त्रिविधं परमशेस्य वपु लोकेप्रशस्यते ॥ निष्कलं प्रथमं चैकं ततः सकलनिष्कलम् । तृतीयं सकलं चैव नान्यथेति द्विजोत्तमाः ॥ (Linga-p. 1. 75. 30-31).
16. "हस्तेनाश्लिष्टदेहं मणिमयविलसद् भूषणायाः प्रियायाः"; "वामोरुन्यस्तपाणेररुणकुवलयं सन्दधत्याः प्रियायाः", "वृत्तोत्तुङ्गस्तनाग्रे निहितकरतलः";

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

some other creatures) and *ādhidaivika* (through natural calamity); *vide* Viṣṇu-p. 6 5.1-42; Nāradīya-p.1.46; Liṅga-p.1.86; Śiva-p.5.23 etc.

(*Verse* 6) Śiva, on account of possessing the sattva, rajas and tamas *guṇas*, sustains, creates and destroys the world respectively, though in reality he transcends *māyā* (the *guṇas*); it is he to whom the names Brahmā etc. are given; he is truth, bliss, taintless, infinite and eternal; he possesses limitless awareness; he is realized through such means as are dominated by sattva; we meditate on him.

The printed reading is सप्त गुणवान्. Apparently the reading *sapta* seems to be valid, for the Purāṇas often speak of seven *lokas*. But since the verse mentions the names of the rajas and tamas *guṇas* and since it speaks of the three functions by using the words *dhatte*, *sraṣṭā* and *saṁhartā*, it is quite natural that the verse must mention the sattva *guṇa* also which is connected with creation (cp. the word *sraṣṭā*). The word sattva is to be compounded with the word *guṇavān*.

Since *māyā* is said to be identical with the three *guṇas*,[17] the word *guṇa* in *guṇavatīm* (qualifying *māyā*) signifies sattva, rajas and tamas. Śiva's transcending *māyā* is an established doctrine of the Śaivas. Śaivas take *ānanda* in the sense of *svātantrya* (Tantrasāra, Āh. 1).

That Śiva is called by the names (*saṁjñās*) like Viṣṇu etc. is expressly stated in the Purāṇas.[18]

In *sattvasamanvaya*, sattva means either the *sattvaguṇa* or the *buddhi*. It is difficult to construe *samanvaya* with *sattva* in these senses. The context shows that *sattvasamanvaya* is to be taken in the sense of *sattva-śuddhi* and the like; cp. Chāndogya-up. 7.26.2 (सत्त्वशुद्धौ ध्रुवा स्मृतिः····विप्रमोक्षः).

17. सा मूलप्रकृतिर्माया त्रिगुणा (शिव० 7. 2. 4.16).
18. शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः । संसारबन्धुः सर्वज्ञः परमात्मेति मुख्यतः ।। नामाष्टकमिदं तस्य प्रतिपादकमीशितुः । (Śiva-p. 7. 1. 12. 23-24a ; quoted by Nil. on Anuśāsana-p. 17. 54); तमसा कालरुद्राख्यो रजसा कनकाण्डजः । सत्त्वेन सर्वगो विष्णुर्नैर्गुण्येन महेश्वरः ।। (Liṅga-p. quoted in the bhāṣya on Lalitāsahasranāma, p. 68).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(*Verse* 7) Śiva has the *tripuṇḍra* mark as well as the *tilaka* mark made of musk on the forehead; he holds a shining wreath and wears a *kaupīna* wrapped or worn round the loins; he has on his head the king of the snakes and the digit of the moon; he is the illuminator of all and resides in the Aruṇa hill with his excellence.

The *tripuṇḍra* mark is the three oblique lines.[19] This mark is highly eulogized in the works on Śaivadharma and Śaiva Upaniṣads.[20] The mark is mentioned in the Gṛhyasūtras also (see the Āhnika section in the Smṛtimuktāphala). The *tilaka* mark is made either with musk or with sandalwood paste as is stated in sectarian works. Like *niṭala niṭila* is also used in the Purāṇas; *vide* D. Bhāg. 7.31.38. Siva's holding a wreath is stated in the Mahimnaḥstotra (24) also.

Śiva wearing a *kaupīna* shows his beggar form. On account of holding the moon Śiva is sometimes called Candramauli or Candrārdhamauli.

Pradīpa is not a lamp, but flame.[21] Since Śiva illuminates the hearts of all beings i. e. since he shows the way of acquiring self-knowledge or *mokṣa* he is called 'flame'; cp. ज्ञानप्रदीपो हरः in the first verse of the Vairāgyaśataka. Since Śiva bestows divine knowledge to the embodied beings so that they can get rid of sufferings he is said to be *bheṣaja* (medicament; cp. भेषजं भवरोगिनाम् Liṅga-p. 1.27.51). The hill known as Aruṇācala is regarded as one of the seats of Śiva. It is situated in the South Arcot district in Tamil Nadu.

In *vijayate*, the root *ji* does not mean 'to conquer' but to 'exist with majesty or glory (विजयते = सर्वोत्कर्षेण वर्तते).

---

19. भ्रुवोर्मध्ये समारभ्य यावदन्तो भवेद् भ्रुवोः ।
मध्यमानासिकाङ्गुल्योर्मध्ये तु प्रतिलोमतः ।
अङ्गुष्ठेन कृता रेखा त्रिपुण्ड्राख्याभिधीयते ॥; See also Kalki-p. 1. 4. 20-21. Padma-p. 6. 253.

20. त्रिणेत्रं त्रिगुणाधारं त्रयाणां जनकं प्रभुम् ।
स्मरन् नमः शिवायेति ललाटे तत् त्रिपुण्ड्रकम् ॥ (बृहज्जाबाल उप. 4.34).

21. निविडावयवं हि तेजोद्रव्यं प्रदीपः (शारीरकभाष्य 2.3. 26); रूपविशेषस्यैव हि संस्थानं प्रदीपः (Śaṅkara on Bṛ. Up. 2. 4. 11).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(*Verse* 8) Paramaśiva is untouched by the modifications of the (three) *guṇas*; he, through his greatness, exists inside and outside the world equally; he is beyond speech and the function of the mind; he is nothing but infinite bliss.

The Śaivas usually speak of three *rūpas* of Śiva, namely *sthula*, *sūkṣma*, and what is beyond the *sūkṣma-rūpa* which is eternal or nondual.[22] It is this third aspect which is untouched by the modifications of the *guṇas*.

The *aspṛṣṭarūpa* of Śiva is vividly described in Liṅga-p. 2. 9. 36a-41a. Here Śiva is shown to be untouched by the five afflictions (*kleśas*), *karmans* with their results and the latent impressions.

Jagati ca bahirantar—This suggests the *aṣṭamūrti* aspect of Śiva which is said to pervade the world (अष्टमूर्तेर्जगद् व्याप्य स्थितस्य परमेष्ठिनः, Liṅga-p. 2.13.2).[23]

In *anantānadasāndra sāndra* signifies that Śiva is but infinite bliss; *sāndra* means the same as the word *ghana* in the Upaniṣadic words *vijñānaghana*, *prajñānaghana*. (*Ghana* excludes everything belonging to a different species).[24]

The verb *prapadye* suggests *prapatti* or *ātmanivedana* (self-surrender); cp. the following verse showing self-surrender to Śiva found in the Purāṇas : नमः शिवाय शान्ताय कारणत्रयहेतवे । निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥ (Bṛhaddharma-p. 1.10.71; Kālikā-p. 43.98)

—R. S. Bhattacharya

---

22. The mūrtis are : भूम्यम्भोग्निमरुद्व्योमक्षेत्रज्ञार्कनिशाकराः (शिव० 7. 2. 3. 19).

23. तदिदं त्रिविधं रूपं स्थूलं सूक्ष्मं ततः परम् । अस्मदाद्यमरैर्दृश्यं स्थूलं सूक्ष्मं तु योगिभिः । ततः परं तु यन्नित्यं ज्ञानमानन्दमद्वयम् । तन्निष्ठैस्तत्परैर्मन्त्रैर्दृश्यं तद्व्रतमास्थितैः ॥ (Śiva-p. 7. 1. 3. 27-28 quoted in the comm. Śivārkamaṇidīpikā 1.4. 22 with slight variations).

24. For this aspect of Śiva, see the Āgamic passage सदा प्रेमास्पदत्वतः । आनन्दरूपः····शिवसंज्ञितः (Śaivāgama quoted in the bhāṣya on Lalitāsahasranāma, p. 28).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

MANIFESTATIONS OF THE DIVINE IN THE *BHĀGAVATA PURĀṆA*

By

DANIEL P. SHERIDAN

In the history of Bhāgavatism and Vaiṣṇavism *Bhāgavata Purāṇa*, although a late piece of literature, gives a conclusive resolution to the problem of the personality of the Supreme Deity for all those schools of Vaiṣṇavism which regard it as authoritative. The Deity of later Bhāgavatism had an inclusive quality which enabled him to absorb many local deities and cults. It did this through the doctrine of the divine manifestations (avatāras) to which is to be attributed much of Bhāgavatism's popularity. "The syncretism effected through this doctrine," in the words of S. Jaiswal, "was sometimes brāhmaṇical and sometimes popular in character, but to a great extent it was the reconciliatory attitude of Vaiṣṇavism which gave the country a kind of cultural unity and succeeded in establishing the same kind of social structure all over India."[1] The *Bhāgavata Purāṇa* played an important role in this process. Further, the character of its Deity and his appearances, its non-dualism, and the fervor of its devotion, give the *Bhāgavata* its singular importance.

For the *Bhāgavata*, which is inclusive of popular deities, who the Deity is and what his name signifies is of decisive importance. Undoubtedly L. Shinn is correct when he says that as "one reads the *Bhāgavata* he may be confused about the divinity which lies somewhere behind all the names given to him."[2] But as one reads further in the *Bhāgavata*, especially in its climactic tenth canto, there is little doubt who Bhagavān is, namely Kṛṣṇa, although the relationship between all the manifestations, deities, and Bhagavān's many titles and epithets is far from clear, as would be expected

1. Suvira Jaiswal, *The Origin and Development of Vaiṣṇavism* (Delhi : Munshiram Manoharlal, 1967), p. 132.
2. Shinn, "Kṛṣṇa's *Līlā* : An Analysis of the Relationship of the Notion of Deity and the Concept of *Saṃsāra* in the *Bhāgavata Purāṇa*," p. 94.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

in the Purāṇic genre. It becomes clear that the personality of Bhagavān Kṛṣṇa subordinates to itself the titles and identities of Viṣṇu, Nārāyaṇa, Puruṣa, Īśvara, Vāsudeva, Janārdana, etc. The pervasive theme, then, of the *Bhāgavata Purāṇa* is the identification of Bhagavān with Kṛṣṇa.

The history of the gradual assimilation by Viṣṇu of the characters of Nārāyaṇa and Vāsudeva-Kṛṣṇa is obscured and much disputed by scholars. The title 'Bhagavān' originally was associated with Nārāyaṇa and through him became connected with Viṣṇu.[3] The meeting of Bhagavān Viṣṇu-Nārāyaṇa with the personality of Vāsudeva-Kṛṣṇa resulted in the doctrine of the divine manifestations, which centered on the manifestations of Kṛṣṇa. At least one redactor of the *Mahābhārata* brought to the fore the Kṛṣṇa manifestation of Viṣṇu. With the *Harivaṁśa* and the *Viṣṇu Purāṇa* the stories of the child and cowherder Kṛṣṇa are introduced into the literary tradition, enhancing his personality, but there is still no doubt in these books that the manifestation of Kṛṣṇa is a descent (avatāra) of the Supreme Deity Viṣṇu. By the time of the writing of the *Bhāgavata* in the ninth century, their roles have been reversed and Bhagavān no longer refers primarily to Viṣṇu but to Kṛṣṇa. Viṣṇu becomes one of the appearances of Kṛṣṇa in the transcendent realm. An examination of the text of the *Bhāgavata* will illustrate this transformation, which is one of the foundations for the rise of emotional devotion in later Hinduism.

The Four Ages

In the eleventh canto there is a description of the roles of the Deity in the four ages : "Keśava in the ages of Kṛta, Tretā, Dvāpara, and Kali assumes colors, names, and forms, and is worshipped in different modes."[4] In the first stage the Deity is

3. Jaiswal, *The Origin and Development of Vaiṣṇavism*, p. 38. This is contrary to the common assertion that the title 'Bhagavān' associated with the Vaiṣṇava deities was originally a title of Kṛṣṇa Vāsudeva. See H. C. Raychaudhury, *Materials for the Study of the Early History of the Vaishnava Sect* (New Delhi : Oriental Books Reprint Corporation, 1975 (1920), p. 60 ff. and Jitendranath Banerjea, *Paurāṇic and Tantric Religion (Early Phase)* Calcutta : University Press, 1966), p. 21.
4. XI. 5. 20.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

known as Haṁsa, Suparṇa, Vaikuṇṭha, Dharma, Yogeśvara, Amala, Īśvara, Puruṣa, Avyakta, and Paramātman. These are the titles of Viṣṇu, though they could be applied to any deity. In the Kṛta age the Deity has a white complexion and four arms. In the Tretā age he has a crimson hue and appears in the form of the sacrifices. Pious persons worship with the Vedic forms and Hari is the embodiment of the gods. In the Dvāpara age the Lord has a dark complexion, wears the Kaustabha gem and the Śrīvatsa curl. Worship is both through the Vedic and the Tantric rituals and seeks the Supreme Reality in a human form with the marks of a king. In the Kali age the *Vedas* are neglected and Bhagavān is worshipped by the Tantric practices of chanting and singing his name.[5] Even though Kṛṣṇa lived in the Dvāpara Age, there is a special blessing for those born in the Kali age, which begins at Kṛṣṇa's death. As the world runs down in the various ages, each succeeding age is in greater need of the Supreme Deity's presence. While these ages are a traditional device to show that the universe is running down, the *Bhāgavata* uses them to show the value and importance of the Supreme Deity in his Kṛṣṇa aspect, who is more and more present as the universe degenerates.

In the Kali age, which begins with Kṛṣṇa's death, people delight in sin. Sin could not enter the world until Kṛṣṇa had left it; the two are incompatible. But as Kṛṣṇa's physical presence departs his memory takes on a new importance. "Indeed there is one great quality in the Kali age, which is a store house of faults, since by chanting about Kṛṣṇa attachment is loosened and a person reaches the Highest."[6] What was attained in the other ages by meditating on Viṣṇu, by sacrifice, or by worship, in the Kali age is attained through chanting and singing. The remembrance and celebration of Bhagavān Kṛṣṇa is as important for liberation and final beatitude as his physical presence as an avatāra, perhaps more so. Kṛṣṇa's death and departure is the blessed occasion for the appearance of the *Bhāgavata*, which "benefits those who have been blinded in the Kali age."[7]

5. Cf. XI 5. 24–26
6. XII. 3. 51.
7. I. 3. 44a.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The special revelation of Bhagavān's glories and activities among humans in the different ages made to the sages in the *Bhāgavata* enables them to love and devote themselves to Bhagavān in a way more intense than ever before possible. The *Purāṇa* of the devotees of Bhagavān, the *Bhāgavata*, extends his presence in the Kali age and functions as an avatāra on behalf of people oppressed by the absence of Bhagavān. Indeed the *Bhāgavata Māhātmya* from the *Padma Purāṇa* identifies Bhagavān and the *Bhāgavata* : "The sages come to regard the holy book of the *Bhāgavata* as a form of Bhagavān (bhagavadrūpam) in the Kali age and capable of conferring the reward of speedy access to Vaikuṇṭha by being read or heard."[8] Later on the *Māhātmya* describes the *Bhāgavata* as consisting of Brahman (brahmātmaka).[9] If the singing and hearing of the stories of Bhagavān in all his manifestations is conducive to liberation, it must be necessary that the primary subject of those stories be the Supreme Being. There is little doubt that this is the intent of the redactor of the *Bhāgavata* when he narrates the stories of Kṛṣṇa or the stories of Viṣṇu's descents which are related to Kṛṣṇa. In effect he so identifies Kṛṣṇa with Viṣṇu as to replace Viṣṇu with Kṛnṣa as the primary personality of the Supreme Deity. This conversion of Viṣṇu into Kṛṣṇa by the *Bhāgavata* has had great influence on the nature of the devotional life of Vaiṣṇavas ever since.

The Questions of the Sages

In the first canto the sages ask Sūta questions the answers to which comprise the *Bhāgavata*. Four of those questions or requests have a bearing on the problem of the relation between Viṣṇu and Kṛṣṇa. The first question the sages ask Sūta is to draw out the essence of the Scriptures from the confusion of differing assertions which perplex the sages. They seek their true import. The second question seeks the purpose "for which Bhagavān, the Lord of the Sātvatas, was born of Devakī, Vasudeva's wife."[10] The son of Devakī was Kṛṣṇa, thus identifying Kṛṣṇa with Bhagavān. The third question seeks to know the story of the noble actions, which have been told by the great seers, of him who for sports assumes forms (kalā)."[11] This question refers to the various appearances

8. *Bhāgavata Māhātmya* I. 20.
9. Cf. *Bhāgavata Māhātmya* III. 74.
10. I. 1. 12.
11. I. 1. 17.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

of Bhagavān, traditionally thought of as the manifestations of Viṣṇu. The fourth question centers again on Kṛṣṇa : "O wise one, therefore describe the auspicious stories of Hari's manifestations, who performed sports of his own by means of his creative energy."[12] The sages are never sated with hearing stories of Kṛṣṇa. Thus all the questions and requests are related to Kṛṣṇa who is the source of the various manifestations of the Supreme Deity. Further by asking a separate question about the biography of Kṛṣṇa, the sages indicate that there is a distinction between the descent of Kṛṣṇa and the other descents. The distinction, as we see in Sūta's reply, is that Kṛṣṇa is the perfect manifestation and revelation of Bhagavān, the Supreme Deity[13] : "This inquiry refers to Kṛṣṇa by whom the self is purified. That certainly is the highest duty of men from which follows devotion to him."[14]

In the month of Vaiśākha (April-May) from the first day of the bright half to the ninth the usual Rāmāyaṇa *navāhna* took place in the Sarasvatī temple at Chakiya. *Pāṭhakartā* was the pujāri of Thakur Ji. The *pravacanakartās* were Śrī Sivanarayana Vyasa, Ramprasad Avasthi, Sant Kumar of Navab Ganj, S. D. Sri Vaisnava of Chakiya. The discourses were held in Kālī temple. The Chairman of the Trust, H. H. Dr Vibhuti Narain Singh, attended the *navāhna pārāyaṇa* daily.

Maharaja Kashiraja Dharma Karya Nidhi

Under this Trust various religions rites are celebrated during the whole year. Besides, this Trust also conducts three educational Institution—Maharaja Balwant Singh Degree College, Maharaja Manasa Ram Law College and Maharani Ram Ratna Kunwari Sanskrit Paṭhaśālā.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुराणम्

(भागः-२६; अङ्कः-२)

PURĀṆA

(Vol. XXVI. 2)

संस्कृत-खण्डः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतविद्वांसोऽभ्यर्थ्यन्ते यत्ते पुराणपत्रिकायां प्रकाशनार्थम् (१) पुराणगत-दर्शनशास्त्र-धर्मशास्त्रविषयपरान् लेखान् (२) पुराणोक्त-दुरूहार्थकास्पष्टार्थकवचनव्याख्यापरान् लेखांश्च प्रेषयेयुरिति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आङ्गलभाषानिबद्धानां लेखानां संक्षेपाः

भागवतपुराणे भगवतोऽभिव्यक्तयः

MANIFESTATIONS OF DIVINE IN THE BHĀGAVATA PURĀṆA

DR. DANIEL P. SHERIDAN

श्रीमद्भागवतमहापुराणे भगवतः श्रीकृष्णस्य चरितं प्रधानप्रतिपाद्यं वर्तते। भगवान् श्रीकृष्णः भगवतो विष्णोः पूर्णावतारोऽत एव स्वयमेव सर्वोच्चनियामको विष्णुर्ब्रह्म वा – कृष्णस्तु भगवान् स्वयम्। अधर्मप्राबल्ये सति भगवतोऽतारग्रहणं प्रथितमेव। वैष्णवानां भक्तिसम्प्रदाये भगवतः श्रीकृष्णस्य चरितं मुख्यमेव प्रतिपाद्यं वर्तते। अत्रास्मिन् निबन्धे विदुषा लेखकेन भगवतो गुणावतार-अंशावतार-लीलावतार-कलावतार-पूर्णावतारादिविविधावताराणां सम्यक् विवेचनं विधाय प्रतिपादितं यद् भगवान् श्रीकृष्णो भगवतो विष्णोः पूर्णावतारः अत एव स्वयमेव भगवान्।

पुराणानां पाठान्तरस्य विवेचनं तेषां पुराणानां पाठसमीक्षित-संस्करणेषु प्रभावश्च

SOME OBSERVATION ON THE VARIANT READINGS IN THE PURĀṆIC TEXTS AND THEIR IMPORTS FOR THE CRITICAL EDITIONS

DR. GIORGIO BONAZZOLI

पुराणेषु पाठपरम्पराक्रमजन्या लेखकप्रमादजन्याश्च बहवो दोषा दृश्यन्ते। तेषां दोषाणां निरासायेदमावश्यकं यत् पाठसमीक्षासिद्धान्तानामुपयोगः प्राचीनतमपाठनिर्धारणाय भवेत्। एषां सिद्धान्तानामुपयोगः पुराणेतरग्रन्थानां संपादने प्रयुज्यत एव। अत्र लेखकमहोदयेन प्रतिपादितं यत् पुराणेषु यानि बहूनि पाठान्तराणि पाठपरम्पराक्रमजन्यानि लेखकप्रमादजन्यानि वा न वर्त्तन्ते, तादृशानि पाठान्तराणि मुख्यतया त्रिप्रकारकाणि वर्त्तन्ते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. अक्षराणां शब्दानां स्वेच्छया परिवर्त्तनम्

२. अतिरिक्तसंनिवेशो पाठलोपो वा तत्र पाठलोपो क्वचिद् भ्रमजन्यो, क्वचिच्च दृष्टिसञ्चारजन्यो वा भवति । अतिरिक्तसंनिवेशः प्रायशो भ्रमजन्यो न भवति, स चोद्देश्यविशेषेण सन्निवेश्यत इति ।

३. कथाभागे परिवर्त्तनम्, एतत् परिवर्त्तनं क्रमपरिवर्त्तनार्थं, संक्षेपार्थं, विस्तारार्थं वा क्रियते । क्रमपरिवर्त्तनं च स्वरूपपरिवर्त्तनार्थं क्रियते ।

पुराणेतिहासयोरुपलब्धानामेषां त्रयाणां पाठान्तरसम्बन्धिभेदानां संपादनाय प्रचलितपाठसमीक्षासिद्धान्तातिरिक्तानामन्येषां सिद्धान्तानामन्वेषणं तत्प्रयोगश्च आवश्यक इति लेखकेन प्रतिपादितम् ।

भागवतमहापुराणम्-मूलभागवतपुराणस्योपबृंहणम्

THE BHGĀAVATA MAHĀPURĀṆA-AN ENLARGEMENT OF UR-BHĀGAVATA

DR. MAHESHWARI PRASAD

अत्र लेखकेन विवेचितं यत् संप्रत्युपलब्धं श्रीमद्भागवतमहापुराणं कस्यचित्संक्षिप्तमूलभागवतमहापुराणस्योपबृंहितं रूपमस्ति । एतत्प्रतिपादनाय लेखकेन श्रीमद्भागवतमहापुराणस्य केषाञ्चिदंशानां तुलना श्रीमद्देवीभागवत-महापुराणस्योपलब्धैरंशैः कृता । देवीभागवतपुराणे उपलब्धै अंशे अस्य प्राचीनतरं रूपं दृश्यते । श्रीमद्भागवतमहापुराणे तेषां तेषामंशानांमुपबृंहणं परिवर्त्तनं च तत्तद्रूपेण विशेषशैल्या च प्राप्यते । एतत्प्रसङ्गे लेखकेन द्वयोः टीकाकारयोः श्रीधरस्वामिविजयध्वजयोश्च कृतदशमस्कन्धीयटीकाभागयोः तुलनापि विहिता यदाधारेणैतत्प्रतीयते यत् समुपलब्धस्य श्रीमद्भागतमहापुराणस्य प्राचीनरूपं संक्षिप्तमासीदिति, काले काले तस्य विस्तरेण परिवर्त्तनेन च रूपमुपबृंहितं जातम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गरुडपुराणस्य प्रेतकल्पः (विविधपाठसंप्रदायानां प्रारम्भिकं विवेचनम्)

THE PRETAKALPA OF THE GARUḌA PURĀṆA (A PRELIMINARY REPORT OF THE DIFFERENT VERSIONS)

Dr. Giorgio Bonazzoli

गरुडपुराणान्तर्गतप्रेतकल्पस्य वहवः पाठसम्प्रदायाः प्राप्यन्ते। अतः गरुडपुराणस्य प्रेतकल्पीयपाठसमीक्षितसंस्करणस्य पाठसंपादनार्थमिदमावश्कं यदेतेषां पाठसंप्रदायानां पारस्परिकसम्बन्धस्याध्ययनं विधाय यथासंभवं सर्वेषां समाहारः एकस्मिन् द्वयोर्वा पाठसंप्रदाये भवेत्। संप्रति प्रायेण प्रेतकल्पस्य पञ्चदश पाठसम्प्रदायाः प्राप्यन्ते यथा ४९, ४५, ४०, ३७, ३५, ३४, ३२, ३०, २७, २४, १८, १४, १३, १० अध्यायात्मकाश्च।

एभ्यो संप्रदायेभ्योऽतिरिक्तं झुनझुणू (राजस्थान) वासिनो नवनिधिरामस्य षोडशाध्यायात्मकः सारोद्धारनामको ग्रन्थोऽपि प्राप्यते। एष नवनिधिरामः अष्टादशशताब्द्यां शार्दूलनृपे राज्यं शासति वर्त्तमान आसीत्। मृत्यूपरान्ते अस्यैव सारोद्धारस्य पठनपरम्परेदानीं दृश्यते।

अस्मिन् निबन्धे उपलब्धेषु एषु पाठसंप्रदायेषु केषाञ्चित् पाठसंप्रदायानां पारस्परिकः सम्बन्धो लेखकेन विचारितः—

१. वेङ्कटेश्वर-वङ्गवासि-जीवानन्दाभ्यां प्रकाशितानां मुद्रितसंस्करणानां सम्बन्धः।

२. वेङ्कटेश्वर संस्करणस्य ११--४९ पर्यन्तानामध्यायानां जीवानन्दसंस्करणस्य १--३५ पर्यन्तानामध्यायानां च संबन्धः।

३. वेङ्कटेश्वर संस्करणस्य १--१० पर्यान्तानामध्यानां तथा तस्यैव ११--४९ पर्यन्तानामध्यायानां परस्परं संबन्धः।

४. गङ्गानाथ झा संस्थानस्य ३० अध्यायात्मकस्य ८२६।५०१० संख्याकस्य हस्तलेखस्य तथा मथुरानगर्याः १८८४ वर्षे प्रकाशित ३४ अध्यायात्मकस्य संस्करणस्य तथा ३५ अध्यायात्मकस्य जीवानन्दसंस्करणस्य परस्परं सम्बन्धः।

५. १८ अध्यायात्मकस्य अड्यार संस्थानस्य टी० आर ७७७ संख्याकस्य हस्तलेखस्य जीवानन्दसंस्करणस्य च सम्बन्धः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. दशाध्यायात्मकः पाठ ।

७ नवनिधिरामकृतः सारोद्धारः ।

एषां सम्बन्धानामध्ययनेन प्रतीयते यदिमे सर्वे पाठसम्प्रदायाः ३२, वा ३५, अध्यात्मकस्य पाठस्योपजीविन इति । अनेन सम्प्रदायेन १० अध्यायात्मकः षोडशाध्यायात्मको वा पाठः आंशिकरूपेण पृथगेवास्तीति—

नरकविषये शंकराचार्येण कृतः पौराणिकमतोल्लेखः किं समीचीनम् ?

IS ŚANKARA'S ASSERTION OF THF PURĀṆIC VIEW ABOUT NARAKA VALID ?

DR. RAM SHANKAR BHATTACHARYA

अपि च सप्त (३.१.१५) इति ब्रह्मसूत्रव्याख्यानावसरे शंकराचार्येण भणितं—अपि च सप्त नरका रौरवप्रमुखा दुष्कृतफलोपभोगभूमित्वेन स्मर्यन्ते पौराणिकैः ।

वर्तमानपुराणानामध्ययनेन प्रतीयते यत् शंकराचार्यस्य कथनं पूर्णरूपेण यथार्थंभूतं न वर्तते । अत्र लेखकेन सर्वेषां पुराणानां केषाञ्चिदुपपुराणानाञ्च नरकसंबन्धिविवरणस्याध्ययनं विधाय प्रतिपादितं यत्पुराणेषु नरकसंख्या विभिन्ना वर्तते । एषा संख्या एकविंशतिरष्टाविंशतिर्वा प्रामुख्येन वर्तते । तेषां सप्त संख्या केवलं मार्कण्येय-वायु-ब्रह्माण्डपुराणेष्वेवोपलभ्यते । विष्णुपुराणे (१.५.४१) सप्तनरकाणां नाम वर्तंते किन्तु तत्र सप्त इति संख्या न दत्ता । पौराणिकपाठैः सह शंकराचार्यमतस्य तुलनया अधोनिर्दिष्टानि तथ्यानि स्फुटीभवन्ति :

१. पुराणेषु नरकाणां संख्या एकविंशतिरष्टाविंशतिर्वा प्राप्यते इति अनेन शंकराचार्योऽपरिचित आसीत् ।

२. मार्कण्डेयपुराणे सप्त संख्या न दत्ता वर्तते अतः इदं संदिग्धं यत् शंकराचार्यस्य मतं मार्कण्डेयानुसारि ।

३. इदमपि सुस्पष्टं यत् शंकराचार्यस्य मतं विष्णुपुराणाश्रितं नास्ति ।

४. वायुब्रह्माण्डपुराणयोर्वर्णनमाधारीकृत्वैव शंकराचार्यस्यैतत्सूत्रव्याख्याने नरकसंख्यावर्णनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मगपुरोहितास्तेषां सूर्योपासनायां प्रभावश्च

THE MAGIAN PRIESTS AND THEIR IMPACT ON SUN WORSHIP

DR. C. D. PANDEYA

मगाः सूर्योपासका अग्न्युपासकाश्च पुरोहिता आसन्। महाभारतविष्णुपुराणसाम्बपुराणादीनामाधारेणेदं ज्ञायते यत् ते शाकद्वीपाद् जम्बुद्वीपमानीताः। मगैः सूर्योपासना विशेषरूपेण प्रभाविता जाता विशेषतो मन्दिरेषु मूर्तिनिर्माणेषु च। ख्रिष्ट्रीयषष्ठशताब्दीं यावत् ते हिन्दूसमाजस्य अङ्गभूता संवृत्ताः शासकैश्च संरक्षिताः।

पैजवनः पैलवको वा शूद्रयोगी

PAIJAVANA OR PAILAVAKA : A ŚŪDRA YOGIN

DR. JYOTIRMAYEE BHATTACHARYA (MISRA)

अत्र लेखिकया विष्णुधर्मपुराणस्य एकस्य श्लोकस्य हठयोगप्रदीपिकाग्रन्थस्य (४.१५) ज्योत्स्नाटीकायामुपलब्धस्य पाठस्य विवेचनं प्रस्तुतम्। अस्मिन् पद्ये पैलवकनामकः एकः शूद्रयोगी वर्णितो वर्तते। पुराणेषु एतादृशं नाम न प्राप्यते किन्तु स्कन्दपुराणीये नागरखण्डे शान्तिपर्वणि च पैजवन नामको शूद्रयोगी प्राप्यते। लेखिकामहोदयाया मतानुसारं मूलपाठः पैजवन इत्यासीत् यस्य परिवर्तनं पैलवकरूपेण कृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वभारतीयकाशिराजन्यासस्य कार्यविवरणम्

(जनवरी-जून १९८४)

गरुडपुराणकार्यम्

गरुडपुराणस्याचारकाण्डस्य पाठसंवादलेखनकार्यं प्रचलति। अद्यावधि सप्त देवनागरीहस्तलेखानां द्वयोर्नेवारीलिपिहस्तलेखयोश्च पाठसंवादकार्यं पूर्णतां गतम्। द्वयोर्नेवारीहस्तलेखयोर्द्वयोर्वङ्गलिपिहस्तलेखयोश्च संवादकार्यं प्रचलति। उत्कललिपिहस्तलेखस्यान्वेषणं क्रियते। शारदालिप्यां एको हस्तलेखः काश्यां हिन्दुविश्वविद्यालये वर्तते यस्य जेराक्सप्रतेः प्राप्तये प्रयत्नः क्रियते। डा० जोर्जो वोनाजुलीमहाशयस्य दक्षिणभारतयात्रया इदं ज्ञातं यद् दक्षिणभारतस्य कस्मिंश्चिदपि विख्याते ग्रन्थागारे आचारकाण्डस्य हस्तलेखो न विद्यते। तेन महाशयेन इमे ग्रन्थागारा विलोकिताः गवर्नमेण्ट ओरिण्टल मैनुस्क्रिप्ट लाइब्रेरी, मद्रास; अड्यार लाइब्रेरी मद्रास; कुप्पुस्वामी रिसर्च इन्स्टीच्यूट, मद्रास; फ्रेन्चइन्स्टीच्यूट, पाण्डिचेरि; महाराज सर्फोजीज सरस्वती महल लाइब्रेरी, तञ्जाऊर; श्रीरङ्गनाथ स्वामी देवस्थानम्, श्रीरङ्गम् त्रिचिरापल्ली; ओरियण्टल रिसर्च इन्स्टीच्यूट एण्ड मैनुस्किप्ट्स लाइब्रेरी, ट्रिवेड्रम्; संस्कृत कालेज त्रिपुनीत्तूर कोचीन; कालीकट विश्वविद्यालय; ओरियण्टल रिसर्च इन्स्टीच्यूट, मैसूर; पेजावर मठ, उडुपी; श्रीवेङ्कटेश्वर ओरियण्टल रिसर्च इन्स्टीच्यूट, तिरुपति; केन्द्रीय संस्कृत विद्यापीठ, तिरुपति। एषु कुत्रापि आचारकाण्डस्य हस्तलेखो नास्ति केवलं गवर्नमेण्ट ओरियण्टल मैनुस्क्रिप्ट्स लाइब्रेरी स्थाने तेलगुलिप्यां लिखितः एकोनविंशशताब्द्याः एको हस्तलेखो वर्तते। एष हस्तलेखोऽपूर्णो वर्तते तथा जीवानन्दसंस्करणेन सह साम्यं भजते। एष हस्तलेखः प्रारम्भतः ६९ अध्यायस्य चतुर्थश्लोकं यावद् लिखितो वर्तते।

२. हस्तलेखेषु विविधसम्प्रदायानामवस्थित्या प्रेतकल्पस्य अध्ययनं क्रियते अस्याध्ययनस्य फलमस्मिन्नेव अङ्के (१५८-१९५ पृष्ठेषु) प्रदत्तमस्ति लेखरूपेण। अद्यावधि षण्णां हस्तलेखानां पाठसंवादः कृतः।

३. अद्य यावद् ब्रह्मकाण्डस्य चतुर्णां हस्तलेखानां पाठसंवादः कृतो वर्तते। इमे सर्वे हस्तलेखा देवनागरीलिप्यां वर्तन्ते। दक्षिणभारतग्रन्थालयेषु दश हस्तलेखा वर्तन्ते येषु पञ्च पूर्णाः पञ्च च अपूर्णा वर्तन्ते। एषु हस्तलेखेषु द्वौ हस्तलेखौ तेलगुलिप्यां षट् हस्तलेखा नन्दिनागरीलिप्यां द्वौ च देवनागरीलिप्यां वर्तन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवधर्मपुराणस्य शिवधर्मोत्तरपुराणस्य च कार्यम्

शिवधर्मोत्तरपुराणस्याधारपाठलेखनकार्यं पूर्णं जातम् । एष आधारपाठः लण्डननगरस्थस्य 'वेलकम्' इति संस्थानतः प्राप्तस्य माइक्रोफिल्मप्रतेः आधारेण लिखितः । एषा माइक्रोफिल्मप्रतिः एकस्य प्राचीनवर्तुलनेवारीलिप्यां लिखितस्य हस्तलेखस्यास्ति । द्वौ अपरौ हस्तलेखौ तञ्जाउर नगरे स्थितात् सरस्वतीमहलपुस्तकालयात् प्राप्तौ ययोः पाठसंवादकार्यं करणीयमस्ति ।

मानसखण्डकार्यम्

स्कन्दपुराणान्तर्गतस्य मानसखण्डस्य प्रकाशनं विगते 'जनवरी' मासस्याङ्के (XXVI.1) प्रारब्धम् । तत्र आदितो दश अध्यायाः प्रकाशिताः । इदं संस्करणम् अस्माकं पुस्तकालये प्राप्तस्यैकहस्तलेखस्याधारेण आसीत् । इदानीं नेपाल-देशान्तर्गतकाठमाण्डूनगरे स्थितस्य राष्ट्रीयाभिलेखागारस्य द्वौ देवनागरीलिपि-हस्तलेखौ प्राप्तौ । तयोरुपयोगोऽपि अस्य खण्डस्य सम्पादने भविष्यति ।

वेदपारायणम्

विगते माघमासे शुक्लपक्षस्य प्रतिपत्तिथिमारभ्य पूर्णिमातिथिपर्यन्तं कृष्णयजुर्वेदस्य संहिताब्राह्मणारण्यकोपनिषदां पारायणं रामनगरदुर्गस्थिते व्यासेश्वरमन्दिरे श्रीवीरेश्वरद्राविडमहोदयेन कृतम् । श्रीवरदराजघनपाठी श्रोता आसीत् । पारायणसमाप्तौ पारायणकर्त्रे श्रोतृमहोदयाय च नियता दक्षिणा प्रदत्ता ।

पुराणपाठः

रामनगरस्थे जनकपुरमन्दिरे चैत्रशुक्लप्रतिपत्तिथिमारभ्य नवमीं तिथिं यावद् अध्यात्मरामायणस्य पारायणं श्रीरामजीमिश्रमहोदयेन कृतम् ।

पुराणविभागे आगता विद्वांसः

१. डा० एवर्ट कजिनमहोदयः फोर्डम विश्वविश्वविद्यालय, न्यूयार्क इत्य-त्रत्यः प्राध्यायपकः । एष महाशयः विश्वाध्यात्मिकता (World spirituality) इति नाम्नः विश्वकोषस्य प्रधानसंपादकः । एष महोदयः १३ जनवरी १९८४ दिनाङ्के पुराणविभागं न्यासस्याध्यक्षान् तत्र भवतः काशिनरेशांश्च दृष्टवान् । पुराणविगास्य दर्शकपुस्तके लिखति—तत्र भवतां महाराजानां प्रासादस्य च दर्शनं तथा पाठसमीक्षात्मकसंस्करणविषये महत्त्वपूर्णस्य च कार्यस्यावलोकनं आनन्दस्य सम्मानस्य च विषय आसीत् ।

२. ट्रावनकोर नरेशस्तत्रभवान् महाराजः रामवर्मा १२-३-८४ दिनाङ्के पुराणविभागं दृष्टवान् । एष दर्शकपुस्तिकायां लिखति—तत्र भवतां काशिराजानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संरक्षणे निर्देशने च पुराणप्रकाशनन्यासेन क्रियमाणं कार्यं ज्ञात्वा अतीव प्रभावितोऽस्मि। संस्कृतेः पुनरुद्धारस्यैतत् कार्यम् वृद्धिमियादिति कामये।

३. टोरण्टो विश्वविद्यालय, कनाडा, इत्यत्रत्यः प्राध्यापकः डा० ए. के. वार्डरमहोदयः। एष महाशयः भारतीयकाव्यसाहित्यविषयकस्य ग्रन्थस्य प्रणेता। एष महोदयः २० मार्च १९८४ दिनाङ्के काशिकहिन्दुविश्वविद्यालयस्य प्राध्यापकेन डा० रेवाप्रसादद्विवेदिमहोदयेन सह पुराणविभागम् आगतः। सः लिखति—अत्र वाराणस्यां सक्रियरूपेण क्रियमाणस्य पुराणानां पाठसमीक्षासम्बन्धिकार्यस्यावलोकनेनातीव हर्षितोऽस्मि। अस्य कार्यस्याहं बहुवर्षेभ्यः अतीवौत्सुक्येन प्रतीक्षणमकार्षम्। ममाकांक्षाऽस्ति यद् एतादृशबृहत्कार्यनिमित्तमधिकानां विदुषामावश्यकता वर्तते येन वै कार्यं शीघ्रतया समाप्तिमियाद् येन भारतीयपरम्परायाः सर्वेभ्यो रसिकेभ्यः सुलभं भूयात्। अहमिदमपि विश्वसिमि यद् एषा योजना पाठसमीक्षाया वैज्ञानिकपद्धत्या एव प्रचलिष्यति तथा तेषां विदुषां विरोधस्य ध्यानं न करिष्यति ये समये समये अनेन आधारेणास्य विरोधं कुर्वन्ति यद् अनया पद्धत्या तेषां ज्ञातः प्राचीनपाठः परिवर्तितो भविष्यति। अस्याः पद्धत्या उद्देश्यं संभावितस्य प्राचीनतमस्य पाठस्य संरक्षणं तथा परवर्तिपाठस्य प्रदर्शनमस्ति। अस्मिन् कार्ये कस्यापि विरोधो न भवितुमर्हति यतो निर्धारितपाठाधारेणाध्ययनस्य सर्वाण्यङ्गानि उपकृतानि भविष्यन्ति। अस्यां योजनायां कार्यकर्तृभ्यः साफल्यं कामये येन पुराणानां पाठसमीक्षितसंस्करणमस्यमभ्यः सुलभं भवेत्।

४. वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य कुलपतिः डा० रामकरणशर्मा ५-६-८४ दिनाङ्के तत्रभवतः काशिनरेशान् डा० विभूतिनारायण सिंह महोदयान् दृष्टवान् पुराणविभागस्य चावलोकनं कृतवान्। स लिखति—

श्री काशिराजन्यासपरिचालितः पुराणविभाग एष हरति मनांसि मनस्विनाम्। 'इतिहासपुराणाभ्यां वेदार्थमुपबृंहये' दिति सर्वेपि वयं स्वीकुर्मः। तथापि नान्यत्र कुत्रचिदपि सर्वाङ्गीणमध्ययनं पुराणविद्यायास्तथा व्यवस्थापितं दृश्यते यथा श्रीकाशिराजाधिष्ठितेऽस्मिन् पुराणविभागे। जयति श्रीकाशिराजः। जयति च स्फीतायतिरेष पुराणविभागः।

नन्देश्वरभवने राष्ट्रपतेः स्वागतम्

२५ मई १९८४ दिनाङ्के तत्रभवता काशिनरेशेन महाराजेन डा० विभूतिनारायणसिंहमहोदयेन भारतस्य महामहिमराष्ट्रपतेः ज्ञानी जैलसिंहमहोदयस्य स्वागतं कृतम्। राष्ट्रपतेः स्वागते अल्पाहारस्य व्यवस्थाऽऽसीत् यस्मिन् नगरस्य विशिष्टा नागरिका, विश्वविद्यालयानां कुलपतयः, जनपदस्याधिकारणः, केन्द्रीय मंत्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकल्पनाथ रायः, राज्यसभाया उससभापतिः श्रीश्यामलाल यादवः, स्थानीयगोरखा रेजिमेण्ट इत्यस्याधिकारी, कांग्रेस संस्थायाः कार्यंकार्यंध्यक्षः पं० कमलापतित्रिपाठिमहोदयः तथा सर्वभारतीयकाशिराजन्यासस्य न्यासधारिणौ पं० बलदेव उपाध्यायः डा० रघुनाथसिंहमहोदयश्च उपस्थिता आसन्। तत्रभवान् काशिनरेशः महाराजो डा० विभूतिनारायणसिंहमहोदयः उपस्थितजनानां परिचयं राष्ट्रपतिमहोदयाय प्रदत्तवान्।

अस्मिन् अवसरे तत्र भवता काशिनरेशेन महामहिमराष्ट्रपतिमहोदयः सर्वभारतीयकाशिराजन्यासस्य पुराणप्रकाशनविषये परिचायितः। महाराजैः राष्ट्रपतिमहोदयाय वामनपुराणस्य हिन्द्ययनुवादः पुराणपत्रिकायाः रजतजयन्त्यङ्कश्च प्रदत्तः। राष्ट्रपतिमहोदयः प्रकाशनैः अत्यन्तप्रमावित आसीत्। तेन कथितं यत् स इमान् ग्रन्थान् पठिष्यति। राष्ट्रपतिमहोदयः २४-२५ मई दिनाङ्कयोः वाराणस्यामवात्सीत्। तेनात्र विविधतीर्थस्थलानां दर्शनं कृतम्।

महाराजकुमारस्य समावर्तनसंस्कारः

अप्रैलमासे चिरंजीविनो महाराजकुमारस्य समावर्तनसंस्कारः सम्पन्नः। उपनयनान्तरं महाराजकुमारो ब्रह्मचर्याश्रमं प्रविश्य वेदाध्ययनम् सम्पादितवान्। सम्प्रति ब्रह्मचर्याश्रमतः तेषां समावर्तनम् सम्पन्नम्। समावर्तनसंस्कारावसरे दिनत्रयं यावत् संस्कारकृत्यानि संपादितानि ब्रह्मणाश्च भोजिताः। वयं महाराजकुमारस्य जीवनसाफल्याय कामयामहे।

सहयोगिन्यासानां कार्यविवरणम्

१. महाराज बनारस विद्यामन्दिर न्यासः

वसन्तमङ्गलोत्सवः

प्रति वर्षमेष उत्सवः दिनत्रयं वसन्ते संपाद्यते। वसन्ते संपाद्यमानत्वादस्य वसन्तमङ्गलोत्सव इति नाम। अयमुत्सवः सायंकाले संपाद्यते यस्मिन् काशिकहिन्दूविश्वविद्यालयस्थस्य संगीतमहाविद्यालयस्य छात्राः स्वविद्यायाः प्रदर्शनं कुर्वन्ति। विद्यामन्दिरन्यासस्याध्यक्षास्तत्र भवन्तः काशिनरेशा डा० विभूतिनारायणसिंहमहोदयाः प्रतिदिनमस्मिन् उत्सवे सम्मिलिता भवन्ति। तैः सह महाराजकुमारो महाराजकुमार्यः विशिष्टनागरिकाश्च गानविद्यां शृण्वन्ति। उत्सवे सम्मिलितेभ्यः सर्वेभ्यः कलाकारेभ्यः प्रतिदिनं सायंसमये भोजनं प्रदत्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संग्रहालयः

सर्वे तीर्थयात्रिणः पयर्टकाश्च ये वाराणस्यामहोरात्रं तिष्ठन्ति रामनगर-दुर्गस्थस्य संग्रहालयस्यावश्यमेवावेक्षणं कुर्वन्ति। संग्रहालये शिविकाः, शस्त्राणि, वस्त्राणि, हस्तिदन्तनिर्मितवस्तूनि अन्यानि च बहूनि रुचिकराणि वस्तूनि सन्ति येषां प्रशंसनं दर्शकाः कुर्वन्ति विशिष्टदर्शकेषु अधोनिर्दिष्टा दर्शका दर्शकपुस्तके स्वाभिप्रायाणि इत्थं लिखितवन्तः।

१. माउङ्ग नूः ९-१-८४ दिनाङ्के–अहं मम परिवारश्च संग्रहालयं दृष्टवन्तः अस्माभिः बहूनि आनन्दजनकानि वस्तूनि दृष्टानि। अहं अस्य दर्शनार्थं पुनरागमिष्यामि।

२. श्रीनारायणमेननमहोदयः, दिल्ली नगरस्थिताया संगीत नाटक अकादमी संस्थाया अध्यक्षः १-३-८४ दिनाङ्के—अयं संग्रहालयः आश्चर्यकरः रुचिकरश्च यत्र विविधरुचीनां वस्तूनि। अनेन महतो संग्रहकारकस्य महत्याः रुचेरुदारतायाश्च परिचयः प्राप्यते।

३. ट्रावनकोरनरेशो महाराजरामवर्मा–१२-३-८४ दिनाङ्के इदं संस्थानमस्माभिर्दृष्टं तदेतदतीव रुचिकरं प्रशंसार्हं च। अहं तत्र भवन्तं काशिनरेशं प्रति अस्य ऐतिहासिक-सांस्कृतिक-महत्त्वमयस्य अद्वितीयसंग्रहालस्य निर्माण-निमित्तं धन्यवादज्ञापने आत्यन्तिकीं प्रसन्नतामनुभवामि।

संग्रहालयस्य चारुप्रस्तरनिर्मितः कच्छपः

महाराजविद्यामंदिर संग्रहालयस्य चारुप्रस्तरनिर्मितः कच्छपः उत्कीर्ण-कलायाश्चारुद्रव्यैः खचितकलायाश्च शोभनमुदाहरणमस्ति। भारतोयशासनेन ब्रिटिशशासनेन च 'भारतस्योत्सवाः' इति नाम्ना संयोजितप्रदर्शनै 'अदिति-प्रदर्शन' इत्यस्य प्रधानपरामर्शदात्रा श्रीराजीवसेठीमहोदयेन प्रदर्शनार्थमेष कच्छपश्चयितः। इदं प्रदर्शनं मनुष्यजीवने निर्माणस्यानन्दं प्रदर्शयितु-मैच्छत्। प्रदर्शनमिदं लण्डननगरे 'वार्विकन सेण्टर' इति स्थाने जुलाई-अगस्त १९८२ इति समये संपन्नम्। उत्सवस्य विषयः भारतीयकलायाः सर्वोत्कृष्टत्व-प्रदर्शनमेवासीत्।

भारतीयमहोत्सवस्य समाप्तौ अयं कच्छपः सुरक्षितरूपेण तदधिकारिभिः संग्रहालये प्रत्यावर्त्तितः।

ध्रुपदमेला

विगतदशवर्षेभ्यः वाराणस्यां तुलसीघट्टे प्रतिवर्षं महाराजबनारस विद्यामन्दिर न्यासेन ध्रुपदमेलाया आयोजनं क्रियते। अस्योत्सवस्यायं दशमो वर्ष आसीदिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतोः विशेषेण संभारेणायमायोजितः। इदमायोजनं गङ्गाघट्टे निरावृतप्रदेशे रात्रित्रयं यावत् संपाद्यते। शिवरात्रेः प्राक् दिनद्वयमारभ्य शिवरात्रौ समाप्यते। अत्रायोजने गानश्रवणार्थं सहस्रशः श्रोतारः समागच्छन्ति, यत्र बहवो वैदेशिका अपि समागत्य अत्युत्साहेन गानश्रवणं कुर्वन्ति। इदमायोजनं शुल्कमुक्तं भवति, श्रोतृणां सामान्या धारणास्ति यदिदमायोजनमन्यैस्तैस्तैरायोजनैः साम्यतां भजते येषु महत् शुल्कं श्रोतृभ्यः गृह्यते। 'अखाडा तुलसीदास' इति नाम्नः स्थानस्य महान्तः प्रो. वीरभद्रमिश्रः आयोजनसाफल्याय सर्वथा प्रयतते।

अस्मिन् वर्षे फरवरी मासस्य २७, २८, २९ दिनाङ्कानां रात्रिषु ध्रुपदमेला संपन्ना। २७ फरवरी दिनाङ्कदिने रात्र्यागमे प्रथमवारं महाराजकुमारेण श्री अनन्त नारायण सिंहमहोदयेन 'ध्रुपदमेला' इत्यस्य उद्घाटनं कृतम्। स्वोद्घाटनभाषणे महाराजकुमारो अस्यायोजनस्यैतिह्यं भणितवान्। अस्मिन् कार्ये शासनद्वारा अन्यसंस्थाभिश्च देशस्य विविधस्थानेषु ध्रुपदगायन कार्यक्रमस्यायोजनस्य प्रयासस्यापि वर्णनं कृतं महाराजकुमारेण। महाराजकुमारः ध्रुपदमेलानिमित्तं स्वशुभकामनां व्यक्तवान् तथा ध्रुपदगानस्य शुभभविष्यार्थं कामयामास। अस्मिन् उद्घाटनावसरे कांग्रेस संस्थाया राष्ट्रीय कार्यकार्यध्यक्षः पण्डितकमलापतित्रिपाठिमहोदयो मुख्यातिथिरध्यक्षश्चासीत्। पण्डितत्रिपाठिमहोदयेन काशिराजवंशेन भारतीयसंस्कृतेः कलायाश्च रक्षणार्थं प्रचारार्थं च कृतानां प्रयासानां प्रशंसनं कृतम्। ध्रुपदमेलाया दशमोत्सवनिमित्तं भारतशासनस्य अतिरिक्तसचिवपदे वर्तमाना डा० श्रीमती कपिलावात्स्यायनमहोदया, भारतशासनस्य सङ्गीतनाटक अकादमी इति संस्थाया अध्यक्ष; डा० नारायण मेनन महोदय अपि आहूतौ आस्ताम्। ताभ्यामस्यायोजनस्य प्रशंसनं कृतम्। अस्मिन् उत्सवे उद्घोषितं यत् त्रिसहस्ररूप्यकाणां त्रयः पुरस्काराः प्रतिवर्षं ध्रुपदशैल्याः त्रिविशिष्टकलाकारेभ्यः प्रदास्यन्ते। एषु पुरस्कारेषु द्वौ पुरस्कारौ गायनकलायां एकश्च वाद्यकलायां भविष्यति। अस्मिन् वर्षे एक एव पुरस्कारः पण्डित सियारामतिवारीमहोदयाय प्रदत्तः।

अस्मिन् अवसरे हिन्दू विश्वविद्यालयस्य संगीतमहाविद्यालये एका विचारगोष्ठी अपि आयोजिता आसीत् यस्या उद्घाटनं तत्रभवद्भिः काशिनरेशैः महाराज डा० विभूतिनारायणसिंहमहोदयैः कृतम्। गोष्ठ्यां डा० श्रीमती कपिलावात्स्यायन महोदया, डा० नारायणमेनन महोदयश्च सम्मिलितौ आस्ताम्। गोष्ठ्याः संचालनं डा० प्रेमलताशर्मा कृतवती। गोष्ठ्याः साफल्यार्थं डा० श्रीमती राजम् महोदया अपेक्षितं साहाय्यं दत्तवती।

२. महाराज उदितनारायणसिंह मानसप्रचार निधिः

अस्य न्यासस्य तत्त्वावधाने वैशाखमासे शुक्लपक्षे प्रतिपत्तिथिमारभ्य नवमीं तिथि यावत् पूर्ववद् रामचरितमानस्य नवाह्नपारायणं चकियानगरस्थिते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरस्वतीमन्दिरे संपन्नम्। पारायणं मन्दिरस्य पूजकेन कृतम्। प्रवचनं तु श्रीशिवनारायणव्यासमहोदयेन, रामप्रसादअवस्थीमहोदयेन, सन्तकुमारमहोदयेन तथा श्रीवैष्णव महोदयेन कृतम्। प्रवचनानि कालीमन्दिरे संपन्नानि। न्यासस्याध्यक्षास्तत्रभवन्तः काशिनरेशा महाराजा डा० विभूतिनारायणसिंह महोदया प्रतिदिनं नवाह्नपारायणे उपस्थिता आसन्। पारायणसमाप्तौ ब्राह्मणेभ्यः भोजनं दक्षिणाश्च प्रदत्ताः।

३. महाराज काशिनरेश धर्मकार्य निधिः

अनेन न्यासेन वर्षं यावद् बहूनि धार्मिकाणि कृत्यानि संपाद्यन्ते। अनेन न्यासेन त्रयो महाविद्यालया अपि संचाल्यन्ते येषामनुदिनं उन्नतिर्भवति। इमे अधोनिर्दिष्टा महाविद्यालया सन्ति—महाराज वलवन्तसिंह महाविद्यालयः गङ्गापुरस्थः, २. महाराजा मनसाराम विधिमहाविद्यालयः राजातालाब नगर-स्थितः ३. रामनगर दुर्गस्थिता महारानी रामरत्नकुंवरि संस्कृत पाठशाला च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

११

मान्धातुश्चरितं पुण्यं श्रुत्वा काशिपतिस्तदा ।
पप्रच्छ तमृषिं भूयः संपूज्य च पुनः पुनः ॥ १ ॥

धन्वन्तरिरुवाच ।

यथा प्रकाशितो योगिन् मानसाख्यः सरोवरः ।
तथा त्वया समुदितं विस्तरेण न संशयः ॥ २ ॥

अधुना श्रोतुमिच्छामि मानसाख्यस्य वर्णनम् ।
तत्तीर्थानां च माहात्म्यं देवर्षिगणपूजितम् ॥ ३ ॥

सरोवरं प्रयास्यामि माहात्म्यं शृणुयाम्यहम् ।
कस्मात् प्रवेशो योगीश निर्गमः कुत्रतः स्मृतः ॥ ४ ॥

के तीर्थागमने तत्र निर्गमे के त्वया स्मृताः ।
अगम्यरूपो हि गिरिर्हिमेनेति मया श्रुतम् ॥ ५ ॥

विलङ्घ्य गिरिराजानं प्राप्यते मानसः कथम् ।
एतद्धि संशयं योगिन् छिन्धि मे नात्र संशयः ॥ ६ ॥

व्यास उवाच ।

इति तद्वचनं श्रुत्वा चिरं ध्यात्वा तदा मुनिः ।
उवाच वचनं श्रेष्ठं पुण्याख्यानसमन्वितम् ॥ ७ ॥

दत्त उवाच ।

शृणु राजन् मया प्रोक्तं धर्मकामार्थदं शुभम् ।
आयुरारोग्यदातारं धनधान्यविवर्द्धनम् ॥ ८ ॥

आख्यानं गिरिराजस्य देवतैरपि पूजितम् ।
हिमस्य गुणसंयुक्तं पुण्यमूलं तपोनिधिम् ॥ ९ ॥

११

१. –b) ने1 तथा (→तदा). ४. –a) ने1 सरोवरजलस्यापि, ने2 सरोवरं प्रजास्यामि. ५. –b) ने2 नो (→के).
९. –a) ने1 आख्यान–(→आख्यानं). –d) ने3 °मूल–(→°मूलं).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथोक्तं हि त्वया राजंस्तत्तथैव न संशयः ।
अगम्यरूपो हि गिरिर्वर्त्तते नृपसत्तम ॥ १० ॥
तथापि मानुषाणां वै धर्ममार्गरतात्मनाम् ।
कैलासमपि दुर्गम्यो गम्यरूपो हि विद्यते ॥ ११ ॥

सन्ति सर्वे महाराज दुर्विलङ्घ्या हि पर्वताः ।
हिमाद्रिस्तु स्वभावेन दुर्विलङ्घ्यो न संशयः ॥ १२ ॥

तथापि कथयिष्यामि तस्य मार्गं न संशयः ।
यं प्राप्य मृगकीटाद्या व्रजन्ति शिवमन्दिरम् ॥ १३ ॥

अस्त्युत्तरपथे राजन् हिमाद्रिः पर्वतोत्तमः ।
तस्य पादतले रम्यो नाम्ना कूर्माचलो गिरिः ॥ १४ ॥

तीर्थैर्बहुभि[ः]संयुक्तो मृगपक्षिभिः सेवितः ।
गन्तव्यं तत्र राजर्षे यत्र कूर्माचलो गिरिः ॥ १५ ॥

मयूरैः सेवितपदस्तथान्यैः पक्षिराजितः ।
गण्डकीलोहसरितोर्मध्ये स्नात्वा महेश्वरम् ॥ १६ ॥

संपूज्य नृपशार्दूलस्तथान्यान् देवतागणान् ।
ततस्तु सरयूतीरे दृष्ट्वा तत्र शिलां शुभाम् ॥ १७ ॥

स्नात्वा तत्र महाराज हंसतीर्थजले शुभे ।
ततः परं महाभाग सुपुण्यं दारुपर्वतम् ॥ १८ ॥

गत्वा संपूज्य लोकेशं जम्बुकाख्यं महेश्वरम् ।
ततः परं महाराज पातालभुवनेश्वरम् ॥ १९ ॥

गत्वा संपूज्य विधिना समुपोष्य दिनत्रयम् ।
ततः परं महाराज रामगङ्गासरिज्जले ॥ २० ॥

स्नात्वा संपूज्य वालीशं तथैव शिवकिङ्करान् ।
ततः परं महाभाग पावनाख्यं गिरिं व्रजेत् ॥ २१ ॥

संपूज्य पावनं देवं पताकाख्यं गिरिं व्रजेत् ।
पताकेशं हरं तत्र संपूज्य विधिपूर्वकम् ॥ २२ ॥

ततोसितासितासङ्गे कालीशाख्यं महेश्वरम् ।
गत्वा संपूज्य विधिवच्चतुर्दंष्ट्रगिरिं व्रजेत् ॥ २३ ॥

---

१०. –d) ते1 °सत्तमः(→°सत्तम). ११. –c) ने3 –बहु–(→–मपि). १३. –a) न2,3 तथापि त्वां कथयिष्यामि. १७. –c) ने2 °तीरं (→°तीरे). –d) ने2 शुभं (→शुभां). १८. cd– १९. ने1. ab ⊙. १९. –d) ने1 °श्वरः (→°श्वरम्).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संभाव्य गिरिद्रंष्ट्रांस्तान् पुण्या(?)न् हिमालयोद्भवान् ।
ततो धर्माश्रयं पुण्यं दृष्ट्वा राजर्षिसत्तम ॥ २४ ॥

धर्मादीन् लोकपालान् वै दृष्ट्वा धर्मपदं शुभम् ।
धर्मद्वारं तु निष्क्रम्य ततो व्यासाश्रमं व्रजेत् ॥ २५ ॥

कृष्णद्वैपायनं व्यासं संपूज्य विधिपूर्वकम् ।
येनेदं परमं पुण्यं स्कन्दोत्पत्तिसमन्वितम् ॥ २६ ॥

स्कान्दं शिवकथायुक्तं शतसाहस्रिकं शुभम् ।
खण्डाख्यानसमायुक्तं रचितं जनमेजय ॥ २७ ॥

पूजयित्वा गुरुं व्यासं श्यामामूले तपोन्वितम् ।
आचारहीनापि जना तत्रस्था नृपसत्तम ॥ २८ ॥

ते ज्ञेया व्याससदृशा ऋषिपूज्या न संशयः ।
यो व्रजेन्नृपशार्दूल पुण्यं व्यासाश्रमात्परम् ॥ २९ ॥

स व्याससदृशो ज्ञेयो हीनोऽप्याचारलक्षणैः ।
आचारकरणं राजन् यावद्व्यासाश्रमं शुभम् ।
प्रोक्तं तावद् वसिष्ठाद्यैः ऋषिभिः सनकादिभिः ॥ ३० ॥

त्याज्यमाचारकरणं गत्वा व्यासाश्रमात्परे ।
जातोऽस्मि देवसदृश इति ब्रूयान्न संशयः ॥ ३१ ॥

ततः परं महाभाग कैरलाख्यगिरिं व्रजेत् ।
संपूज्य कैरलादेवीं पुलोमानं गिरिं व्रजेत् ॥ ३२ ॥

पुलोमेशं हरं तत्र पुलोमासरमध्यगम् ।
संपूज्य नृपशार्दूल तारकाख्यं गिरिं व्रजेत् ॥ ३३ ॥

तारिण्या [:] शारदायाश्च सङ्गमे नृपसत्तम ।
स्नात्वा संपूज्य देवेशं तारकेशं महेश्वरम् ।
पुण्या सिद्धगणानां वै गुहासुबहुला प्रभो ॥ ३४ ॥

---

२४. –c) ने3 °श्रमं (→°श्रयं) २५. –b) ने2 धर्मं (→धर्म–). –c) ने1 निष्क्रिम्य (→निष्क्रम्य).– २७. –a) ने2.3 स्कंदं (→स्कान्दं). २८. –b) ने3 °शूले (→°मूले) –c) ने2.3 अपि जाताचारहीना (ने3 °नश्). –d) ने1 °सत्तमे (→°सत्तम). ३०. ef–३१ d ने1. ⊙; ३०. –f) ने2 सत्यकारिभिः (→सनकादिभिः). ३२. –c) ने2 केरया देवी, ने3 केरजां देवीं (→कैरला देवीं) ३३. –b) ने2 °मध्यमं (→°मध्यगम्). ३४. –a) ने3 तरिण्या (→तारिण्या)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्वा संभाव्य सिद्धान् तान् तथान्यान् देवतागणान् ।
ततः परं महाराज सीमामायतनीं व्रजेत् ।। ३५ ।।

मुण्डनं चोपवासं च कृत्वा तत्र प्रयत्नतः ।
तथा महामहानां च ततो गौरिगिरिं व्रजेत् ।। ३६ ।।

गौर्य्याः सुगह्वरं पुण्यं दृष्ट्वा संपूज्य पार्वतीम् ।
दृष्ट्वा गौरिगिरिं प्राप्तमात्मगोत्रसमुद्भवम् ।। ३७ ।।

वदन्ति पितरः सर्वे वैकुण्ठं प्राप्नुमो वयम् ।
यदि स्नाति कुले जातो मदीयेति वदन्ति हि ।। ३८ ।।

व्रजामस्तर्हि वैकुण्ठं पुण्ये मानसरोवरे ।
परस्परमथागत्य वदन्ति पितरः शुभम् ।। ३९ ।।

व्रजामश्चाद्य वैकुण्ठं विमानमधिरुह्य वै ।
सुहृत्सम्बन्धिभिः सार्द्धं यमालयगतैरपि ।। ४० ।।

कुलजस्नानपूता वै तर्पिताः कुलजेन हि ।
प्राप्स्यामो देवभवनं देवेन्द्रं प्रति मोदितम् ।। ४१ ।।

श्राद्धं कृत्वा च राजर्षे सुपुण्ये गौरिगह्वरे ।
तर्प्पयित्वा पितॄन् सर्वान् मृतान् सम्बन्धिबान्धवान् ।। ४२ ।।

ततो गौरिगिरिं पुण्यं विलङ्घ्य नृपसत्तम ।
व्रजेत् सरोवरं पुण्यं राजहंसैः सुसेवितम् ।। ४३ ।।

स्नात्वा तत्र यथान्यायमुपोष्य च दिनत्रयम् ।
दृष्ट्वा देवं हंसमयं शंकरं नृपसत्तम ।। ४४ ।।

ततस्तु तर्प्पयेत् सर्वान् पितॄन् स्वान् मानवोत्तम ।
अपुत्रान् गोत्रजान् सर्वान् तर्प्पयेत् सुसमाहितः ।। ४५ ।।

आब्रह्मभुवनाल्लोकाद् देवर्षिपितृमानवाः ।
तृप्यन्ति पितरः सर्वे तर्पिता मानसे जले ।। ४६ ।।

---

३५. –b) ने1 °यतनी (→°यतनीं). ३६. –a) ने2 मुड* (→मुण्डनं). ३८. b) ने1 वैकुंठ–(→वैकुण्ठं). –c) ने3 स्वाति, + स्नाति (→स्नाति). ३९. –a) ने1 वैकुण्ठ–(→वैकुण्ठं). ४१. –b) ने1 वै (→हि). –c) ने1.3 प्राप्स्याम (→प्राप्स्यामो). –d) ने3 न्द्र–(°न्द्र) ४२. –c) ने3 तपयित्वा (→तर्प्पयित्वा) ४४. –d) ने1 °सत्तम (→°सत्तमं). ४५. –b) ने1 °त्तामात् (→°त्तम).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य कस्यापि नाम्ना वै जलं मानसरोवरे ।
दत्तं स ब्रह्मभुवनं प्राप्नोति मनुजेश्वर ॥ ४७ ॥

तावद् यमालये वासो मानुषाणां दुरात्मनाम् ।
यावन्न मानसक्षेत्रे ददाति कुलजो जलम् ॥ ४८ ॥

यस्य वै दर्शनाद् राजन् वाजपेयफलं शुभम् ।
प्राप्नुवन्ति जनाः सर्वे म्लेच्छाश्चाचारवर्जिताः ॥ ४९ ॥

तर्पिताः पितरस्तत्र किन्न प्राप्स्यन्ति वैष्णवम् ।
पदं हि नृपशार्दूल मानसे क्षेत्रनायके ॥ ५० ॥

संतर्प्य च पितॄन् सर्वान् पूजयित्वाऽथ शंकरम् ।
ततः प्रक्रमणं कार्यं मानसाख्यस्य वै नृप ॥ ५१ ॥

ततो गङ्गाप्रवाहेषु स्नात्वा चैव पुनः पुनः ।
विष्णुपादाङ्कितां भूमिं संपूज्य च जनेश्वर ॥ ५२ ॥

ततो देवप्रयागाख्ये गत्वा संपूज्य शंकरम् ।
विसृज्य मानसक्षेत्रं संभाव्य च ऋषींस्तथा ॥ ५३ ॥

कथितं हि महाभाग प्रवेशं मानसः सरे ।
निर्गमं कथयिष्यामि शृणुष्व सुसमाहितः ॥ ५४ ॥

ततो व्रजेन्महापुण्यं नाम्ना लङ्कासरं शुभम् ।
तत्र स्नात्वा महाराज लङ्केशस्थापितं शिवम् ॥ ५५ ॥

दृष्ट्वा संपूज्य विधिवत् तत्र निष्क्रमणं स्मृतम् ।
ततस्तु शारदामूले स्नात्वा संपूज्य शंकरम् ॥ ५६ ॥

उपोष्य च यथान्यायं वरं निष्क्रमणं स्मृतम् ।
ततः परं महाराज तीर्थं खेचरसंज्ञकम् ॥ ५७ ॥

गत्वा संभावयन् सर्वान् खेचरान् देवनायकान् ।
मुण्डनं चोपवासं च कृत्वा तत्रैव भूपते ॥ ५८ ॥

---

४७. –a) ने$_1$ नामेन (→नाम्ना वै). –c) ने$_2$ समब्रह्मभुवं, ने$_3$ स स ब्रह्मभुवं (→स ब्रह्मभुवनं). ४९. –a) ने$_3$ म्लेच्छाद्याचारवर्जिताः
५०. b) ने $_{1\ 3}$ प्राप्स्यति (→प्राप्स्यन्ति). –c) ने$_{1.3}$ °शार्दूलं (→°शार्दूल).
५१. –a) ने$_1$ सर्वा (→सर्वान्). –d) ने$_1$ प्रभो (→नृप). ५३. –a) ने$_3$ °प्रयागाख्यं (→°प्रयागाख्ये). –c) ने$_{1.3}$ विसर्ज्यं (→विसृज्य); ने$_2$ मानसं (→ मानस–). ५४. –b) ने$_{2.3}$ परे (→सरे). –c) ने$_1$ निर्गमे च कथिष्यामि.
५५. –a) ने$_2$ °पुण्यां (→°पुण्यं). ५६. –b) ने$_1$ शुभम् (→स्मृतम्).
५७. –d) ने $_{1.2}$ तोर्थे (→तीर्थं).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूजयित्वा यथान्यायं प्रभविष्णुं महेश्वरम् ।
गत्वा ब्रह्मकलापं वै परं निष्क्रमणं स्मृतम् ।। ५९ ।।

ततः छायान्वितं क्षेत्रं गत्वा वै नृपसत्तम ।
छायाक्षेत्रेश्वरं देवं पूजयित्वा प्रयत्नतः ।। ६० ।।

तत्र रामसरं स्नात्वा तथैव ऋणमोचनम् ।
तथा ब्रह्मसरं स्नात्वा परं निष्क्रमणं स्मृतम् ।। ६१ ।।

ततः परं शिवयुतं खलमुक्तिकरं शुभम् ।
गत्वाऽथ नृपशार्दूल परं निष्क्रमणं स्मृतम् ।। ६२ ।।

ततो नन्दागिरिं पुण्यं स्नात्वा नन्दासरं शुभम् ।
गत्वा सन्तर्प्य ये देवान् पितॄंश्चापि प्रयत्नतः ।। ६३ ।।

ततो व्रजेन् महाराज वैद्यनाथं महेश्वरम् ।
दृष्ट्वाऽथ मालिकां देवीं वरदां लोकपूजिताम् ।। ६४ ।।

वृद्धं गङ्गाजले पुण्ये स्नात्वा संपूज्य मालिकाम् ।
संपूज्य वैद्यनाथेशं परं निष्क्रमणं स्मृतम् ।। ६५ ।।

ततो ज्वालामयं तीर्थं वह्निज्वालासमन्वितम् ।
गत्वाऽथ नृपशार्दूल स्नात्वा रुद्रवतीजले ।। ६६ ।।

पूजयेच्चानलं देवं विधिदृष्टेन कर्मणा ।
तत्र पद्मावतीं पुण्यां स्नात्वा निःक्रमणं स्मृतम् ।। ६७ ।।

कथितं हि महाराज परं निर्गमनं यथा ।
एवं वै कुरुते यस्तु शृणु तस्यापि सत्फलम् ।। ६८ ।।

अश्वमेधसहस्रेभ्यस्तस्य पुण्यं शताधिकम् ।
सहस्रगुणितं तस्य काशीवासान्न संशयः ।। ६९ ।।

एकतः सर्वतीर्थानि दानानि विधिनानि च ।
एकतो मानसक्षेत्रं सर्वक्षेत्रोत्तमोत्तमम् ।। ७० ।।

सर्वतीर्थेषु यत्पुण्यं काशीवासेऽपि यत्फलम् ।
तस्मात् सहस्रगुणितं फलमाप्नोति दर्शनात् ।। ७१ ।।

सहस्रगुणितं पुण्यं वाजपेयान्नरेश्वर ।
दर्शनात्फलमाप्नोति मानसाख्यस्य वै तथा ।। ७२ ।।

---

५९. ने2. cd ⊙.

६३. –a) ने2 °गिरि (→°गिरिं). ६५. –a) ने3 वृद्ध (→वृद्धं). ६६. –d) ने1 रुद्रावती (→रुद्रवती) ६७. –d) ने1 संक्रमणं (→निःक्रमणं). ७०. –c) ने2.3 मानसं तीर्थं (→मानसक्षेत्रं). –d) ने2 °तीर्थो° (→°क्षेत्रो°).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश्वमेधाल्लक्षगुणं मानसाख्यस्य दर्शनात् ।
फलमाप्नोति राजर्षे सत्यं सत्यं वदाम्यहम् ॥ ७३ ॥

शतवर्षसहस्राणि काशीवाससमं फलम् ।
दर्शनान् मानसाख्यस्य प्राप्नुवन्ति जना भुवि ॥ ७४ ॥

तत्र गत्वा महाराज देहेनानेन चारुणा ।
व्रजिष्यसि विष्णुगृहं पुनरावृत्तिदुर्ल्लभम् ॥ ७५ ॥

तेन मार्गेण राजानो मरुत्प्रभृतयोऽपरे ।
गता स्वेनैव देहेन वैकुण्ठं भुवनं प्रति ॥ ७६ ॥

तीर्थाख्यानसमायुक्तं मानसाख्यायनं शुभम् ।
यः पठेत् प्रातरुत्थाय शृणुयाद्वा समाहितः ।
संप्राप्य ब्रह्मभवनं देववन्मोदते प्रभो ॥ ७७ ॥

॥ इति श्रीस्कन्दपुराणे मानसखण्डे मानसयात्राप्रवेशनिर्गमं नाम एकादशोऽध्यायः ॥ ११ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२

व्यास उवाच ।

इति श्रुत्वा स राजर्षिर्मार्गं तीर्थसमन्वितम् ।
प्रवेशं निर्गमं चैव श्रुत्वा दत्तमथाब्रवीत् ॥ १ ॥

धन्वन्तरिरुवाच ।

प्रवेशं निर्गमं चैव श्रुतं योगीन्द्रसत्तम ।
पुनर्मानसमाहात्म्यं श्रोतुमिच्छामि तत्त्वतः ॥ २ ॥

दत्त उवाच ।

साधु साधु महाराज त्वया पृष्टं हि शोभनम् ।
तदहं कथयिष्यामि शृणुष्व सुसमाहितः ॥ ३ ॥

मानसाख्यसमं तीर्थं त्रैलोक्यां न मयेक्षितम् ।
यत्र स्नानेन राजर्षे विष्णोः सायुज्यमश्नुते ॥ ४ ॥

स्पर्शनाच्छंकरपदं पानाद् ब्रह्मपदं शुभम् ।
प्राप्यते राजशार्दूल मानसेयजलस्य च ॥ ५ ॥

पूजनाच्छिवलिङ्गस्य स्वर्णहंससमयस्य च ।
प्राप्येन्द्रपदवीं राजन् मोदते देववद् दिवि ॥ ६ ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शुकानामपि संवादं हंसस्य च महामते ॥ ७ ॥

पुरा कृतयुगस्यादौ काम्पिल्ये नगरोत्तमे ।
बभूवुर्नृपशार्दूल शुका वै नीडवासिनः ॥ ८ ॥

चैत्रको नाम राजर्षे शुकाध्यक्षो बभूव ह ।
नीतिज्ञस्तपशास्त्राणां पक्षिणां हितकारकारकः ॥ ९ ॥

१२

१. –b) ने3 मार्गं (→मार्गं). –c) ने2 प्रविशं (→प्रवेशं). २. –a) ने2 वापि, ने3 चापि (→चैव). ४. –a) ने3 °साख्यं (→°साख्य). –b) ने1.2 त्रैलोक्यान्न (→त्रैलोक्यां न). ५. –d) ने1 मा* सेय° (→मानसेय°). ७. –c) ने2 सुक° (→सुका°). ९. –c) ने2 °शास्त्राणि (→°शास्त्राणां).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बभूवुस्तत्सुता राजन् दुर्विनीताः कुलाधमाः ।
पक्षिणां चाहिते युक्ताः पितुर्बलविनाशकाः ॥ १० ॥

शौनको वलकश्चापि हेमश्रृङ्गो हयस्तथा ।
बभूवुस्ते दुराचारा निजस्वसृपरायणाः ॥ ११ ॥

कामदग्धेन मनसा रेमिरे नीडवासिनः ।
ततः कालेन महता पिता तेषां नरेश्वर ॥ १२ ॥

पञ्चत्वमाप दुःखेन पुत्राणां कामचारिणाम् ।
पितूर्द्ध्वदैहिकं राजन् कृत्वा कामपरायणाः ॥ १३ ॥

वने वने स्वस्वस्रा वै सह च क्रीडिरे हि ते ।
एकदा ते दुराचारा व्याधेन सह वै नृप ॥ १४ ॥

विचक्रुर्मिलनं सर्वे पक्षिनाशाय चञ्चलाः ।
मिलित्वा तं महाव्याधमूचुस्ते पापकारिणः ॥ १५ ॥

त्वमस्मभ्यं महाव्याध दद शालीन् यथोचितान् ।
तुभ्यं पक्षिगणान् सर्वान् दास्यामो नात्र संशयः ॥ १६ ॥

व्याधस्तद्वचनाद् राजन् दत्वा शालीन् बुभुक्षितान् ।
शुकान् दुर्वृत्तिसञ्जातान् तानात्महितकारकान् ॥ १७ ॥

ततस्तेऽपि पक्षिगणान् प्रतार्य नृपसत्तम ।
ददुर्व्याधाय मूढाय कुलान्तकारकाय च ॥ १८ ॥

निक्षिप्य व्याधस्तान् सर्वाञ्जाले नीत्वा गृहं ययौ ।
शब्दस्वासादिरहितान् कृपणान् नृपसत्तम ॥ १९ ॥

भुक्त्वा धान्यान् समादाय पुनस्तेषां गृहं ययौ ।
तेऽपि सर्वान् पक्षिगणान् प्रतार्य नृपसत्तम ॥ २० ॥

ऊचुः प्रीतिमतीं वाणीं मन्त्रयित्वा स्वकान् स्वकान् ।
व्याधोऽस्माकं गृहागत्य जालमाक्षिपति ध्रुवम् ॥ २१ ॥

छेदिष्यामायतं जालं भवद्भ्यो यदि रोचते ।
भवद्भिस्तत्र गन्तव्यमग्रे वै यदि रोचते ।
वयं तत्रागमिष्यामः पाशछेदादनन्तरम् ॥ २२ ॥

दत्त उवाच ।

इति तेषां तथ्यमतं ज्ञात्वा ते पक्षिसत्तमाः ।
जालं प्रति महाराज आजग्मुस्ते प्रतारिताः ॥ २४ ॥

१९. cd ने३. ⊙. २४. –b). ने३ °रुत्तमाः (→°सत्तमा).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जालछेदे प्रसक्तास्ते न शेकुर्जालछेदनम् ।
स्थगितास्तत्र ते सर्वे जाले निपतिताभवन् ॥ २५ ॥

अथ तान् पतितान् ज्ञात्वा नीत्वा व्याधो गृहं ययौ ।
तेषां मांसेन राजर्षे कुटुम्बं स्वमतर्पयत् ॥ २६ ॥

अनेनैव विधानेन शुकाः पापपरायणाः ॥
हत्वा पक्षिगणान् सर्वान् ददुर्व्याधाय वै नृप ॥ २७ ॥

अथ कालेन राजर्षे नष्टान्यासन् कुलानि वै ।
पक्षिणां सारसादीनां तथा हंसादिनामपि ॥ २८ ॥

पक्षिहीनं वनं ज्ञात्वा व्याधस्तान् नृपसत्तम ।
न ददौ पुण्यभोग्यानि धान्यानि विविधानि च ॥ २९ ॥

ततस्ते व्याधमार्गं वै ददृशुः शोककातराः ।
क्षुत्क्षामा म्लानवदनाः कुलहीनाभवन् नृप ॥ ३० ॥

गन्तुं ग्रामान्तरं राजन् न शक्तात्मकुलं विना ।
दुर्द्धरा मानुषैः सर्वैश्चिन्तामापुर्दुरत्ययाम् ॥ ३१ ॥

कुलक्षयकृतं दोषं मित्रद्रोहं च पातकम् ।
ततोऽस्माभिः कृतं बव्रुः शुकास्ते नृपसत्तम ॥ ३२ ॥

एवं विलिप्यमानास्ते क्षुधया नृपसत्तम ।
त्यक्त्वा नीडं सुरचितं ययुर्ग्रामान्तरं शुभम् ॥ ३३ ॥

न प्रापुर्भोजनं तत्र क्षुत्क्षामा नृपसत्तम ।
तस्मात् सरं शीतजलं ययुस्ते चैत्रकसुताः ॥ ३४ ॥

हन्म्येतानि सञ्चिन्त्य व्याधस्तदनु वै नृप ।
जगाम जालं नीत्वा वै तत्रैव सरसान्तरे ॥ ३५ ॥

शुकापि राजशार्दूल सरे हंसं तपस्विनम् ।
ददृशुर्ध्यायमानं तं वृद्धं पक्षविवर्जितम् ॥ ३६ ॥

ध्यायन्तं मानसं पुण्यं तपोनिश्चलचेतसम् ।
पूजितं गणगन्धर्वैर्हिसापापादिवर्जितम् ॥ ३७ ॥

---

२५. -a) ने1 जालछेदेष्वसक्तास्ते. -d) ने1 स्थकिताम् (→स्थगितास्).
२८. -c) ने2 तरुसा° (→सरसा°). -c) ने3 सरसादीनां (→सारसादीनां).
३३. -a) ने1 विलप्य° (→विलिप्य°). ३४. -d) ने1 ययुस्ते चैत्रकांगजाः.
३५. -d) ने1.3 सरसांबरे (→सरसान्तरे). ३६. -d) ने1 वृद्धं पक्ष्यविवर्जितम्.
३७. -a) ने2 ध्यायन्ते (→ध्यायन्तं).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तं दृष्ट्वाऽऽशु शुकाः सर्वे क्षुधाखेदादिवर्जिताः ।
बभूवुर्नृपशार्दूल चत्वारो भगिनीसुताः ॥ ३८ ॥

ततस्तं पूजयामासुर्हंसं ते शुकनायकाः ।
ध्यानमार्गरतं शुद्धं देहवन्तं हरिं यथा ॥ ३९ ॥

पप्रच्छुस्ते सुखासीनं स्मृत्वा पापान्यनेकशः ।
स्वस्वसृगमनाद्यानि जन्मान्तरकृतानि च ॥ ४० ॥

शुका ऊचुः ।

पृच्छामि हंसं त्वां बुद्धं ध्यायन्तं लोकपूजितम् ।
स्वपुण्यैः पुण्यदेहं वै देवगन्धर्वपूजितम् ॥ ४१ ॥

द्विजराज शृणुष्व त्वं शुकानां पातकं महत् ।
अज्ञानतिमिरान्धानां ज्ञानमार्गविरोधिनाम् ॥ ४२ ॥

दृष्ट्वा त्वद्दर्शनं पुण्यं स्मृतमस्माभिः पातकम् ।
ऐहिकं प्राक्तनं चापि दुःखदं चान्यजन्मसु ॥ ४३ ॥

मानुषाणां दुःकृतिनां पातकानां क्षयं कथम् ।
कुलद्वेषकराणां च जायते हंसनायक ॥ ४४ ॥

दत्त उवाच ।

तेषां हि तन्मतं ज्ञात्वा शुकानां नृपसत्तम ।
उवाच वचनं हंसो वाचा चामृतपूर्वया ॥ ४५ ॥

हंस उवाच ।

सन्ति पापान्यनेकानि मानेषु शुकसत्तमाः ।
तेषां जन्मान्तरे भोगो जायते नात्र संशयः ॥ ४६ ॥

जन्मान्तरकृतानां हि भोगश्चात्रैव भुज्यते ।
जन्मन्यस्मिन् कृतं पुण्यं भुज्यते चान्यजन्मनि ॥ ४७ ॥

अत्रैवोशनसा गीतं शृण्वतां पक्षिसत्तमाः ।
जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ॥ ४८ ॥

चक्षुः श्रोत्राणि जीर्य्यन्ते तृष्णैका तरुणायते ।
कुर्वन्ति तृष्णया पापं मानवा मानवाधमाः ॥ ४९ ॥

---

३८. –a) ने3 दृष्ट्वा तु (→दृष्ट्वाशु); ४१. –a) ने3 शुद्धं (→बुद्धं). ४३. –c) ने1.3 एहिकं (→ऐहिकं). ४४. –c) ने2 वा (→च). ४५. –c) ने2 व* नं (→वचनं).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृष्णया मातृगमनं तृष्णया कलहं स्मृतम् ।
द्वन्द्वादिकरणं सर्वं तृष्णया एव भूयते ॥ ५० ॥

चक्षुर्मार्गं प्राणमुखं श्रौत्रास्तु मार्गगामिनः ।
तृष्णा चौरा समुत्पन्ना मानुषाणां दुरात्मनाम् ॥ ५१ ॥

भुञ्जन्ति पञ्चभूतानि तत्साक्षी मानवः स्मृतः ।
ततः सर्वं कर्मफलं जन्मान्ते पापकारिभिः ॥ ५२ ॥

भुज्यते नात्र सन्देहो जन्मान्तरशतोद्भवम् ।
मनसा शाम्यते तृष्णा श्रोत्रैश्चक्षुः प्रशाम्यते ॥ ५३ ॥

मनो बुध्या प्रशाम्येत देहश्रेयेप्सिभिर्न्नरैः ।
तस्मात्तृष्णा परित्याज्या भवद्भिःशुकसत्तमाः ॥ ५४ ॥

यक्ततृष्णा द्वन्द्वहीनाः प्राप्स्यस्थ परमां गतिम् ।
कानि पापानि भवतामिह जन्मकृतानि वै ।
कानि जन्मान्तरीयानि कथ्यतां शुकसत्तमाः ॥ ५५ ॥

शुका ऊचुः ।

शृणुष्व त्वं महाभाग वाणीमस्माभिरीरिताम् ।
कथ्यमानां विचित्रार्थां त्वद्दर्शनसमुद्भवाम् ॥ ५६ ॥

वयं पापोद्भवाः पापाः पापवृत्तिपरायणाः ।
पापेनाऽपि विलिप्ताङ्गाः कथं जानीमहे वयम् ॥ ५७ ॥

त्वद्दर्शनमिह प्राप्य जानीमः स्वं पुरातनम् ।
पातकं पापदेहा वै जन्मान्तरकृतं द्विज ॥ ५८ ॥

शृणुष्व पक्षिणां श्रेष्ठ देशे तैलङ्गसंज्ञके ।
भारद्वाजकुलोत्पन्ना जाता स्म ब्राह्मणा वयम् ॥ ५९ ॥

सप्तमे जन्मनि पुरा शुकनाम्नो द्विजस्य च ।
सुता नीतिरताः शुद्धा वेदस्वाध्यायकारकाः ॥ ६० ॥

---

५०. -d) ने1 भुज्यते (→भूयते). ५१. -a) ने1.2 °सुखं (→°मुखं). -d) ने2.3 मनुष्याणां (→मानुषाणां). ५२. -a) ने3 प्राणि°, +पंच° (→पञ्च°). -b) ने2 साक्षि (→साक्षी). ५३. -d) ने1 श्रोत्रश् (→श्रोत्रैश्) ५६. -a) ने2 °भागा (→°भाग). ५७. -a) ने2 पापः, ने3 प्रायः (→पापाः). ५८. -b) ने1 जानामः (→जानीमः); ने2 स्व (→स्वं). ५९. -b) ने1.3 तैलिंग° (→तैलङ्ग°). -d) ने2 ब्रह्मणा (→ब्राह्मणा). ६०. -a) ने3 पुण्या (→पुरा).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्विजवृत्तिरताः शान्ता जाताः स्म द्विजसत्तम ।
कालेनापि पिताऽस्माकं दैवात् पञ्चत्वताङ्गतः ॥ ६१ ॥

ततोऽस्माभिर्द्विजश्रेष्ठ पितुः सद्गतिकारकम् ।
कर्म समाप्य दाराणां कृतं पाणिग्रहं शुभम् ॥ ६२ ॥

कृतदारा वयं सर्वे जाता स्म धनिनां वराः ।
धनैर्बहुविधैर्हंस धर्मकामार्थनाशकाः ॥ ६३ ॥

द्विजानां भागहर्तारो लोलुपाः स्त्रीजनेष्वपि ।
मानिनोऽपि वयं सर्वे बभूवुर्द्विजसत्तम ॥ ६४ ॥

ततः कालेन महता द्विजानां पश्यतां द्विज ।
विहृत्य चरुभागं वै ब्राह्मणस्य तपस्विनः ॥ ६५ ॥

सह शूद्रैर्बुभुजिरे मोहिता बहुलैर्धनैः ।
ततश्चुकोप स ऋषिर्दृष्ट्वा चोपहृतश्चरुम् ।
सशापास्मान् स शूद्रान् वै पापिष्ठांश्चरुलोलुपान् ॥ ६६ ॥

ऋषिरुवाच ।

यस्माद्युस्माभिः पापिष्ठैश्चरुभागहृतो हि मे ।
तस्माच्छापं मदीयं वै गृह्णीतां शूद्रकैः सह ॥ ६७ ॥

यच्छूद्रैः सह युस्माभिर्भुक्तं मे वै चरूत्तमः ।
तस्माद्यूयं काकयोनौ भव जन्मसु पञ्चसु ॥ ६८ ॥

शुका ऊचुः ।

तदस्माभिर्महाभाग श्रुत्वा शापमृषेः कटुम् ।
प्रार्थितो ब्राह्मणः कश्चिच्छापनाशाय भो द्विज ॥ ६९ ॥

सोवाचास्मान् महाभाग जन्मनि सप्तमे हि वै ।
जनयित्वा निजं देहं शुकगेहे सुशोभने ॥ ७० ॥

शूद्रोऽपि व्याधस्य गृहे भविष्यति न संशयः ।
शूद्रिका भगिनी भूत्वा युस्माकं नायिका भवेत् ॥ ७१ ॥

---

६१. -a) ने$_1$ °रतां (→°रताः). -b) ने$_2$ °रुत्तमः (→°सत्तमः). ६२. -d) ने$_2$ कृत- (→कृतं). ६४. -b) ने$_2$ °जन° (→°जने°). ६५. -b) ने$_{1.3}$ पश्यता (→पश्यतां). ६६. -a) ने$_{1.2}$ बुभुजुतुर् (→बुभुजिरे). -d) ने$_2$ °लोलुपम् (→°लोलुपान्). ६७. -d) ने$_3$ गृह्णीयु (→गृह्णीतां). ६८. -b) ने$_1$ मुक्तं (→भुक्तं); ने$_3$ भुक्तां मे च हरुत्तमः -d) ने $_{2.3}$ भवत (ने$_3$ °तः) जन्म पंत्रसु. ६९. -b) ने$_2$-यमृषये (→शापमृषेः). ७१. -a) ने$_2$ व्याघ* (→व्याघस्य). -c) ने$_2$ भागिनी (→भगिनी). -d) ने$_1$ नयिका (→नायिका).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याधस्य च शुकानां च प्रीतिस्तत्र भविष्यति ।
ततो हंसान्मुक्तिपथं प्रापयिष्यथ वै द्विजाः ॥ ७२ ॥

ततस्तद्वचनं श्रुत्वा ऋषिशापाद् द्विजोत्तम ।
त्यक्त्वा कलेवरं सर्वे काकयोनौ वभूव तु ॥ ७३ ॥

पञ्चजन्मसु काकानां गृहेषु पक्षिनायक ।
भूत्वा शुकस्य गेहे वै जाताः स्मो नात्र संशयः ॥ ७४ ॥

सांप्रतं चापि पक्षीश पापादस्माभिः पातकम् ।
कृतं स्वशुकग्राहं वै तथा गोत्रवधं महत् ॥ ७५ ॥

कृत्वा व्याधेन मैत्रीं वै स्तोकेनैव च कारणात् ।
कुलक्षयं दोषकरं कृतमस्माभिः साम्प्रतम् ॥ ७६ ॥

एतस्य पातकस्यापि नास्त्यन्तं द्विजसत्तम ।
तव संदर्शनाद् हंस स्मृतं प्राक्चरितं महत् ॥ ७७ ॥

कस्मात् पुण्यतमस्त्वं वै जातोऽसि द्विजसत्तम ।
किमिह ध्यायसि हृदा तत् त्वं कथय सुव्रत ।
केनास्माकं पापनाशो जायते तद्वदस्व वै ॥ ७८ ॥

हंस उवाच ।

सोऽहं मानसपुण्येन पूतोऽस्मि शुकसत्तमाः ।
तमहं वाचयिष्यामि मानसं ब्रह्मनिर्मितम् ॥ ७९ ॥

तत्र मे मज्जनं पुण्यं वर्त्तते नात्र संशयः ।
तस्य ध्यानेनाहं पूज्यो देवतानां शुभात्मनाम् ॥ ८० ॥

गन्धर्वाणां द्विजानां च पूज्योऽस्मि नात्र संशयः ।
अजरामरतां वापि तस्य ध्यानेन वै खगाः ॥ ८१ ॥

प्राप्तवानस्मि रूपेण चामुना कायशोभिना ।
अन्तेऽप्यहं गमिष्यामि देहेनानेन वै खगाः ॥ ८२ ॥

सुपुण्यं ब्रह्मभुवनं देवर्षिगणसेवितम् ।
तस्माद्यूयं महाभागा मानसाख्यं सरोवरम् ॥ ८३ ॥

---

७३. –b) ने2.3 °शापं (→°शापाद्). –d) ने1 ह (→तु). ७५. –c) वे1 सुकपाहं (→सुकग्राहं). ७६. –a) ने1 मैत्री (→मैत्रीं). ७७. –b) ने2 नाल्पं तं (→नास्त्यतं). ८१. –c) ने2 अजरामरणं वापि. ८२. –c) ने2 अन्ये° (→अन्ते°); ने1 गमिरुयामि (→गमिष्यामि). ८३. –a) ने2 °भवनं (→°भुवनं).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पश्यन्तां शिवलिङ्गेन देवपूज्येन वै सह ।
तेन वै ब्रह्मभुवनं देवर्षिगणसेवितम् ॥ ८४ ॥

प्राप्स्यथ कामयानं वै अधिरुह्य न संशयः ।
सांप्रतं योगिगम्यो वै वर्तते मानसः सरः ॥ ८५ ॥

वसन्ते प्रथमे मासि गम्यतां यदि रोचते ।
तत्र गत्वा महाभागा यूयं ब्रह्मपदं शुभम् ॥ ८६ ॥

गमिष्यथ न सन्देहः स्वस्वस्रा चानया सह ।
ब्रह्महत्यादियुक्तोऽपि गोवधादपि वै खगाः ॥ ८७ ॥

प्राप्स्यते ब्रह्मभवनं देवदानवपूजितम् ।
किमनेनापि पापेन शापभारेण वै द्विजाः ॥ ८८ ॥

भीतिप्राप्ताप्ययं त्यज्य गम्यतां मानसे सरे ।
वर्वर्ति मानसक्षेत्रे पातकानां भयं कुतः ॥ ८९ ॥

योन्यन्तरभयं वापि नास्ति नास्तीह वै खगाः ।
मातुः सङ्गमनाद्वापि स्वसुः सङ्गात् तथैव हि ॥ ९० ॥

शुद्धयन्ति मानसक्षेत्रे तथ्यं वै कथितं मया ।
तस्माद् यूयं महाभागा मानसाख्यं सरोवरम् ॥ ९१ ॥

गत्वा पापसमूहं वै क्षाल्यतां नात्र संशयः ।
किन्तु यूयं महाभागा स्थिता वैव ममाश्रमे ॥ ९२ ॥

सोऽहं प्रातः समुत्थाय मज्जामि मानसं सरम् ।
तत्र स्नात्वाहु(?) देहेन पुनः पुण्याश्रमं प्रति ॥ ९३ ॥

आगमिष्यामि दिवसे द्वितीये नात्र संशयः ।
ततो युस्मानिहागत्य स्नापयामि जलैः शुभैः ॥ ९४ ॥

पक्षलग्नैर्हिमयुतैर्मानसेयैः सुशोभनैः ।
सांप्रतं भवतां गम्यो नास्ति वै मानसः सरः ॥ ९५ ॥

---

८४. –b) ने1.3 देह° (→देव°). ८५. –a) ने2 प्राप्स्यश्च (→प्राप्स्यथ). c) ने3 °गम्या (→°गम्यो). –d) ने2 मानसा: (→मानसं).

८८. ab–९० ab ने1. ⊙. ८८. –b) ने3 °पूजित: (→°पूजितम्). ९०. –b) ने1 (→भक्ति ह नास्तीह). –d) ने3 संगं (→सङ्गात्); ने3 च (→हि). ९१. –a) ने2 °क्षेत्रं (→°क्षेत्रे). ९४. –b) ने3 तृतीये (→द्वितीये).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगिगम्यो हि दुःप्राप्यो हिमर्तौ वर्तते सरः ।
प्राप्तां पश्य सुदुर्द्धर्षा हिमर्तुः खगसत्तमाः ॥
तस्मान्ममाश्रमे यूयं स्थीयध्वमहनि त्रये ॥ ९६ ॥

दत्त उवाच ।❀

हंसस्य वचनं श्रुत्वा शुका सर्वे नृपोत्तम ।
तस्थुर्हंसाश्रमे पुण्ये हंसश्रेणिविराज(जि?)ते ॥ ९७ ॥
हंसोऽपि तान् सामाश्वास्य मानसाख्यं सरोवरम् ।
जगामाकाशमार्गेण सिद्धकिन्नरशोभिना ॥ ९८ ॥
तत्र गत्वा स विधिवन् मज्जनं विचकार ह ।
ध्यात्वा वै स शिवं शान्तं पूजयामास तं नृप ॥ ९९ ॥
दृष्ट्वा सिद्धगणान् सर्वान् सरोवरजलं शुभम् ।
नीत्वाऽथ नृपशार्दूल साजगाम गृहं प्रति ॥ १०० ॥
तत्रागत्याथ राजर्षे समाहूय शुकोत्तमान् ।
स्नाप्यामास विधिवत् पक्षलग्नैर्जलैः शुभैः ॥ १०१ ॥
स्नापितास्ते शुका राजन् त्यक्त्वा शुककलेवरम् ।
बभूवुर्देवसदृशा देवदेहाः प्रभावतः ॥ १०२ ॥
ततस्ते देवलोकाद्वै विमानं देवसेवितम् ।
समानीतं देवगणैर्ददृशुर्नृपसत्तम ॥ १०३ ॥
तमारुह्याथ ते सर्वे पुरन्दरगृहं शुभम् ।
अप्सरोभिश्च संकीर्णं प्रवरैर्नृपसत्तम ॥ १०४ ॥
तत्र तान् पूजयामासुः पुरन्दरपुरोगमान् ।
मानसीयैर्जलकणैः स्नातान् वै देवनायकान् ॥ १०५ ॥
व्याधोऽपि हंसवचनं श्रुत्वा राजर्षिसत्तम ।
मत्वा च मानसं पुण्यं जगाम दिशमुत्तराम् ॥ १०६ ॥
दृष्ट्वा च मानसं पुण्यं स्नात्वा पीत्वा मुहुर्मुहुः ।
जगाम स्वेन देहेन ब्रह्मणः परमेष्ठिनः ॥ १०७ ॥

---

९६. –a) ने2 दुर्धर्षो (→दुर्द्धर्षा). –f) ने3 त्रीणि (→त्रये).
❀ ने2 दक्ष उवाच.

९९. –b) ने3 च चकार (→विचकार). १०१. –a) ने2 °गत्वाथ (→°गत्याथ). –d) ने1. शुभः (→शुभैः).

१०२. –b) ने1 शिव° (→शुक°). –१०३. –c) ने1.3 समानीत – (→समानीतं). १०५. –b) ने1 पुरंदरगृहं शुभम्.

१०५. b परं ने1 अधिकम्—

अप्सरोभिश्च संकीर्णं प्रवरैर्नृपसत्तमा ।
तत्र तान्पूजयामासुः पुरन्दरपुरोगमान् ॥ (= १०४ cd–१०५ ab)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदं ब्रह्मर्षिभिः सेव्यं सुरसिद्धनिषेवितम् ।
बिन्दुमात्रेण संस्नाताः पापाः शुककुलाधमाः ॥ १०८ ॥

प्राप्य माहेन्द्रपदवीं वसन्ति त्रिदशालये ।
किमु तत्र महाराज स्नातकानां शुभावहम् ॥ १०९ ॥

माहात्म्यं राजशार्दूल वक्तुं वर्षशतैरपि ।
न शक्यते देवगणैः सुरज्येष्ठादिभिः प्रभो ॥ ११० ॥

तत्र स्नात्वा देवदेहा जायन्ते मानवाधमाः ।
तस्य माहात्म्यकथने देवापि कश्मलं गताः ॥ १११ ॥

इत्येतत् कथितं राजन् शुकाख्यानं सुशोभनम् ।
आयुरारोग्यमैश्वर्यं सुखसम्पत्तिदायकम् ॥ ११२ ॥

इदं शुकाख्यानसमन्वितं विभो
गुणानुवादं सरसो वदन्ति ये ।
ते वै गृहं देवसुपूजितं हरे-
र्विहाय रुद्रादिपदं व्रजन्ति ते ॥ ११३ ॥

॥ इति श्रीस्कन्दपुराणे मानसखण्डे शुकाख्यानं नाम द्वादशोऽध्यायः ॥

---

१०८. –b) ने2 °सिद्धं (→°सिद्ध–). १११. –a) ने3 स्नाता (→स्नात्वा). –b) ने2 °धमा (→°धमाः).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३

दत्त उवाच ।

अथान्यदपि वक्ष्यामि शृणुष्व नृपसत्तम ।
मानसाख्यगुणैर्युक्ता कथिता मुनिना पुरा ॥ १ ॥

इदमेव परं श्रेयो मानुषे मनुजाधिप ।
मानसाख्यकथाप्रश्नं भाषणं तद् गुणैः सह ॥ २ ॥

मानुषे मनुजव्याघ्राः सारे संसारसागरे ।
मानसाख्यगुणं सारं विद्यते नात्र संशयः ॥ ३ ॥

दुर्ल्लभं मानुषे लोके मानुष्यं नृपसत्तम ।
तत्रापि दुर्लभं मन्ये मानसाख्यस्य दर्शनम् ॥ ४ ॥

यं दृष्ट्वा मानवाः सर्वे पापिष्ठा ब्रह्मघातिनः ।
न मातुर्ज्जठरे वासं पश्यन्ति नृपसत्तम ॥ ५ ॥

इतिहासं विचित्रार्थं शृणुष्व नृपसत्तम ।
माहात्म्यं लक्षणैर्युक्तं सुखदं मुक्तिदायकम् ॥ ६ ॥

पुरा कृतयुगस्यादौ मिथिलायां जनाधिप ।
जनकस्य कुले जातः केतुमान्नाम विश्रुतः ॥ ७ ॥

बभूव राजा मतिमान् भूतानां प्राणकम्पनः ।
स राजा ब्रह्मवृत्तीनां हर्त्ताऽभून् नृपसत्तम ॥ ८ ॥

वेदमार्ग विलोप्ता च यज्ञवृत्तिविलोपकः ।
सन्नीतिपथगांल्लोकान् त्यक्त्वा मन्त्रज्ञनायकान् ॥ ९ ॥

चौरैः सह महाराज चकार प्रीतिमुत्तमाम् ।
त्यक्त्वा सर्वान् जनपादन् नगरांश्च नृपोत्तम ॥ १० ॥

१३

३. –b) ने1 सरसे सारमागरे. –c) ने1 °गुणः (→°गुणं). ४. –b) ने1 मानुख्यं (→मानुष्यं). ५. –c) ने1 वास (→वासं). ६. –a) ने1 इतिहास– (→इतिहासं). ७. –c) ने1 जात (→जातः). ८. –a) ने1 पति मा, ने2 प्रतिमान् (→मतिमान्). ९. –a) ने1 °विलुप्ता (→°विलोप्ता). १०. –c) ने1 जान° (→जन°).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चकार स वने वासं विरमन् भिल्लपत्तिभिः ।
स राजा राजशार्दूल मूषयामास नागरान् ॥ ११ ॥

दिवा वनान्तरे स्थित्वा रात्रौ चौरसहायवान् ।
चौरैः सह महाराज ब्राह्मणानां गृहं ततः ॥ १२ ॥

मूषयामास सकलं नारीजनसमन्वितम् ।
मुह्यं(ह्यन् ?) जानपदानां स धनानि बहुलानि च ॥ १३ ॥

